M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

Ser. 404

Title: Vidhan Parijat Tritiya Stabak

Patra

404

विधानपारिजात. तृतीयस्तबक.

Vidhāna Parijāta	Title
Ananta Bhaṭṭa son of Nāgadeva Bhaṭṭā	Author
	Editor
Third Tabaka	Year, Vols.
	Publisher
	Remarks

404

404

तृतीयस्तवकेप्रथमोंशः

॥श्रीगणेशाय नमः॥ अविघ्नमस्तु॥ श्रीगुरुभ्यो नमः॥ वंदे श्रीमदनंतसंज्ञगिरिशं लक्ष्मी

वि० पा० निवासं हरिं विघ्नध्वांतदिवाकरं सुरगुरुं सर्वार्थसिद्धिप्रदं॥१॥ ब्रह्माद्यावसुरेंद्रपू रा ३

१ र्वकसुराध्यस्य प्रसादात्सदा प्रारब्धस्य समा— मीपुरमलं नद्दूंशदेवं परं॥२॥ यांक्षी

राब्धिजाजानिं तथा ब्रह्मादिकान्सुरान्॥ गणेशं विघ्नहर्तारं देवं हैमवतीसुतं॥ आच

तुर्दशसुविद्यासु निष्णाताः शुद्धचेतसः॥ अपरोक्षब्रह्मलाभाज्जयंति गुरवो मम॥ना

श्रितिसकलहरस्यं बिंबितं यस्य चित्ते मुकुरइव विशुद्धे दोषमालिन्यशून्ये॥ स्वपा

दविमलं भक्ताय यस्य तुष्टो रमेशो जनकजनकल्पं नंदमेनंनतोस्मि॥ वेदशास्त्रनि राम:

धीन्वंदे पितृन्नागेशसंज्ञितं॥ यत्कृपामृतसिक्तोहं मनं वंभरलाजनं॥ अनंतभट्ट १

नामाहं कारावशास्त्री स्वतां मुदे॥ आह्निकं स्वनिबंधेस्मिन्संग्रहला भियथामति॥ श्रीः

यस्य स्मरणमात्रेण कर्मसंपूर्णतामियात्॥ तं प्रणम्य महाविष्णुमाह्निकं कथयेधुना

॥तत्र ब्राह्मेमुहूर्त्ते चोत्थाय चिंतयेदात्मनो हितं॥ मिति याज्ञवल्क्यादिवचनादात्म

चिंतनं विधातव्यं॥ अत्र ब्राह्मो मुहूर्त्तः॥ सूर्योदयात्प्राग्गुपांसो मुहूर्त्तः॥ नाडिकाः षट्पं

चाशत्स्मात ऊर्ध्वेकाधिकोरुणः॥ उषःकालो पंचाशद्दिवसः सूर्योदयस्ततः इति गर्गोक्तेः॥

रात्रेस्तु पश्चिमो यामो मुहूर्त्तो ब्राह्म उच्यत इति मनुक्तावाग्भास्यः॥॥ तत्रोत्थायात्मचिं

तनं कार्यं॥ तथा च कूर्मपुराणे॥ ब्राह्मे मुहूर्त्ते उत्थाय धर्ममर्थं च चिंतयेत्॥ कायो

क्लेशांतदुत्पन्नं ध्यायीत मनसेश्वरमिति॥ विष्णुरपि॥ उत्थायोत्थाय बोद्धव्यं महद्भय

मुपस्थितं॥ मरणव्याधिशोकानां किमद्य निपतिष्यति॥ वाचनिष्ठस्मरन्निष्टदेवतां

स्मरेत्॥ व्यासः॥ प्रातस्मरामि भवभीतिमहार्त्तिशांत्यै नारायणं गरुडवाहनमब्ज

नाभं॥ ग्राहाभिभूतवारणमुक्तिहेतुं चक्रायुधं तरुणवारिजपत्रनेत्रं॥ प्रातर्नमा

मि मनसा वचसा च मूर्ध्ना पादारविंदयुगलं परमस्य पुंसः॥ नारायणस्य नरकार्णवि

स्य फल्कसे पारायणप्रवणविप्रपरायणस्य॥ प्रातर्भजामि भजतामभयंकरं तं प्राक्

सर्वजन्मकृतपापभयापहत्यै यो ग्राहवक्त्रपतितांघ्रिगजेंद्रघोरशोकप्रणाशे

मकरोद्धतशंखचक्रः॥ श्लोकत्रयमिदं पुराणं प्रातः प्रातः ठे पेन्नरः लोकत्रयगुरुस्तस्मै
वि०१० दद्यादात्मपदं हरिः॥ पाराशरः॥ ब्रह्मा मुरारिस्त्रिपुरांतकारी भानुः शशी भूमिसुतो बुध स्त०
२ श्चरु गुश्च शुक्रः शनिराहुकेतवः कुर्वंतु सर्वे मम सुप्रभातं॥ गुरुर्वसिष्टः क्रतुरंगिरा- ३
श्च मनुः पुलस्त्यः पुलहः सगौतमः॥ रैभ्यो मरीचिश्च्यवनश्च दक्षः कुर्वं॰ सन
त्कुमारश्च सनंदनश्च सनातनोप्यासुरिपिं॰॥ लौच॥ सप्त स्वराः सप्त रसातलानि कुर्वं
तु स॰॥ सप्तार्णवाः सप्तकुलाचलाश्च सप्तर्षयो द्वीपवराश्च सप्त॥ भूरादि कृत्वा
भुवनानि सप्त कुर्वं॰॥ इत्थं प्रभाते परमं पवित्रं पठेत्स्मरेद्वा शृणुयाच्च तद्वत्॥ दुःस्व- रामः
प्ननाशस्त्विह सुप्रभातं भवेच्च नित्यं भगवत्प्रसादात्॥ महाभारतमाख्यानं क्षितिं गां २
च सरस्वतीं॥ ब्राह्मणान्केशवं चैव कीर्त्तयन्नावसीदति॥ व्यासं विभीषणं भीष्मं यमं
रामं दमं बलिं॥ सप्तैतान्संस्मरेन्नित्यं दुःस्वप्नं तस्य नश्यति॥ पुण्यश्लोको नलो राजा
पुण्यश्लोको युधिष्ठिरः॥ पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्दनः॥ कर्कोट

कस्य नागस्य दमयंत्या नलस्य च॥ ऋतुपर्णस्य राजर्षेः कीर्त्तनं कलिनाशनं॥ अश्वत्था
मा बलिर्व्यासो हनूमांश्च विभीषणः॥ कृपः परशुरामश्च सप्तैते चिरजीविनः॥ सप्तै
तान्संस्मरेन्नित्यं मार्कंडेयमथाष्टमं॥ जीवेद्वर्षशतं सोपि सर्वव्याधिविवर्जितः॥
अहल्या द्रौपदी शीता तारा मंदोदरी तथा॥ पंचैताः संस्मरेन्नित्यमहन्नहान्यान
बाध्यत इत्यादि पठित्वा भूमिं प्रार्थयेत्॥ तत्र मंत्रः समुद्रवसने देवि पर्वतस्तन-
मंडिते॥ विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे इति॥ अथ मूत्ररीषोत्सर्गः॥॥
पाराशरः॥ ततः प्रातः समुत्थाय कुर्याद्विण्मूत्रमेव च॥ नैर्ऋत्यामिषुविक्षेपमतीत्या-
भ्यधिकं भुवं॥ अंतर्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससा॥ वाचं नियम्य यत्नेन-
ष्ठीवनोच्छ्वासवर्जितः॥ विण्मूत्रयोर्वाद्विः यमनं हारीतेनाप्युक्तं॥ उच्चारे मैथुने चै
व प्रस्रावे दंतधावने॥ स्नाने भोजनकाले च षट्सु मौनं समाचरेदिति॥ तथा॥ कृ
त्वा यज्ञोपवीतं तु पृष्ठतः कंठलंबितं॥ विण्मूत्रं तु गृही कुर्याद्यद्वा कर्णे समाहि

नरतिमृत्तिकोपि करो निधानवचनमेकवस्त्रविषयं॥ तदुक्तं शांखायनगृह्ये॥ यद्ये
वि० प० वावस्त्रो यज्ञोपवीतं कर्णे कृत्वा मूत्रपुरीषोत्सर्गं कुर्यादिति॥ कर्णो वा दक्षिणः॥ प
३ वित्रं दक्षिणे कर्णे कृत्वा विण्मूत्रमुत्सृजेदिति हारीतोक्तेः॥ ॥मनुः॥ मूत्रोच्चारसमुत्स स्त० ३
र्गं दिवा कुर्यादुदङ्मुखः॥ दक्षिणाभिमुखो रात्रौ संध्ययोश्च यथा दिवेति॥ यदपि
मनुनैव॥ छायायामंधकारे वा रात्रावहनि वा द्विजः॥ यथासुखमुखः कुर्यात्प्राणबा
धाभयेषु चेत्युक्तं तदपि रात्रावहनि वा नीहाराद्यंधकारजनितदिङ्मोहविषयं ज्ञेयं॥
शंखः॥ मूत्रं पुरीषं नो कुर्यात्सोपानत्कः कथंचन॥ उत्सृज्य मूत्रकूले कुर्यात्त्रिस्त्रांवं राम:
मेहनं द्विजः॥ तथा॥ तर्जनीं रोपयेत्स्यक्तां ब्रह्मग्रंथियुतां शिखां॥ भोजने मैथुने ३
मूत्रे कुर्वन्कृच्छ्रेण शुध्यतीति तत्र हि॥ अत्र वर्ज्यदेशानाह मनुः॥ न मूत्रं पथि कु
र्वीत न भस्मनि न गोव्रजे॥ न फालकृष्टे न जले न चित्यां न च पर्वते॥ न जीर्णदेवा
यतने न वल्मीके न शाद्वले॥ न ससत्त्वेषु गर्तेषु न गच्छन्नापि स्थितः॥ न नदी

तीरमासाद्य न च पर्वतमस्तके॥ वाय्वग्निविप्रमादित्यमपः पश्यंस्तथैव गां॥ न कदाच
न कुर्वीत विण्मूत्रस्य विसर्जनमिति॥ न चादौ विशेषः स्मृत्यंतरे॥ दशहस्तं परि
त्यज्य मूत्रं कुर्याज्जलाशये॥ शतहस्तं पुरीषं च तीर्थे नद्यां चतुर्गुणमिति॥ ततोप
हृत्य वा विण्मूत्रं काष्ठलोष्ठतृणादिना॥ इति परिमृष्टगुदलिंगो गृहीतशिश्नश्चोत्ति
ष्ठेत्॥ इति विण्मूत्रोत्सर्गविधिः॥ ॥अथ शौचं॥ दक्षः॥ शौचे यत्नः सदा कार्यः
शौचमूलो द्विजोत्तमः॥ शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः॥ तत्र दे
वतागृहवल्मीकमूषकोत्करादिमृद्भिन्नां मृदमुद्धृत्योदकं चादाय वा गत्वा उदङ्मु
खो दिवा शौचं कुर्यात्॥ रात्रौ च दक्षिणामुखः॥ तद्वदुदपात्रं मलमूत्रोत्सर्जनसमये
हस्तेन धार्यं॥ गौतमः॥ करस्थोदकपात्रस्तु विण्मूत्रं कुरुते यदि॥ तज्जलं मूत्रसदृ
शं सुरापानेन तत्समं॥ इति॥ मृत्संख्यादिकमाह शौनकः॥ एकां तु मृत्तिकां लिंगे ति
स्रः सव्यके स्मृताः॥ करद्वये मृद्द्वयं स्यान्मृदस्तु मात्रामथोच्यते॥ आर्द्रामलकमात्रा

चमत्र शौचं तु मृत्तिका॥ मूत्रात्तु द्विगुणं शुक्रे मैथुने त्रिगुणं भवेत्॥ लिंगशौचमिदं
वि०प० प्रोक्तं गुदशौचमथोच्यते॥ पंचापाने मृदः देयाः करे वामे दश स्मृताः॥ उभयोः सप्त दात स्त०
१ व्याः पुरीषे विसृष्टमात्रके॥ अर्द्धप्रसृतिमात्रं स्यात्तदर्धं तु ततः परं॥ गुदशौचमिति प्रो २
क्तं पादशौचमथोच्यते॥ एकैकं पादयोर्दद्याद्धस्तयोर्लिंगशौचवत्॥ एतच्छौचं
गृहस्थानां द्विगुणं ब्रह्मचारिणां॥ त्रिगुणं स्याद्वनस्थानां यतीनां च चतुर्गुणं॥
यद्दिवा विहितं शौचं तदर्द्धं निशि कीर्त्तितं॥ तदर्द्धमातुरे प्रोक्तमातुरस्यार्द्धमध्वनि॥
स्त्रीशूद्रयोरर्द्धमानं शौचं प्रोक्तं मनीषिभिः॥ स्त्रीशूद्रादेरशक्तानां बालानां चोप रा०मः
नीतिनां॥ गंधलेपक्षयकरं शौचं कुर्यान्न संख्ययेति॥ याज्ञवल्क्योपि॥ गृहीत १
शिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः॥ गंधलेपक्षयकरं शौचं कुर्यादतंद्रितः॥
अत्र गंधलेपक्षयकरं शौचं सर्ववर्णाश्रमिणां साधारणं॥ मृत्संख्यानियम
स्त्वदृष्टार्थ इति विज्ञानेश्वरः॥ लिंगशौचं पुरा कार्यं गुदशौचं ततः स्मृतमिति व

चनात् लिंगशौचानंतरं गुदशौचं द्रष्टव्यं॥ गंगातोयेन कृत्स्नेन मृद्भारैश्च नगोपमैः॥
आमृत्योराचरन् शौचं भावदुष्टो न शुध्यतीति स्मृतेर्भावशुद्धिरपेक्षिता॥ अत्रो
क्तसंख्यानियमातिक्रमे प्रायश्चित्तमुक्तं स्मृतिरत्नावल्यां॥ गायत्र्यष्टशतं चै
व प्राणायामत्रयं तथा॥ प्रायश्चित्तमिदं प्रोक्तं नियमातिक्रमे सतीति॥ क्वचिद्धि
स्मृतिस्मरणमेवोक्तं॥ अनुदकमूत्रकरणे सचैलस्नानं व्याहृतिहोमश्चेति प्राय
श्चित्तद्वयमपि प्रयोगपारिजाते उक्तं॥ ततआचमनात् प्राक् वामभागे गंडूषान्
क्षिपेत्॥ तदुक्तमाचारदीपे॥ मूत्रे पुरीषे भुक्त्यंते रेतःप्रस्रवणे तथा॥ चतुरष्ट
द्विषड्द्वादश गंडूषैः शुद्ध्यते क्रमात्॥ पुरतः सर्वदेवाश्च दक्षिणे पितरस्तथा॥
ऋषयः पृष्ठतः सर्वे वामे गंडूषमुत्सृजेदिति॥ इति शौचविधिः॥ ॥अथाचमन
विधिः॥ योगीश्वरः॥ अंतर्जानु शुचौ देशे उपविष्ट उदङ्मुखः॥ प्राग्वा ब्राह्मेण ती
र्थेन द्विजो नित्यमुपस्पृशेत्॥ कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रं करस्य च॥ प्रजापति

पितृब्रह्मदेवतीर्थान्यनुक्रमात्॥ करमध्ये त्वग्नितीर्थं॥ तेन च प्रतिग्रहं कुर्यात्॥ दक्षि
वि० प० णहस्तमध्ये ब्राह्मणस्याग्नेयं तीर्थमाग्नेयेन प्रतिगृह्णीयादिति वसिष्ठोक्तेः॥ सं स्त्न०
५ हतांगुलिना तोयं गृहीत्वा दक्षिणेन तु॥ मुक्तांगुष्ठकनिष्ठे तु शेषेणाचमनं चरेत्॥ ३
अत्रैवमितिकर्त्तव्यता॥ आसने प्राङ्मुख उदङ्मुखो वोपविश्य प्रकृतिस्थं फेन
बुद्बुदरहितमनुष्णमुदकं संहतांगुलिना दक्षकरेण दायांगुष्ठकनिष्ठिके मुक्त्वा
शेषैर्वीक्षितं ब्रह्मतीर्थेन प्राजापत्येन दैवेन वा त्रिश्चतुर्वापि पिवेत्॥ न येत्रेण॥ त
तः त्रिः प्राश्यापो द्विरुन्मृज्य मुखमेतान्युपस्पृशेदित्यादिवचनात्पीत्वा हस्तौ रामः
प्रक्षाल्यौष्ठावंतः संकोच्य संहतांगुष्ठमूलेनालोमकेन मुखं द्विः प्रमृज्य ततो ५
हस्तौ प्रक्षाल्य संहतांगुलिभिर्मुखं सकृदुन्मृज्य हस्तौ प्रक्षाल्य पादौ शिरश्चा
भ्युक्ष्य वा॥ ततः संहताभिस्तिसृभिरंगुलिभिरास्यमलोमकप्रदेशे स्पृष्ट्वा ह
स्तौ प्रक्षाल्यांगुष्ठप्रदेशिनीभ्यां घ्राणं स्पृष्ट्वांगुष्ठानामिकाभ्यां चक्षुषी श्रोत्रे च

स्पृशेत्॥ अंगुष्ठकनिष्ठिकाभ्यां नाभिं॥ तलेन हृदयं॥ सर्वांगुलीभिः शिरः॥ सर्वां
गुलीभिर्बाहुमूले स्पृशेत्॥ सर्वत्र मध्ये मध्ये हस्ताभ्यामपः स्पृशेत्॥ इदं मुख्या
चमं॥ अत्राशक्तौ तु त्रिः पीत्वा हस्तौ प्रक्षाल्य मुखं सकृन्मृज्य खान्युपस्पृशेत्॥ अत्यश
क्तौ त्रिः पीत्वा द्वा हस्तौ प्रक्षाल्य श्रोत्रं स्पृशेत्॥ अथ पौराणाचमनं॥ संग्रहे॥ केश
वाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत्करौ॥ द्वाभ्यामोष्ठौ च संमृज्य द्वाभ्यामुन्मार्जयेत्ततः
॥ तथा एकेन मूर्धानं ततः संकर्षणादिभिः॥ ऊर्ध्वोष्ठे नासाक्षिकर्णान्नाभ्युरःस्कंधका
न्स्पृशेत्॥ एवमाचमनं कृत्वा साक्षान्नारायणो भवेदिति॥ आचमनधर्माः॥ अत्रिः॥ ता
म्रपात्रस्थिते वापि तथा तोयात्राय स्थितैः कुर्वीताचमनं विप्रस्ततः खानि समालभ
वेत्॥ तदलाभे तु कुर्वीत पाणिना चोदकेन च॥ तथा॥ तावन्नोपस्पृशेद्विप्रो यावद्वामेन
तं स्पृशेत्॥ वामे द्विद्वा दृष्ट्वा दिया वरुणा ह्रिदशेश्वरः॥ वसंति सर्वदा यस्मात्तस्माद्वा
मेन संस्पृशेत्॥ मत्स्यपुराणे तु नाचामेच्चैकपाणिना हस्तेनैरपि॥ तथैवाव्रतहस्तेन नाप

वि॰प॰ रिज्ञातहस्ततः॥ अव्रतोऽनुपनीतः॥ स्नानमाचमनं होमं भोजनं देवतार्चनं॥ प्रौढपादो
६ न कुर्वीत स्वाध्यायं पितृतर्पणं॥ आसनारूढपादस्तु जान्वोर्वा कुर्वीत जंघयोस्तथा॥ स्म॰
कृतावसक्थिको यश्च प्रौढपादः स उच्यते॥ इति हारीतः॥ मनुः॥ कांस्येनायसपात्रेण ३
त्रपुसीसकपित्तलैः॥ आचांतः शतकृत्वोपि न कदाचन शुध्यति॥ आर्द्रवासा जलांत
स्थः शुष्कवस्त्रो बहिःस्थितः॥ आचामेद्विपरीतश्चेदशुचित्वमवाप्नुयात्॥ पादशौचं
पीतशेषं शौचशेषं च यज्जलं॥ तज्जलं रुधिरैस्तुल्यं पर्यग्निकरणं विना॥ पर्यग्निक
रणमप्यस्य नैव दृष्टं॥ उदकपरिमाणमाह योगीश्वरः॥ हृत्कंठतालुगाभिस्तु यथासं राम:
ख्यं द्विजातयः॥ शुध्येरन् स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरंततः॥ अंततः अंतेन तालुना ६
स्पृष्टाभिरित्यर्थः॥ अथ श्रौताचमनं॥ पराशरः॥ देव्याः पादैस्त्रिभिः पीत्वा अब्लिंगैर्न
वयास्पृशात्॥ पुनर्व्याहृतिगायत्र्याशिरोमंत्रैर्द्विधा स्पृशेन्नर इति॥ अब्लिंगैरापोहि
ष्ठेत्यादिभिस्त्रिभिः प्रतिपादैः॥ यः करोति प्रयत्नेन श्रौतमाचमनं द्विजः॥ अशुद्धोसापि

पापिष्ठः संदत्तोनात्र संज्ञायात इति॥ प्रकाशांतरेणापि॥ आश्वलायनः॥ दक्षिणाउपवीयो
पविश्य हस्तौ अवनिज्य त्रिराचामेत् द्विः परिमृज्य सकृदुपस्पृश्य यच्छिरश्चक्षुषी नासि
के श्रोत्रे हृदयमालभ्यपयस्यपाणिपादं प्रोक्षति॥ यच्छिरश्चक्षुषी नासिके श्रोत्रे हृ
दयमालभते तेनार्प्यंतिरसो ब्राह्मणानीतिहासान्पुराणानि गाथानाराशंसीः
प्रीणातीति॥ संध्यादौ ब्रह्मयज्ञे च होमे देवार्चने तथा॥ श्रौतमेव द्विजैः कार्यमिति
बोधायनोब्रवीत्॥ पौराणमथवा स्मार्त्तं श्रौतमाचमनं तथा॥ तत्तत्कर्मणि कुर्वी
त यच्चेष्टं वा विधीयते॥ ॥अथाचमननिमित्तानि॥ हारीतः॥ स्त्रीशूद्रोच्छिष्टाभिभा
षणे मूत्रपुरीषोत्सर्गदर्शने देवतामभिगंतुकाम आचामेत्॥ यमः॥ उत्तीर्योदकमा
चामेदवतीर्य तथैव चेति॥ बृहस्पतिः॥ अधोवायुसमुत्सर्गे आक्रंदे क्रोधसंभवे
॥मार्जारमूषकस्पर्शे प्रहासेनृतभाषणे॥ निमित्तेष्वेषु सर्वेषु कर्म कुर्वन्नुपस्पृशे
त्॥ आपस्तंबेपि॥ विप्रो विप्रेण संस्पृष्ट उच्छिष्टेन कदाचन आचम्यैव तु शुद्धः॥

वि० प०
८

स्यादायस्तं वोऽब्रवीन्मुनिः॥ मनुः॥ उच्छिष्टेन च संस्पृष्टो द्रव्यहस्तः कथंचन॥ अनिधायैव तद्
द्रव्यमाचांतः शुचितामियात्॥ आचामेच्च वर्णे नित्यं मुक्त्वा नीरसचर्वणं॥ ॐष्ठेविलोमा- स्मृ० ३
कौ स्पृष्ट्वा वासो विपरिधाय चेति॥ ॥अथ द्विराचमननिमित्तानि॥ ॥याज्ञवल्क्यः॥ स्ना-
त्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे॥ आचांतः पुनराचामेद्वासो विपरिधाय च॥
आचारदीपे यमः॥ भोजने हवने दाने उच्चारे च प्रतिग्रहे॥ संध्यात्रयांबुपानेषु पूर्वं प-
श्चाद्द्विराचमेत्॥ उदकाभावे सोमध्येये च दक्षिणं कर्णं स्पृशेत्॥ तदाह बृहस्पतिः॥ मिमि-
त्ते चेसु सर्वेषु दक्षिणं श्रवणं स्पृशेत्॥ आदित्या वसवो रुद्रा वायुरग्निश्च धर्मराट्॥ वि- राम:
प्रस्य दक्षिणे कर्णे नित्यं तिष्ठंति देवता इति॥ आचमनप्रसंगात्सपवित्राचमने विशे- ८
षः कथ्यते॥ मार्कंडेयः॥ सपवित्रेण हस्तेन कुर्यादाचमनक्रियां॥ नोच्छिष्टं तत्पवित्रं
तु भुक्तोच्छिष्टं तु वर्जयेत्॥ सपवित्रत्वं दक्षिणहस्तस्य ज्ञेयं॥ सव्ये तु त्रिप्रभृति-
कुशा धार्याः॥ तथाह कात्यायनः॥ सव्ये पाणौ कुशान्कृत्वा दक्षिणे सपवित्रकः॥

इति गोभिलः॥ उभयत्र स्थितैर्दर्भैः समाचमति यो द्विजः॥ सोमपानफलं तस्य भुक्त्वा
यज्ञफलं लभेदिति॥ हारीतो विशेषमाह॥ सव्यापसव्यौ कुर्वीत सपवित्रौ करौ बुधः
॥ ग्रंथिर्यस्य पवित्रस्य न तेनाचमनं चरेदिति॥ तथा॥ प्रथमं लंघयेत्सर्वं द्वितीयं तु न
लंघयेत्॥ द्वयोस्तु पर्वणोर्मध्ये पवित्रं धारयेद्बुधः॥ तल्लक्षणमाह कात्यायनः॥ अनं-
तर्गर्भिणं साग्रं कौशं द्विदलमेव च॥ प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्॥ हारी-
तः॥ स्नाने दाने जपे होमे स्वाध्याये पितृतर्पणे॥ अशून्यं तु करं कुर्यात्सुवर्णरज-
तैः कुशैः॥ चंद्रिकायां यमः॥ करे कटे शिखायां च कर्णयोरुभयोरपि॥ पवित्रधार-
कोयश्च न स पापेन लिप्यत इति॥ अनंतर्गर्भिणमित्युक्तपवित्रासंभवे मनुः॥ द्वौ-
दर्भौ दक्षिणे हस्ते सव्ये त्रीन्नासने सकृत्॥ उपनीते शिखायां च पादयोस्तु सकृ-
त्सकृत्॥ इति॥ अत्र प्रसंगात्कुशग्रहणविधिः॥ अष्टयाविमित्तेःस्यात्हो द्वितीये-
भागे शुचिर्भूत्वा पूर्वोत्तरामुखः॥ ओंकारेण कुशान्स्पृष्ट्वा॥ विरिंचिना सहोत्प

वि० ध० ८ न्त्राः परमेष्ठीनि सर्गजिः॥ नुदस्व वीरिण पापानि ममस्तिकरा मवेति मंत्रमुक्त्वा दर्भानिस्स स्त० ३

कृत्विता समुद्धरेत्॥ दर्भान्निस्त्वयामाहरेत॥ संग्रहे॥ समित्पुष्पकुशादीनि श्रोत्रियः

स्वयमाहरेत्॥ शूद्रोहृतैः क्रयक्रीतैः कर्म कुर्वन्व्रजत्यधः॥ अत्र विशेषमाह का

ज्यास्त त्यायनः॥ मासे नभस्यमावास्यां दर्भोच्चयो मतः॥ अयातयामास्ते दर्भा नियोज्याः

स्यु पुनः पुनः॥ शंखः॥ दर्भाः कृष्णाजिनं मंत्रा ब्राह्मणा गोहुताशनः अयातयामास्ते

दर्भा नियोज्याः स्यु पुनः पुनः॥ शंखः दर्भाः कृष्णाजिनं मंत्रा ब्राह्मणा गोहुताशन॥ अ

यातयामान्येतानि नियोज्यानि पुनः पुनः॥ वर्ज्यमाह हारीतः॥ पथिदर्भाश्चितौ दर्भा रामः

ये दर्भा यज्ञभूमिषु॥ संस्तरासनपिंडेषु षट्कुशान्परिवर्जयेत्॥ ब्रह्मयज्ञे ८

च ये दर्भा ये दर्भाः पितृतर्पणे॥ हतामूत्रपुरीषाभ्यां तेषां त्यागो विधीयते॥ पिं

डार्थं ये कृता दर्भा यैः कृतं पितृतर्पणं॥ मूत्रोच्छिष्टे हता ये च तेषां त्यागो विधीय

ते॥ सुमंतुः॥ कुशाः काशास्तथोशीरा यवा दूर्वाश्च बल्वजाः॥ गोबालमुंजौ कुंदाश्च

प्रांग्मुखस्य धृतिः सौख्यं शरीरारोग्यमेव च॥ दक्षिणेन तथा कृच्छ्रं पश्चिमेन पराजयः॥

पूर्वाभावे वरः वरः॥ संग्रहे पवित्रलक्षणमाह प्रचेताः॥ द्विमूलमेकतः कुर्याद्द्वियोरग्रेनच्छे

कतः॥ वलयं द्व्यंगुलं प्रोक्तं ग्रंथिरेकांगुलामवेत्॥ चतुरंगुलमग्रे स्यात्पवित्रस्येति लक्ष

णं॥ चक्रायुधं यथा विष्णोर्हरस्यापि त्रिशूलकं॥ ब्राह्मणस्य पवित्रं च स्याद्दैवं विप्रक

रे कुशा इति॥ इत्याचमनविधिः॥ ॥ अथ दंतधावनं॥ दक्षः॥ मुखे पर्युषिते नित्यं भवत्य

प्रयतो नरः॥ तदार्द्रकाष्ठं शुष्कं वा भक्षये दंतधावनं॥ विष्णुः॥ कंटकिक्षीरवृक्षोद्भवं

द्वादशांगुलमव्रणं॥ कनिष्ठिकाग्रवत्स्थूलं पर्वार्द्धकृतकूर्चकं॥ जंबूदुंबरचूताम्र

कदंबो लोध्रचंपकौ॥ बदरीति द्रुमा ये च ~~यैः अंकिता दर्भाः यैः कृतं पितृतर्पणं॥~~

~~अमेध्याशुचिलिप्ता ये तेषां त्यागो विधीयते॥~~ ये ते प्रोक्ता दंतधावने॥ अत्र विशे

षमाह शातातपः॥ उदुंबरेण वाक्सिद्धिर्बदर्या मधुरस्वरः॥ कदंबेन महालक्ष्मीराम्र

णारोग्यमेव च॥ अपामार्गाद्धिरोगत्वं स्त्रीवश्यं च प्रियंगुभिः॥ अपामार्गे रिपोर्ज

यः॥ गर्गः॥ द्वादशांगुलं तु विप्राणां क्षत्रियाणां नवांगुलं॥ अष्टांगुलं तु वैश्यानां शूद्रा

उत्तरेण गवां नाशः स्त्रीणां परिजनस्य च॥ कात्यायनः॥ पूर्वोत्तरे तु दिग्भागे सन्नानामान

ः तु यात्॥ गारुडे॥ उदङ्मुखः प्राङ्मुखो वा मसये दंतधावनं॥

[illegible]

णास्यतंमितं॥चतुरंगुलमानेननारीणांविधिरुच्यते॥आश्वलायनेस्कां॥वितस्तिमात्रमु
द्दिष्टंदंतकाष्ठंद्विजन्मनां॥स्त्रीशूद्रयोस्तदर्धस्यान्नातिशुष्केनजंतुदिति॥तथापरि
मालोविकल्प्यः॥काष्ठग्रहणमंत्रस्तु॥आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच॥ब्रह्म
प्रज्ञांचमेधांचत्वंनोदेहिवनस्पतइतिविज्ञेयुक्तः॥भक्षणमंत्रस्तु॥अन्नाद्यायव्यू
हध्वंसोमोराजायमागमत्॥समेमुखंप्रमार्क्ष्यतेयशसाचभगेनच॥इतिकात्या
यनोक्तः॥ततस्तेनकाष्ठेनजिह्वामुल्लिख्यकाष्ठंनैरृत्यांदिशियुत्सृजेत्॥अत्रवर्ज्यको
शादि॥मार्कंडेयः॥कोविदारशमीतालश्लेष्मातकविभीतकान्॥वर्जयेद्दंतकाष्ठे
चगुग्गुलंक्रमुकंतथा॥स्मृत्यर्थसारे॥आसनेशयनेयानेपादुकेदंतधावने॥
पालाशाश्वत्थकौवर्ज्यौसर्वकुसीतकर्मसु॥अलाभेदंतकाष्ठानांनिषिद्धायांति
थौतथा॥अपांद्वादशगंडूषैर्विदध्यादंतधावनं॥यद्वात्तृणपर्णोदकेनमध्यमा
नामिकांगुष्ठानामन्यतमेनदंतान्धावयेत्॥अथनिषिद्धतिथयः॥चतुर्दश्यष्टमी

दर्शपूर्णिमासंक्रमेषुच॥नंदासुचनवम्यांचदंतकाष्ठंविवर्जयेत्॥उत्पत्तौचविपत्तौच
मैथुनेदंतधावनं॥अभ्यंगेषुदधिस्नानेनिषिद्धास्ताःकालिकीस्मृतेति॥तथा॥श्राद्धय
ज्ञेचविषमेतथाप्रोषितभर्तृका॥रजस्वलासूतिकाचवर्जयेद्दंतधावनं॥अत्रापवा
दः॥संग्रहे॥रजस्वलाचतुर्थेह्निसूतिकादशमेहनि॥मरीचिः॥नाद्यादजीर्णविम
थुश्वासकासज्वरादिभिः॥पुरोदयाद्वेवस्त्वथान्नोदिमेस्तमितेरवौ॥तीर्थप्राप्तौ
वचनादन्यदापिभवति॥यमः॥श्राद्धेजन्मदिनेचैवविवाहेजीर्णदूषिते॥व्रतेचै
वोपवासेच॥वर्जयेद्दंतधावनं॥इतिदंतधावनविधिः॥॥अथकेशप्रसाधना
दिमांगल्यविधिः॥स्कांदे॥स्नानकृत्वततःकुर्यात्सुमान्केशप्रसाधनं॥आदर्शां
जनमांगल्यंदूर्वाद्यालंभनानिच॥ब्राह्मेपि॥स्वमात्मानंघृतेपश्येद्यदीच्छेच्चिरजी
वितां॥प्रातःस्नानंततःकुर्यात्सिद्धेपलायथोदितं॥संध्यावापितथाकुर्याद्दंगमु
ख्यपल्लवइति॥॥अथयज्ञोपवीतविधिः॥तत्रउपवीतंसदाधार्यमितिकात्या

वि०प०
१०

यनः॥ मनुरपि॥ सदोपवीतिना भाव्यं सदा बद्धशिखेन च॥ विशिखो व्युपवीतश्च य
त्करोति न तत्कृतं॥ मनुः॥ त्रिवृदूर्ध्ववृतं कार्यं तंतुत्रयमधोवृतं॥ त्रिवृतं चोपवी सं० ३
तं स्यात्तस्यैको ग्रंथिरिष्यते॥ ऊर्ध्ववृतं दक्षिणावर्तं करमूर्ध्वं कृत्वा वलितमित्यर्थः॥ वि
सिष्ठः॥ नाभेरूर्ध्वमनायुष्यमधो नाभेस्तपःक्षयः॥ तस्मान्नाभिसमं कुर्यादुप
वीतं विचक्षणः इति॥ कात्यायनस्तु॥ पृष्ठवंशे च नाभ्यां च धृतं यद्विंदते कटिं॥ त
द्धार्यमुपवीतं स्यान्नातिलंबं न चोच्छ्रितमिति॥ अत्र विशेषमाह स एव॥ कार्पासमु
पवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत्॥ शणसूत्रमयं राज्ञो वैश्यस्याविकमुच्यत इति॥ रामः
उक्ताभावे देवलः॥ कार्पासक्षौमगोवालशणवल्कतृणादिकं॥ सदा संभवतो १०
धार्यमुपवीतं द्विजातिभिरिति॥ क्षुमा अतसी वल्कलं वृक्षत्वक्॥ तज्जन्यमित्य
र्थः॥ असंभवत इति तासिल्वस्य प्रम्यादेशः॥ मुख्यासंभव इत्यर्थः॥ लक्षणप्र
कारस्तु॥ शुचौ देशे शुचिः सूत्रं संहतांगुलिमूलके॥ आवेष्ट्य षण्णवत्या तत्त्रि

गुणीकृत्य यत्नतः स्याद्विनोक्तः॥ आचारप्रदीपे॥ यज्ञोपवीतं कुरुते सूत्रेण नवतांतवमि
ति॥ तंतुदेवतास्तु॥ ॐकारश्चाग्निर्नागाश्च सोमः पितृप्रजापती॥ वायुः सूर्यः सर्वदे
वाश्चैता हि तंतुदेवताः॥ मनुः॥ यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि॥ वस्त्राभा
वे तृतीयं स्यादेकं च प्रथमाश्रमी॥ तथा॥ उपवीतं टोरकं द्वे तथैवोत्तरयोः स्मृते॥
इति॥ स्मृत्यंतरेपि॥ ब्रह्मचारिणामेकं तु स्नानप्रभृति तद्द्वयं तृतीयं चोत्तरीयं
स्याद्वस्त्राभावे तृतीयकं॥ वस्त्राभावे तृतीयकमिति पुनर्वचनं तु॥ उपात्ते तु प्रति
निधौ मुख्यार्थोपलभ्यते यदि॥ तत्र मुख्यमनादृत्य गौणेनैव समापनं इति न्याय
स्य बाधार्थं। तथा चोत्तरीयाभावदशायामेव तस्यानुकल्पत्वं तद्दशमे तु पूर्ववि
लं यज्ञोपवीतमेवैतेनोत्तरीयमपि तदा धार्यमेव साशयः॥ तथा॥ धारयेत्त्रिय
मेतानि नवतंतूनि चेद्द्विजः॥ तत्परिधानं यज्ञोपवीतं परममिति मंत्रेण कार्यं॥ अ
त्र पूर्वं पश्चाच्चाचमनं॥ ॐ मेवकर्णे स्नाने गात्राभ्यां गेतयैव च॥ ब्रह्मसूत्रे पदकु

वि०प० ११ यद्यन्यथा नरकं व्रजेदिति स्मृतेः॥ उक्तादन्यत्र कदापि नोत्तारयेत्॥ यद्युत्तार
येत्तदा मंत्रपूर्वकमन्यत्परिदध्यात्॥ मंत्रन्यस्तोपवीतं यत्नोद्धरेत्तु कदाचन॥ मोहा स्मृ० ३
द्विजस्तदुद्धृत्य पुनर्मंत्रेण धारयेत् इति गालवोक्तेः॥ एवमन्यधृतमपि न दध्यात् त
दुक्तं संग्रहे॥ उपानहौ च वासश्च धृतमन्यैर्न धारयेत्॥ उपवीतमलंकारं स्रजं क
रकमेव चेति॥ मेखलामजिनं दंडमुपवीतं कमंडलुं॥ अप्सु प्रास्य विनष्टानि गृह्णी
तान्यानि मंत्रत इति॥ तथा देवलः॥ सावित्र्या दशकृत्वोऽद्भिर्मंत्रिताभिस्तदुक्षयेत्॥
विच्छिन्नं चाप्यधो यातं भुक्त्वा निर्मितमुत्सृजेत्॥ इति तत्प्रतिपत्तिः॥ इति यज्ञोपवी राम: ११
तविधिः॥ ॥ अथ शिखाबंधः॥ व्यासः॥ सप्तोंकारं च गायत्रीं निबद्धीयाच्छिखां
ततः॥ पुनराचम्य हृदयं बाहू स्कंधौ च संस्पृशेत्॥ तच्च बंधनं शिरसो दक्षिण
भागे कार्यं॥ गायत्र्या तु शिखां बध्वा नैर्ऋत्यां ब्रह्मरंध्रतः॥ पश्चा[illegible]कुंतु जटिकां ब
ध्वा ततः कर्म समाचरेदिति॥ अथ प्राणायामः॥ बृहस्पतिः॥ बध्वासनं निय

म्य संस्मरन् वा पार्श्वादिकं ततः॥ सम्मीलितदृङ्मौनी प्राणायामं समभ्यसेत्॥ प्रण
वव्याहृतियुतां सावित्रीं शिरसा सह॥ त्रिर्जपेदायतप्राणः प्राणायामः स उच्यते
॥ याज्ञवल्क्यः॥ कुंभकः पूरको रेचः प्राणायामस्त्रिलक्षणः॥ पूरकः पूरणं
वायोः कुंभकः स्थापनं क्वचित्॥ बहिर्निःसरणं तस्य रेचकः परिकीर्तितः॥ दक्षि
णे रेचयेद्वायुं वामेनापूरितोदरः॥ कुंभेन धारयेन्नित्यं प्राणायामं विदुर्बुधाः॥
अंगुष्ठेन पुटं ग्राह्यं नासाया दक्षिणं पुनः॥ कनिष्ठानामिकाभ्यां च वामं प्राणस्य
संग्रहे॥ अंगुष्ठतर्जनीभ्यां तु ऋग्वेदी साम गायनः॥ अंगुष्ठानामिकाभ्यां तु ग्रा
ह्यः सर्वैरथर्वभिः॥ शंखोऽपि च विशेषमाह॥ दक्षिणे रेचकं कुर्याद्वामेनापूर्य
चोदरं॥ कुंभकेन जपं कार्यं प्राणायामस्य लक्षणमिति॥ सप्तव्याहृतयः प्रो
क्ताः प्राणायामे तु नित्यशः॥ भूर्भुवः स्वर्महर्जनस्तपः सत्यं तथैव च॥ प्रत्योंका
रसमायुक्तं तथा तत्सवितुः परं॥ ॐ आपो ज्योतिरित्येतच्छिरः पश्चात् प्रयोजयेत्॥

वि०प० १२ त्रिरावर्त्तनयोगात्तु प्राणायामस्तु शब्दितः॥ अत्र विशेषः स्मृत्यंतरे॥ ॐकारस्य ऋषि स्मृ०
र्ब्रह्मादेवो निस्तस्य कथ्यते॥ गायत्री च भवेच्छंदो नियोगः सर्वकर्मसु॥ त्रिमात्रस्तु प्रयो ३
क्तव्य आरंभे सर्वकर्मणां॥ व्याहृतीनां तु सर्वासामार्षं चैव प्रजापतेः॥ गायत्र्युष्णिग
नुष्टुप् बृहती त्रिष्टुबेव च॥ पङ्क्तिश्छि अजगती चैव छंदांस्येतानि सप्त वै॥ अ
ग्निर्वायुस्तथा सूर्यो बृहस्पतिरपांपतिः॥ इंद्रश्च विश्वेदेवाश्च देवताः समुदाहृताः॥ प्रा
णायामे नैव विनियोग उदाहृतः॥ सविता देवता यस्या मुखमग्निस्त्रयात्मकं॥
विश्वामित्र ऋषिश्छंदो गायत्री सा विशिष्यते॥ जपहोमोपनयने विनियोगो विधीयते॥ राम:
ॐ आपो ज्योतिरित्येव मंत्रो वै तैत्तिरीयके॥ तस्य प्रजापतेरार्षं छंदो हीनं यजुर्यतः १२
ब्रह्माग्निवायुसूर्याश्च देवताः समुदाहृताः॥ प्राणायामे नैव विनियोगः॥ प्र
कीर्तित इति॥ व्यासः॥ नित्यं देवार्चने होमे संध्यायां श्राद्धकर्मणि॥ स्नाने दाने तथा
ध्याने प्राणायामस्त्रयस्त्रयः॥ आचारप्रदीपे॥ द्वौ द्वौ प्रातश्च मध्याह्ने त्रिस्त्रिः।

संध्यात्रये तु चैनो वैश्वदेवे भोजनांते प्राणायामास्तु षोडश॥ तथैकमाह याज्ञवल्क्यः॥
यदह्ना कुरुते पापं मनसा कर्मणा गिरा॥ त्रिकालसंध्याकरणात् प्राणायामैर्व्यपो
हति॥ मनुः॥ दह्यंते ध्मायमानानां धातूनां हि यथा मलाः॥ तथेंद्रियाणां दह्यंते दो
षाः प्राणस्य संयमादिति॥ प्राणायामविधिः॥ ॥ अथ प्रातःस्नानं॥ योगयाज्ञवल्क्यः
॥ प्रातर्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः॥ यतेस्त्रिषवणं प्रोक्तं सकृच्च ब्रह्मचा
रिणः॥ ब्रह्मचारिणः सकृत्स्नानं शक्तविषयं॥ स्नायात्तु प्रातश्च मध्याह्ने ब्रह्मचारी
तथा॥ गृहीविद्वद्भूतोक्तेः॥ मार्कंडेयः॥ अस्नातस्य क्रियाः सर्वा भवंतीहाफलाय ते॥ प्रा
तः समाचरेत्स्नानं तच्च नित्यमिति स्मृतं॥ प्रातःस्नानगुणानुक्ताः स्कांदे॥ गुणा दश।
स्नानपरस्य नित्यं रूपं च तेजश्च बलं च शौचं॥ आयुष्यमारोग्यमलोलुपत्वं दुःस्व
प्ननाशश्च तपश्च मेधा इति॥ दक्षः॥ अत्यंतमलिनः कायो नवछिद्रसमन्वितः॥ स्र
वत्येव वा रात्रौ प्रातःस्नानं विशोधनं॥ अशक्तस्य तु॥ स्मार्तः प्रातरस्नायी द्विजः॥ अ

क्तमाप्नुयात्॥ तस्माच्छूद्रत्वमुक्त्यर्थं रविवारे समाचरेत्॥ कात्यायनः॥ यथाहनि
वि०प० तथा प्रातर्नित्यं स्नायादनातुरः॥ दंतान्प्रक्षाल्य नद्यादौ गेहे चेत्तदमंत्रवत्॥ ना स्ना०
१२ त्र सर्वथा मंत्रनिषेधः॥ किंतु मंत्रबाहुल्यनिषेधः॥ गृहेऽपि च द्विजातीनां मंत्रवत्स्ना ३
नमिष्यते॥ विधिलोपं न ते कुर्युः॥ सामर्थ्ये सति कर्हिचिदिति जैमिनिस्मृते॥ ॥
अल्पत्वाद्धोमकालस्य बहुत्वात्स्नानकर्मणः॥ ॥ प्रातर्न तनुयात्स्नानं हो
मलोपो विगर्हित इति॥ ०॥ कात्यायनोक्तिलिंगाच्चावसिष्टः॥ प्रातः संक्षेपतः स्ना
नं शौचार्थं तु तदिष्यते॥ मंत्रैस्तु विधिनिष्पाद्यं संध्याकृत्यं सविस्तरं॥ अत्र प्रातः रामः
शब्देनोदयात्प्राङ्नाडीत्रयं तस्मिन्नरुणोदये॥ अरुणकिरणग्रस्तां प्राचीमवलो १२
क्य स्नायादिति बोधायनोक्तेः॥ व्यासः॥ स्नानं तु द्विविधं प्रोक्तं॥ मुख्यगौणप्रभेद
तः॥ तयोस्तु वारुणं मुख्यं तत्पुनः षड्विधं भवेत्॥ जलनिष्ठं चैव वारुणं॥ नित्यं नै
मित्तिकं काम्यं क्रियांगं मलकर्षणं॥ क्रियास्नानं तथा षष्ठं षोढा स्नानं प्रकीर्तितं॥

तत्र प्रातःस्नानं नित्यं॥ प्रातः समाचरेत्स्नानं तच्च नित्यमिति स्मृतम्॥ मार्कंडेयोक्तः॥ चं
डस्पर्शघरागादौ सूतकादौ च यत्स्नानं तन्नैमित्तिकं॥ मासवायसमार्जारिखरो
ष्ट्राश्वानसूकरान्॥ अमेध्यानि च संस्पृश्य सवासा जलमाविशेदित्यादि यदपि नैमित्त
कमेव॥ पुष्ययुजन्मनक्षत्रव्यतीपाते च वैधृतौ॥ अमायां च नदीस्नानं पुनात्यास
प्तमं कुलमित्याद्युक्तं स्नानं काम्यं॥ धर्मक्रियांकर्तुं यत्पूर्वं स्नानं तत्क्रियांगं मलापक
र्षणं नाम स्नानमभ्यंगपूर्वकं॥ मलापकर्षणायैव प्रवृत्तिस्तत्र नान्यथेत्याद्युक्तं
स्नानं काम्यं॥ धर्मक्रियांकर्तुं यत्पूर्वं स्नानं तत्क्रियांगं॥ मलापकर्षणं नाम स्नान
मभ्यांगपूर्वकं॥ मलापकर्षणायैव प्रवृत्तिस्तत्र नान्यथेत्याद्युक्तं मलापकर्षणं
स्नानं प्रसंगादभ्यंगे निषिद्धतिथयः॥ गर्गः॥ पंचदश्यां चतुर्दश्यामष्टम्यां रविसंक्र
मे॥ द्वादश्यां सप्तमीषष्ठ्योस्तैलस्पर्शं विवर्जयेत्॥ तथा॥ षष्ठ्यष्टमी पंचदशीप
क्षद्वयचतुर्दशी॥ अत्र संनिहितं पापं तैले मांसे क्षुरे भगे॥ अत्र यथाक्रमं दृष्टव्यं॥

वि०प० १४ पउच्चेतास्तु॥ सार्धं सामथर्वस्येति वारुणं मुखं॥ एवमापदीमानीयच॥ जाबालिरपि॥
असामर्थ्याच्छरीरस्य देशकालाद्यपेक्षया॥ मंत्रस्नानादितः सप्त केचिदिच्छंति सूरयः॥ स्ना० २
आपोहिष्ठादिभिर्मार्जनं मृदालंभश्च पार्थिवं॥ आग्नेयं भस्मना स्नानं वायव्यं रजसा ग
वां॥ अद्भिः सातपवर्षाभिः स्नानं तद्दिव्यमुच्यते॥ वारुणं चावगाहश्च मानसं विष्णु
चिंतनं॥ स्वशिरस्कावगाहाशक्तौ जाबालिः॥ अशिरस्कं भवेत्स्नानं स्नानाशक्तौ तु कर्
मिणां॥ आर्द्रेण वाससा वापि मार्जनं कापिलं विदुः॥ न्यचाभिमंत्रितैस्तोयैः प्राक्षय
मृत्पिंडैस्त्रिवृतैः॥ अनुकल्पमिदं स्नानं सर्वपापहरं नृणां॥ याज्ञवल्क्यः॥ त्रान्न आपस्तु
मृत्पदा आपोहिष्ठाद्यघमर्षणं॥ एतैस्तु पंचभिर्मंत्रैर्मंत्रस्नानं तदुच्यते इति॥ अत्र मं राम। १४
त्रैणां समुच्चयो विकल्पो वा शक्त्याद्यपेक्षया ज्ञेयः॥ स्नानं चैकेनानेकेन वा वा
ससा कार्यं॥ एकेन वाससा स्नायान्नद्यामनियमः स्मृतः॥ बहुभिश्च प्रतीषेधः॥
स्नानेफलमभीप्सतामिति विष्णूक्तेः॥ नैकवासाः क्रियां कुर्यात्स्नानकर्मविनाक्वचिदिति च॥

अन्यत्रापि॥ अस्पृश्यस्पर्शने चैव वार्तायां पुत्रजन्मनि॥ एतन्नद्यां वाससा कार्यमन्यत्रै
केन वाससेत्येति॥ तथा॥ न नग्नो नान्यदीयेन नार्द्रेण न सच्छ्याग्रथितेन न विकृतेन च
वाससा स्नायादित्याचारतिलके॥ जाबालिः॥ स्रोतसोऽभिमुखो मज्जेद्यत्रापः प्रवहंति
वै॥ स्थावरेषु च सर्वेषु आदित्याभिमुखस्तथा॥ संग्रहेऽपि॥ स्रोतसोऽभिमुखः स्नायान्मा
र्जने चाघमर्षणे॥ अन्यत्रार्कमुखो रात्रौ प्राङ्मुखोऽर्कमुखोऽपि वा॥ संध्यामुखस्तु सं
ध्यायां स्नानं कुर्वीत यत्नत इति॥ आपस्तंबः॥ प्रवाहाभिमुखस्नानं कृत्ता माध्यर्वेवि
दिनां॥ आदित्याभिमुखं स्नानं चाक्षुषस्य सदैव हि॥ अत एव सूर्याभिमुखो निमज्जे
दिति वाजसनेयिस्नानसूत्रं॥ तदपि स्थावरविषयमिति केचित्॥ निमज्जनमात्रं सूर्
याभिमुखं तदमंत्रं स्नानं तु प्रवाहाभिमुखं तच्च समंत्रकमित्यन्ये॥ आपस्तंबानाम
पि सूर्याभिमुखं स्नानं॥ तथा च धर्मप्रश्ने द्वितीयाध्याये॥ शनैरपो॥भ्यवेयादनभि
घ्नन्नभिमुखं आदित्यमुदकमुपस्पृशेदिति सर्वत्रोदकस्पर्शनविधिरिति॥ यत्तु

चैव प्रथमाध्याये ॥ सशिरावमज्जनमप्सु वर्जयेदस्तमिते च स्नानमिति सशिरःस्नानं नि
वि०प० षिद्धं तत्स्नातकविषयमित्युज्ज्वलकार उक्तवान् यत्तु सिंहे कर्कटे योर्मध्ये सर्वा नद्यो र स्ना०
१५ जस्वला ॥ तासु स्नानं न कुर्वीत कृतं चेन्निष्फलं भवेदिति त्रिवचनं समुद्रगाव्यतिरि ३
क्तक्षुद्रनदीविषयं ॥ गंगादिसारितः सर्वाः शुभाः सर्वत्र सर्वदेति वृद्धशौनकेः ॥ अत्र वि
शेषो वामनपुराणे ॥ विक्षिप्य तीरं कुशपिंजुलानि पूर्वोत्तराग्राणि मृदं च्युसेच्च ॥ प्रक्षा
ल्य पादौ च मुखं च कंठे यज्ञोपवीतं च जलेपि वेत्रिः ॥ कंठे यज्ञोपवीतमित्येतद्वचनं कं
ठालोचायमित्येतदर्थं ॥ तथा च निवीतं कृत्वा प्रक्षालयेदित्यर्थः ॥ करोभ्यां धारये
दर्भान् शिखाबंधं विधाय च ॥ प्राणायामांस्तथा कुर्यात्कालज्ञानं यथाविधि ॥ राम:
इति ॥ कालज्ञानं अद्य ब्रह्मणो द्वितीयपरार्धइत्यादि ॥ उत्तमं तु नदीस्नानं तडागमं १५
ध्यमं स्मृतं ॥ कूपस्नानं तु सामान्यं भांडस्नानं कलौ स्मृतं ॥ अत्रिः ॥ स्नानं रजकती
र्थे च भोजनं गणिकागृहे ॥ ये कुर्वंति द्विजा मोहात्ते यांति रयं परं ॥ नमो नारायणा

येति सप्तवारं जपेद्ध्यानेन ॥ नाभिमात्रे जले स्थित्वा धुत्वा केशान् द्विया द्विजः ॥ निरुध्य
कर्णौ नासां च त्रिः कृत्वा मज्जनं ततः ॥ स्नाने दक्षिणतः कार्या अलकास्तु प्रयत्नतः ॥
स्नातोपि तत्केशैव अभ्येरनमयतः सदा ॥ द्विराचम्याभिषेकं च कुर्याद्दर्भाक्षरेण तु ॥
अंतर्जले जपेन्मग्नस्त्रिः कृत्वा अघमर्षणं ॥ अघमर्षणकृतं च सत्यं चेति सूक्तं द्रुप
दां वा त्रिरस्यमायंगौरिति वाऋचं ॥ प्राणायामं सशिरस्कं जले तत्त्रिर्जपेत्तथा ॥
आवर्त्तयेद्वा प्रणवं स्मरेद्वा विष्णुमव्ययमिति ॥ अत्राघमर्षणो बहुपक्षाः वाजस
नेपि विषयाः ॥ तत्सूत्रे तथा ॥ विधानात् ॥ आश्वलायनस्नानविधिस्तत्रूल्पपरिशि
ष्टे ॥ प्रातः सरूगोदये न कुर्यात्कदा मध्यंदिने सायं शुद्धाभिरद्भिर्न प्रातःस्नानात्प्रा
कसंध्यामुपासीत ॥ प्रातः प्रातररुस्पृष्टं गोमयं तरिक्षस्थं संग्रस्वभूमिष्टं वोपयेंध
श्वसंयतं तीर्थमेत्य धौतु पाणिपादमुख आचम्य संध्योक्तवेदाभ्युक्षणा
दि सर्वं कृत्वा द्विराचम्य संयतप्राणः संकल्य गोमयं वीक्षितमादाय सव्यपाणौ

हलाव्याहृतिभिस्त्रिधाविभज्य दक्षिणांभागं प्रणवेन देहे तु विन्यस्योत्तरं तीर्थे क्षिप्त्वा
वि०प० मध्यमं मानस्तोकस्य चाभिमंत्र्य गंधद्वारामितिमृत्तिकां सर्वांगमालिप्य प्रांजलिर्वरु स्ना० ३
१६ णं हिरण्यशृंगमिति । द्वाभ्यां प्रसंम्राज्य च हृदर्चेति सूक्तेन प्रार्थ्य याः प्रवतस्तेतया
तीर्थमभिमृश्यावगाह्य स्नातो नवेधिरा च मध्यमाज्ञेयं देवयोयस्यछानिरित्यपाभि
रापोहिष्टेति नवभिरघ तीर्थं मंगुष्ठेनेमंमे गंग इत्यृचाभिः प्रदक्षिणमालोड्य प्रका
श्य दृष्टमयो उग्नो उघमर्षणसूक्तं त्रिरावर्त्य निमज्योन्मज्याद्य मालोक्य द्वादशा
क्षेत्र आ— सपातिभ्यां शंखमुद्रयोदकमादाय मूर्ध्नि मुखे वाक्ष्णोरसि चात्मा रामः
नं गायत्र्याभिषिच्य त्वं नो अग्ने वरुणस्य विद्वानिति द्वाभ्यां तरत्समंदीधावतीति १६
। सूक्तेन च पुनः पुनः स्नायान्मूर्ध्नि चाभिषिंचेत्तद्धिष्णोरग्नेरद्य ततोऽभ्युद्धृस्नाय
त्किंचेदं वरुणं दैव्ये जने भरस्ये व ज्ञपेत्स्नातोऽभिमुखः । सरित्सु स्नायाद्न्यत्रादित्याभि
मुखः इति ।। पित्राद्युद्देश्य स्नानविधिविषये वृहद्दाक्षिके पठ्यते ना सः ।। सिद्धतीर्थे प्रतिष्ठ

तिष्ठत्या कुशमयीं नरः ।। मृते ये तु यमुद्दिश्य सोऽष्टमांशं फलं लभेत् ।। पितरं मातरं वापि
भ्रातरं श्वसुरं गुरुं ।। यमुद्दिश्य निमज्जेत सोऽष्टमांशं लभेत वै ।। कुशोऽसि त्वं पवित्रोऽसि ।
विष्णुना निर्मितः पुरा ।। त्वयि स्नाते स च स्नातो यस्येदं ग्रंथिबंधनमिति ।। तत्र
मंत्रः ।। मृतं पित्रादिविषये मद्गुः । मातरं पितरं वापि भ्रातरं वा प्रसीतकं ।। यमुद्दिश्य
निमज्जेत स्वष्टमांशं लभेत सः ।। इति ।। एवं स्नात्वा शालग्रामतीर्थे न स्नायात् ।। य
दुक्तं स्कांदे । काशीखंडे । पादोदकेन देवस्य हत्याकोटिसमन्विताः ।। शुद्ध्यंति ना
त्र संदेहः स्तथा शंखोदकेन च ।। यदत्यर्थं रहस्यं तु पापमाचरितं भवेत् ।। प्रायश्चि
त्तं तु तस्यैकं शालग्रामशिलाजलं ।। स्नातः सर्वतीर्थेषु सर्वक्रतुषु दीक्षितः ।। सा
लग्रामशिलातोये यो भिषेवं समाचरेत् ।। पाद्मे माघमाहात्म्ये ।। गंगागोदावरी
रेवानद्यो मुक्तिप्रदाश्च याः ।। निवसंति सतीर्थास्ताः शालग्रामशिलाजले ।। ये पिबं
ति नरा नित्यं शालग्रामशिलाजलं ।। पंचगव्यसहस्रैस्तु प्राशितैः किं प्रयोजनमित्यादि ।।

वि० प० १७ गौतमीतंत्रे स्नानप्रकरणे॥ शालग्रामशिलातोयं तुलसीदलमिश्रितं॥ कृत्वा शंखे भ्रामय
त्रिर्निक्षिपेन्निजमूर्द्धनि॥ शालग्रामशिलातोयमपीत्वा यस्तु मस्तके॥ प्रक्षेपणं प्रकुरुते स्ना० ३
ब्रह्महा स निगद्यते॥ विष्णुपादोदकं पूर्वं विप्रपादोदकं पिबेत्॥ विरुद्धमाचरन्मोहाद्ब्रह्म
हा स निगद्यते॥ पृथिव्यां यानि तीर्थानि तानि तीर्थानि सागरे॥ ससागराणि तीर्थानि
पादे विप्रस्य दक्षिणे॥ ततः संक्षेपतो देवान्मनुष्यांस्तर्पयेत्पितॄनिति॥ अत्र विशेषो
वायवीये॥ ॥अमृतेन समा ज्ञेयाः पुरतः केशबिंदवः॥ सुराबिंदुसमा ज्ञेयाः पृष्ठ
तः केशबिंदवः॥ पिबंति शिरसो देवाः पिबंति पितरो मुखात्॥ मध्यतः सर्वगंधर्वा राम: १७
अधस्तात्सर्वजंतवः॥ तस्मान्न कायं न मृज्येत ग्रंथं वरेण करेण वा॥ केशान्न दक्षिणतः
कृत्वा जलमध्येन तर्पयेत्॥ इति पराशरः॥ नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानं चोप
वीतेन देवतानां च तर्पणं॥ पितॄणामपसव्येन मनुष्याणां निवीतिना॥ विष्णुः॥ तथा
च योगियाज्ञवल्क्यः॥ अनामिकाधृतं हेमं तर्जन्यां रौप्यधारणं॥ कनिष्ठिकाधृतं ख

ड्गं ततस्तर्पणमाचरेदिति॥ स्नानांगतर्पणप्रकारस्त्वाश्वलायनगृह्यपरिशिष्टे॥ अथ
स्नात्वा शुद्धाभिरद्भिः प्राङ्मुख उपवीती देवतीर्थेन व्याहृतिभिर्व्यस्तसमस्तानि ब्रह्मादी
देवान्सकृत्सकृत्तर्पयित्वा उदङ्मुखो निवीती सपवित्राभिरद्भिः प्राजापत्येन तीर्थेन ऋषी
स्तामि व्याहृतिभिर्द्विर्द्विस्तर्पयित्वाथ दक्षिणामुखः प्राचीनावीती पितृतीर्थेन सतिला
भिरद्भिर्व्याहृतिभिरेव सोमः पितृमान्यमोंगिरस्वानग्निः कव्यवाहन इत्यादीं स्त्रिस्त्रि
स्तर्पयेदेतत्स्नानांगतर्पणमप्सु तीरमेत्य दक्षिणाभिमुखः प्राचीनावीती ये के चा
स्मत्कुले जाता इति वस्त्रं निष्पीड्योपवीत्यप उपस्पृश्येति॥ ॥एतत्तर्पणं येषां शाखि
नां सूत्रे नास्ति तैरपि कार्यं॥ पारक्यमविरोधि चेद्यदिति वचनात्सर्वैरपि संहारन्याया
च्च॥ ॥अथ कर्मणि जले नैवोद्धृत्य पुंड्रं कार्यं॥ ॥तदाह विष्णुः॥ जलस्थेन हि कर्त्त
व्यं जले नैकेनोद्धृत्य पुंड्रकं॥ यतः स्नात्वा ललाटे न कृत्वा तं तत्क्रियाफलं न वेदति॥ अत्र यक्ष्म
क्ष्मतर्पणमाहाश्वलायनः॥ स्नानांगतर्पणं कृत्वा यक्ष्मणे जलमाहरेत्॥ तन्मंत्रस्तु॥

यन्म याहृषितं तोयं शारीरमलसंचयात्॥ तद्दोषपरिहारार्थं यक्ष्माणं तर्प्पयाम्यहमि
वि०प० १८ ति॥ अत्रोदकं बहिः क्षिपेत्॥ स्यदाचारात्प्रकरणाच्च॥ शेखोऽन्यथाह॥ आब्रह्मस्तंब स्त० ३
पर्यंतं जगत्तृप्यत्विति क्रमात्॥ जलांजलित्रयं दद्यादेतत्संक्षेपतर्प्पणमिति॥ इद
मशक्तस्य ज्ञेयं॥ संक्षेपशब्दश्रवणात्॥ अत्र विशेषमाह शौनकः॥ अस्पृश्यस्पर्श
ने वांते अश्रुपाते क्षुरे भगे॥ स्नानं नैमित्तिकं कार्यं देवपित्र्यादिवर्जितं॥ उद्धृतैरुदकैः
स्नातो न कुर्याद्दिन्यदा पुनः॥ स्नानांगतर्प्पणं विद्वान् स्नातो न्यच्च न हापयेदिति॥ अत्र
विशेषमाह देवलः॥ अलाभे देवखातानां सरितां सरसां तथा॥ उद्धृत्य चतुरः पिंडा रामः
न्पारक्ये स्नानमाचरेत्॥ पारक्ये॥ स्ववस्वत्वोद्देशेनानुसृष्टेऽन्यगुः॥ मार्गंतिरान १८
दीप्तादौ स्नानादिपरपारतः॥ अवक्रियारेस्प रस्वत्याणपमार्गगतो विधिः॥ इदमप्य
चोक्तिरेतीर्थविशेषाभावे द्रष्टव्यमिति त्रिस्थलीसेतौ॥ गृहे स्नानप्रकारमाह व्या
सः॥ शीतास्वप्सु निषिच्योष्णा मंत्रसंभारसंभृताः॥ गृहेपि शस्यते स्नानं तद्धीनफलं भवेत्॥

गृहे चेत्तदमंत्रवदिति तु मंत्रबाहुल्यनिषेधार्थमित्युक्तमेव॥ मंत्रानाह कात्यायनः॥ इमं
देवा असपत्नं पेमापोहिष्ठेति त्रयः॥ इदमापः॥ शन्नोदेवी द्रुपदादिवेत्यृचा॥ इति स
प्त संभारा मृन्मयादयः॥ इदं तु नद्यादिस्नानाशक्तस्य ज्ञेयं॥ यत्तु षड्त्रिंशन्मते॥
आपः स्वभावतो मेध्याः किं पुनर्वह्निसंयुताः॥ तेन सन्तः प्रशंसंति स्नानमुष्णेन वा
रिणेति तस्य प्राधान्यकथनं तदातुरविषयं॥ उष्णोदकत्वात्तु स्वैरिति विशेषस्मृतेः॥
स्नातस्य वह्नितप्तेन तथैव परवारिणा॥ शरीरशुद्धिर्विज्ञेया न तु स्नानफलं भवेदिति॥
शंखवचनविरुद्धत्वाच्च॥ अत्र विशेषमाह व — मनुः॥ मृते जन्मनि संक्रांतौ श्राद्धे जन्मदिने त
था॥ अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणेति॥ तदेतत्सर्वमनातुरस्य नद्यादिसंभ
वविषयं॥ नद्याद्यभावे त्वाह यमः॥ नित्ये नैमित्तिके चैव क्रियांगमलकर्षणे॥ तीर्थाभावे तु
कर्त्तव्यमुष्णोदकपरोदकैः॥ शीतोदकैरित्यर्थः॥ तथा॥ गृहस्नाने न कुर्वीत मार्जनं चाघ
मर्षणं॥ नांतरा तर्पणं कुर्यात् पश्चादाचम्य शुध्यति॥ गृहे स्नानं यदा कुर्याद्वस्त्रम
र्द्दं परित्यजेत्॥ अथ स्थाप्रेणास्वेपीअयाराशार्यविचो यथा॥ यति मस्त्री विष [illegible]ये [illegible]सः॥०॥
व्या० १

वि०प०
१९

कुलस्त्रीसशिरस्कं स्नायाद्दुःस्वप्ने सति तैलं ततः॥ वारे वा यत्र केकर्मण्यन्यदा कंठस्नं हुवेति॥ इति स्न० ३
गृहस्नानविधिः॥ अथ वस्त्रपरिधानविधिः॥ तत्र नागेभ्यस्तोयमुद्धरेदिति निषेधात्किंचिर
त्कालं विलंब्याङ्गात्रसंमार्जनं कार्यं॥ शुष्कं शीर्षं च कर्तव्यं तथा शुष्केण वाससा॥ स्नातो
नाङ्गानि संमृज्यात्स्नानशाट्या न पाणिना॥ किंतु वाससेति विष्णुपुराणादिति करेण नोरुजेऽपि च स्नानव
स्त्रेण वा पुनः॥ शुनोच्छिष्टं भवेत्तावद्यावत्पुनः॥ स्नानेन शुध्यतीति च पारिजातोक्तेः॥ वस्त्रविष
ये मनुः॥ ब्राह्मणस्य सितं वस्त्रं नृपते रक्तमुल्बणं॥ पीतं वैश्यस्य शूद्रस्य नीलं मलवदिष्
यते॥ रक्तं धातुरक्तं॥ उल्बणं निबिडं॥ नीलं मलवत् कृष्णं॥ मिताक्षरायां॥ नीलीरक्तं यदा रामः
वस्त्रं विप्रः स्वांगेषु धारयेत्॥ तं तु संनति संख्याके वसेच्चायनकेक्षच॥ स्कांदे पि॥ नील १९
रक्तं तु यद्वस्त्रं दूरतस्तद्विवर्जयेत्॥ स्त्रीणां क्रीडार्थसंयोगे शयनीये न दुष्यति॥ मत्ते
भर्त्तरि मौ या नारी नीली वस्त्रं तु धारयेत्॥ भर्त्ता तु नरकं याति सा नारी तदनंतरं॥ कंब
लेपट्टवस्त्रे च नीलीदोषो न विद्यत इति कंबलादौ प्रतिप्रसवः॥ तथा॥ अधौतं क- धौतं
च परेर्द्यधौतमेव च॥ अक्षुयसीडितं वस्त्रं तत्याज्यं सर्वथा द्विजैः॥ मनुः॥ अंष्ट ऊस्त

नवं श्वेतं सदशं नान्यधारितं॥ अहतं तद्विजानीयात्सर्वकर्मसु पावनं॥ योगी॥ स्नात्वै
वं वाससी धौते अक्लिन्ने परिधायेच॥ प्रक्षाल्योरू मृदाद्भिश्च हस्तौ प्रक्षालयेत्ततः॥
ईषद्धौतं नवं श्वेतं सदशं यन्न धारितं॥ अहतं तद्विजानीयात्सर्वकर्मसु पावनमिति॥
तथा॥ ॥अहतं यंत्रविमुक्तं मुक्तं वासः स्वयंभुवा॥ स्तं तन्मांगलीकेषु तावत्कालं
न सर्वदेति यमः॥ ॥एकवस्त्रो न भुंजीत॰ न कुर्याद्देवतार्चनं॥ न कुर्यात्पित्र्यकर्म
णि होमदानं तथा जपमिति च तथा॥ आजानु मलवस्त्रं स्याद्यं च कच्छं तु धारयेत्॥
नन्यूनमधिकं चैव सर्वकर्मसु गर्हितं॥ कुक्षिद्वये तथा पृष्ठे नाभौ द्वौ परिकीर्तितौ॥ व
स्त्रस्य धारणं यत्र पंचकच्छं तु तद्विदुः॥ यद्वा॥ कट्यां नाभौ तथा पृष्ठे कच्छत्रयमुदाहृ
तं॥ कच्छत्रयसमायुक्तो यो विप्रः स शुचिस्मृतः॥ एककच्छादिकच्छस्तु मुक्तकच्छस्तथै
व च॥ एकवासा अवासाश्च नग्नः पंचविधः स्मृतः॥ शुष्कवस्त्रमेवं कार्यं॥ प्रागग्र
मुदगग्रं वा धौतं वासः प्रसारयेत्॥ ॥ पश्चिमाग्रे दक्षिणाग्रे पुनः प्रक्षालनं भवेत्॥

वि० प० २० अश्मिन्दक्षिणाग्रप्रसारणे पुनः प्रक्षालनविधानात्तथा न कार्यमिति भावः॥ शुष्काभा
वः॥ शुष्काभावे गौतमः॥ स्वप्नपाताहतं तं स्त्र शुष्कवत्प्रतिपादितं॥ आर्द्रं चापि द्विजाती स्ना० ३
नामाहतं गौतमादिभिः॥ धौताधौतं तत्पाददग्धं संधितरं जकाहृतं॥ शुक्लमत्राद्यसं
स्पृष्टमाविकं चातसीमयं॥ पवित्रमिति विज्ञेयं सर्वकर्मस्वसंशय इति पाद्मे॥ अत
सीमयं क्षौमं॥ नववस्त्रपरिधाने श्रीपतिः॥ मार्त्तंडेच्युयनंत्रयाः शशधेल उत्तराः सदा
मस्मिन्नेव वस्त्रं लाभकरं बुधे सुरगुरौ विद्यागमः संद्रुपे॥ नानायोगरतिः प्रमोदुवर
नितान्यवादित्ताभोसमौ दैन्यं प्राप्यते रोगवान् किलनरोद्यचांबरं सूर्यजे॥ रामः
तथा॥०॥ रोहिणी पुष्यं च कः अश्विन्युत्तरोपि च पुनर्वसु द्वये॥०॥ रेवती २०
पुष्य वसु देवते च मन्ने नव्यवस्त्रपरिधानमिष्यते॥ नववस्त्रपरिधानं स्वस्त्रोक्तमंत्रे
णा कार्यं॥ वासस्पृष्टत्रो पानहृश्या पवांति चेन्मत्र इति कात्यायनोक्तेः॥ शाता
तपोपि॥ परिधाय नवं वासस्तूत्तरीयं च मं च ततः॥ द्विराचामेद्विजो वस्त्रयोतेविप

रिधाय च॥ द्वितीयवस्त्राभावे कात्यायनः॥ एकं चेत्सर्वस्योत्तरवर्मेणाप्रच्छदयी
ति॥ जातुकर्ण्यः॥ अभावे द्वितीयस्य वस्त्रचीरं तदा भवेत्॥ द्व्यंगुलं त्र्यंगुलं वा
पि चतुरंगुलमेव वा॥ सूत्रं वस्त्राकृतिं कुर्यात्तेन स्यादुत्तरीयकं॥ रद्मुत्तरीयं यज्ञो
पवीतेन स्वरूपयोज्यं॥ अजिने वासो दक्षिणातउपवीदक्षिणं बाहुं उद्धरते उवधत्ते स
व्यमित्यापस्तंबोक्तेः॥ अत्र विशेषः संग्रहे॥ उत्तरीयं योगपट्टं तेजस्न्यां रजतं तथा॥
नेजीवपित्रकैर्धार्यं ज्येष्ठे वाऽविद्यते यदीति॥ जीवपित्रग्रजो नोत्तरीयं कुर्या
दित्यत्रोत्तरीयं नोपरिवासोमात्रं॥ किंतु सग्रंथि परिमंडलं वस्त्रमुत्तरीयं कुर्या
दिति ज्ञातव्यकं॥ अत एव तृतीय उत्तरीयार्थे इति तृतीयमुपवीतं तस्या
नापन्नमग्निनिषिद्धं॥ वने स्त्रमात्रं द्वितीयं॥ तथा॥ पादुकारोहणं चैव यद्यादि वच
ता नोत्तदारोहणमपि न कार्यं॥ स्त्रिया विशेषः संग्रहे॥ पत्रे पुनः सचेलं स्यात्स्नानं
तच्च सुवासिनी॥ कुर्वीत वा शिरःस्नानं दैवशिरोरोगी ज्वरी तथा॥ रजोदोषनि

वि०प० २१ मित्तादिस्नानंसशिरसंभवेत्॥विधवायाःशिरःस्नानंसर्वदैवविधीयतइति॥स्ना
नंकृत्वाचार्द्रवस्त्रंत्यजेन्नयामध्योद्विजः॥गृहस्नानमथोकृत्वाविसृजेदेतदूर्ध्वतः॥ स्त० ३
अन्नानादद्दत्यथाकुर्वन्पुनःस्नानेनशुध्यतीति॥ततस्तदार्द्रवस्त्रंचतुर्गुणी
कृत्यदशायांधृत्वानिष्पीडयेन्नध्याऽकेचन्नच्चशिर्षाद्दूर्ध्वं॥इतिवस्त्रपरिधानवि
धिः॥अथतिलकधारणं॥पाराशरमाधवीये॥ऊर्ध्वपुंड्रविहीनस्यश्मशान
सदृशंमुखं॥अवलोक्यमुखंतस्यस्यादित्यमवलोकयेदिति॥तथास्नानंदानं
जपोहोमःस्वाध्यायःपितृतर्पणं॥भस्मीभवतितत्सर्वमूर्ध्वपुंड्रंविनाकृतमिति राम: २१
बृहन्नारदीयवचनेनतिलकाकरणेप्रत्यवायश्रवणात्तिलकविधौरावश्य
कः॥यत्तुतिलकंसर्वदाकुर्याच्छ्रौतेस्मार्त्तेचकर्मणि॥कर्त्तावाप्यथवाभोक्तान
कुर्याद्दैवकर्मणीति॥तत्तुतिर्यक्पुंड्रनिषेधपरं॥ऊर्ध्वंचतिलकंकुर्याद्दैवेपित्र्ये
चकर्मणि॥निराशाःपितरोयांतिदृष्ट्वाचैवत्रिपुंड्रकमितिबृहत्पाराशरोक्तेः॥

तथावासुदेवोपनिषदि॥ॐनमस्कृत्यभगवान्नारदःसर्वेश्वरंवासुदेवंपप्रच्छ
भगवन्नूर्ध्वपुंड्रविधिंद्रव्यमंत्रस्थानादिसहितंमेब्रूहीतिनारदेनपृष्टोभगवान्
द्वितीयखंडिकायांतद्विधिमाह॥अथगोपीचंदनंनमस्कृत्योद्धृत्यगोपीचंदनपा
पघ्नविष्णुदेहसमुद्भव॥चक्रांकितनमस्तुभ्यंधारणान्मुक्तिदोभवेतिप्रार्थ्यइमं
मेगंगेइतिजलमादायविष्णोर्नुकमितिमर्दयेत्॥अतोदेवाअवंतुनइत्येताभि
र्विष्णुगायत्र्याचत्रिवारमभिमंत्र्य॥शंखचक्रगदापाणेद्वारकानिलयाच्युत॥
गोविंदपुंडरीकाक्षरक्षमांशरणागतमितिमांध्यात्वागृहस्थोललाटादिद्वा
दशस्थानेष्वनामिकांगुल्याविष्णुगायत्र्याकेशवादिभिर्द्वादशनामभिर्वाधारये
द्ब्रह्मचारीवानप्रस्थोवाललाटकंठहृदयबाहुमूलेषुयतिस्तुतर्जन्याशिरोलला
टहृदयेषुप्रणवेनधारयेदित्यादि॥तथानात्रैवचतुर्थखंडिकायांभस्मधारण
मुक्तं॥अथप्रातरग्निहोत्रभस्मनाऽग्नेर्भस्मासीदंविष्णुस्त्रीणिपदेतित्रिभि

वि०प० २२ मंत्रैरुद्धूलनं कुर्याच्चरात्रं विधिना गोपीचंदनं धारयेद्यस्त्वेतत्र्याले सर्वेभ्यः पापेभ्यः प्र
तो भवतीति॥ ०॥ भारते दानधर्मे॥ ॥जाह्नवीतीरसंभूतां मृदं मूर्ध्ना बिभर्त्ति यः॥ स्मृ०
~~जाह्नवीतीरसंभूतां मृदं~~ बिभर्त्ति रूपं सोऽर्कस्य तमोनाशाय केवलमिति। काशीखंडे ३
प्येवमेव पठितं॥ ब्रह्मनारदीयेपि॥ ऊर्ध्वपुंड्रं यः करोति तुलसीमूलमृत्स्नया॥ तत्र
वनेश्वरं तस्य स्यान्मूर्ध्नि बिभ्रियात्कलौ॥ स्कंदसंहितायामपि॥ ऊर्ध्वपुंड्रं मृदा धा
र्यं विप्रोत्तमब्रह्मवादिना॥ उद्धृतासीति मंत्रेण वैष्णवेन विशेषेण रति॥ तत्प्रकार वि
शेषउक्तः॥ पराशरमाधवीये॥ ब्रह्मांडे॥ ऊर्ध्वपुंड्रप्रमाणानि दृष्ट्वा तान्यंगुलिभेदतः॥ राम:
वर्णानि मंत्रान्देशांश्च प्रवक्ष्यामि फलानि च॥ पर्वताग्रे नदीतीरे मम क्षेत्रे विशेष २२
तः॥ सिंधुतीरे च वल्मीके तुलसीमूलमाश्रिते॥ मृद एतास्तु संग्राह्या वर्जयेत्त्वन्या
मृत्तिकाः॥ श्यामं शांतिकरं प्रोक्तं रक्तं वश्याकरं तथा॥ श्रीकरं पीतमित्याहुर्वैष्ण
वं श्वेतमुच्यते॥ अंगुष्ठः पुष्टिदः प्रोक्तो मध्यमायुष्करी भवेत्॥ अनामिकाऽन्नदा

नित्यं मुक्तिदा च प्रदेशिनी॥ एतैरंगुलिभेदैस्तु कारयेन्न नखैः स्पृशेत्॥ दर्भाग्रेणोप्र
कुर्वीत तन्मध्ये मध्यातु मदीपवत्॥ श्रीकामः पुष्टिकामस्तु यद्यच्छंतिलकं चरेत्॥ नासा
मूलं समारभ्य वंशपत्रनिभं शुभं॥ वशकामो द्विजः कुर्यात्तिलकं चंदनादिना॥ आ
दिशब्दान्मृत्स्नतोयमृदो यथाकालं ज्ञेयाः॥ तदुक्तं पारिजाते॥ स्नात्वा पुंड्रं मृ
दा कुर्याद्धुत्वा चैव तु भस्मना॥ देवानभ्यर्च्य गंधेन जलमध्ये जलेन च॥ तथा॥
वर्त्तिदीपाकृतिं वापि वेणुपत्राकृतिं तथा॥ पद्मस्य मुकुलाकारं तथैव कुमुदस्य
च॥ मत्स्यकूर्माकृतिं वापि शंखाकारमतः परं॥ ॥दशांगुलप्रमाणं तदुत्तमो
त्तममुच्यते॥ नवांगुलं मध्यमं स्यादष्टांगुलमतः परं॥ ष— तच्चंचभिः पुंड्रं मध्य
मं त्रिविधं स्मृतं॥ चतुस्त्रिद्व्यंगुलैः पुंड्रं कनिष्ठं त्रिविधं स्मृतं॥ न पादुकस्थो न
दर्शने जले व वलोकयन्॥ न प्रावृतशिराः कुर्यात्तिलकं धर्मसाधनं॥ धर्मसा
धनं कार्येषु ललाटे केशवं न्यसेन्नारायणमथोदरे॥ माधवं हृदि विन्यस्य

वि०प० गोविंदं कंठकूपके॥ विष्णुं च दक्षिणे कुक्षौ तु भुजे मधुसूदनं॥ त्रिविक्रमं कर्णमूले
२३ वामकुक्षौ तु वामनं॥ श्रीधरं च हृषीकेशं वामयोर्बाहुकर्णयोः॥ पद्मनाभं प स्मृ०
ष्ठदेशे ककुदि दामोदरं स्मरेत्॥ तत्प्रक्षालिततोयं च वासुदेवं शिरो न्यसेदिति ३
॥ अथ केशवाद्यनामरूपा यत्र प्रयोगः॥ आचारदीपे त्रिविक्रमः॥ ऊर्ध्वपुंड्रं द्वि
जन्मोक्तं क्षत्रियस्य त्रिपुंड्रकं॥ अर्धचंद्रं तु वैश्यस्य वर्तुलं शूद्रजातिषु॥ यद्वा
समस्तजातीनामूर्ध्वपुंड्रं परं स्मृतमिति॥ तत्रैव॥ ऊर्ध्वपुंड्रं मृदा कुर्यात्त्रिपुं
ड्रं भस्मना सदा॥ तिलकं वै द्विजाः कुर्याच्चंदनेन यदृच्छयेति॥ भरद्वाजः॥ अ राम:
भ्यंगे सूतके चैव विवाहे देवविसर्जनपर्यंतं॥ वैखानसस्य चेत्तु भस्मनो २३
र्ध्वपुंड्रमुक्तं॥ भस्मतिस्रोतिमस्मग्रह्य सा ललाटहृदयबाहुकंठे छादिमः॥ सोमो
नमस्तस्य धार्याणि मालिष्वेति॥ वृत्तं वा चतुरस्रं वा बिंदुमर्धेंदुमेव वा॥०॥०॥०
ललाटे यादृशं पुंड्रं लिखितं स्यान्नभस्मना॥ तादृशं भुजयोर्मूर्ध्नि स्तनयोश्चांतरे

लिखेदिति॥ पुरुषार्थप्रबोधग्रंथकृतोक्तं॥ अचराणाग्निहोत्रानंतरयाज्ञिके ऊर्ध्व
पुंड्रं भस्मना॥ ध्रियमाणं दृश्यते॥ ब्रह्मचारिभिर्विद्याकारं च॥ तेन यथाचारं व्यव
स्थातव्यं॥ येनास्य पितरो याता इति मनुवचनात्॥ शाखां शिखां च पुंड्रं च समया
चारमेव च॥ पूर्वैराचरितं कुर्यादन्यथा पतितो भवेदिति विष्णूक्तेश्च॥ तथा॥ शं
खचक्राद्यंकनं तु तुलसीदलमस्तकं॥ यः कुर्यान्नियमं नित्यं स याति परमां गति
शंखः॥ नान्यदेवं नमस्कुर्यान्नान्यदेवं समर्चयेत्॥ चक्रांकितः सदा तिष्ठेन्नाभ
क्तः पांडुनंदनेति॥ स्कांदे पि॥ रेवाकाशीखंडे॥ शंखचक्रांकिततनुः शिरसा मं
जरीधरः॥ गोपीचंदनलिप्तांगो दृष्टश्चेत्तदघं कुतः इति॥ शिखा यज्ञोपवीतं च
त्रिपुंड्रं चैव नित्यकं॥ ब्राह्मणस्य तथा वेदं शंखचक्रादिधारणमिति॥ आश्वला
यनस्तु॥ शिवकेशवयोश्चिह्नं चक्राक्षलादिकं द्विजः॥ न धारयेत मतिमान्वैदि
के वर्त्मनि स्थितः इति॥ सर्वसावधारणमिति न्यायाद्वैदिकमात्रमार्गस्थितः

वि० प० स्थानेषु धारयेदिति तान्त्रिकोमयमार्गस्थितस्य भवेद्येवेति सर्वमनवद्यं॥ अत्र वि-
चारविशेषः॥ आषाढमासविधाने द्रष्टव्यः॥ धारणप्रकारः॥ सत्वसंहितायां॥ स्त० ३
२४ चक्रं पद्मं दक्षिणे तु गदा शंखं च वामतः॥ अष्टाक्षरं कितामुद्रां सर्वस्थानेषु धार-
येत्॥ हृदि पद्मं ललाटे च गदां शिरसि धारयेत्॥ प्रकाशसंहितायां विशेषः॥ कु-
क्षौ चत्वारि चक्राणि पार्श्वे द्वे दक्षिणे तथा॥ हृदि द्वयं तथा स्कन्धे स्तने द्वे दक्षिणे तथा
चक्रे द्वे दक्षिणे बाहौ चक्रमेकं गलेषु वा॥ तथा पश्चाद्धरे द्वे के द्वे पार्श्वे दक्षिणे तथा
॥ पृष्ठादयस्तथा चैकं धार्यमेवं सुदर्शनं॥ शंखद्वयं वामपार्श्वे स्तने वामे द्व- सामः
यं तथा॥ वामबाहौ द्वयं धार्यमेकमेव गले तथा॥ चैकं एकं पार्श्वे तथा धार्यं तथा २८
श्वाकुलस्य च॥ पृष्ठमूले तथा चैकं हृदये चैकमेव च॥ धार्यमेकं पांचजन्यं शं-
खस्थानविदो विदुः॥ हृदि चैकं स्तने चैकं बाहुमूले द्वयं तथा॥ धार्यं पद्मं दक्षा-
भोगे गदां वै बाह्मनस्तथा॥ नारायणस्य मुद्रां तु सर्वस्थानेषु धारयेदिति॥ इदं

मुद्राधारणं वैष्णवविषयात्॥ उपवीतादिवद्धार्याः शंखचक्रगदादयः॥ ब्राह्मणक्षत्रि-
यविशां वैष्णवत्वेन चान्यथेति पंचरात्रोक्तेरिति दिक्॥ शैवैस्तिर्यक्पुंड्रमपि धा-
र्यं॥ तदुक्तं स्कांदे॥ अग्निहोत्राग्निजं भस्म अग्निकार्योद्भवं तथा॥ औपासनास-
मुत्पन्नं समिद्धोमोद्भवं तथा॥ महारुद्राग्निजं भस्म रुद्रस्थानोद्भवं तथा॥ भस्मा-
नि षड्विधान्याहुः सर्वपापहराणि च॥ त्रैवर्णिकानां सर्वेषामग्निहोत्रसमुद्भवं॥
अग्निकार्यसमुत्पन्नं तद्धार्यं ब्रह्मचारिणा॥ आवसथ्याग्निसंभूतं गृहस्थैरेव धार्य-
यंते॥ शेषं भस्मत्रयं चैव सर्वैः सर्वत्र धार्यते॥ देवर्षिकृतहोमस्थं धार्यं यत्नेन स-
र्वदा॥ उपगस्य॥ प्रातस्तु सजलं भस्म मध्याह्ने चंदनान्वितं॥ सायं तु केवलं भ-
स्म शैवैर्धार्यं यस्य देवस्य चेति॥ कालाग्निरुद्रोपनिषदपि॥ अथ कालाग्निरुद्रं भ-
गवंतं सनत्कुमारः पप्रच्छ अधीहि भगवं त्रिपुंड्रकविधिं सतत्वं किं द्रव्यं किं स्था-
नं कति प्रमाणं का रेखा दि किं देवतं के मंत्राः का शक्तिः कः कर्त्ता किं फलमिति॥

तट होवाच भगवान्यद्रव्यं तदाग्नेयं भस्मसद्योजातदि पंचब्रह्ममंत्रैः परिगृह्याऽ
वि०प० ग्निरिति भस्मेत्यनेनाभिमंत्र्य मानस्तोके तिसमुद्धृत्य त्र्यंबक यजामहे इति शिरो स्त०
२५ ललाटवक्षःस्कंधेष्विति त्रिभिस्त्र्यायुषैस्त्र्यंबकैस्तिर्यक्तिस्रो रेखा।। कुर्वीत ३
व्रतमेतच्छांभवं सर्ववेदवादिभिरुक्तं तत्समाचरेन्मुमुक्षुरपुनर्भवायेत्यादि।।
स्मृतिसंग्रहे।। भाले त्रिपुंड्रकं भाति गले रुद्राक्षमालिका वक्त्रेच उद्गतो मंत्रः स
रुद्रो नात्र संशयः।। यं भस्मधारिणं दृष्ट्वा वाचाभिवंदति मानवाः।। तेषां श्रेष्ठु
संभृतिरनुमेयानि पश्चिते ति।। इति तिर्यक्पुंड्रधारणविधिः।। अथ संध्यावंद राम:
नविधिः।। व्यासः।। प्रातःसंध्यासनक्षत्रां मध्याह्ने स्नानकर्मणि।। सादित्यां प २५
श्चिमां संध्यामुपासीत यथाविधि।। सूर्योदयात्पूर्वं घटिकाद्वयं प्रातःसंध्या
यामुख्या कालः।। तथा सायं सूर्यास्तमयात्पूर्वं घटिकाद्वयं।। अथाचम्य
कुशेयुक्तै आसने समुपस्थितः।। ०।। करसंपुटकं कृत्वा संध्यां नित्यं समाचरेत्।।

नत्वाथ पुंडरीकाक्षमुपात्ताघप्रशांतये।। ब्रह्मा वेदेव यं प्रातःसंध्यावंदनमुपास्म
हे।। इति।। संध्यावंदनप्रकारस्त्वाश्वलायनगृह्यपरिशिष्टे।। अथ संध्यामुपासी
त याव होमे रात्र्योः संधी यश्च पूर्वापारारुणयोस्तत्कालनवा देवतासंध्या तामु
पासीत बहिर्ग्रामाच्छ्राच्यामुदीच्यां वादिश्यनिंदिता यामेनत्यमुदकाञ्चेषत्य प्रातः
शुचिर्भूतः पाणिपादमुखानि प्रक्षाल्य शुचौ देशे भूमिमिष्यापादौ न पश्चितः उपवि
ष्ट आचामेत्तस्कृति स्थमफेनाबुद्बुदं कमी क्षितं दक्षिणपाणिनादाय।। कनिष्ठा
गुष्ठौ विश्लिष्टौ वितत्य तिस्रोंतरांगुल्याः संहृतो द्वौः कृत्वा ब्राह्मेण तीर्थेन हृद
यप्राप्तिं पिबेत् त्रिः पीत्वा पाणिं प्रक्षाल्य स्पृष्टां भसांगुष्ठमूलेनोकुचितोष्ठमास्यं
द्विः प्रमृज्य सकृच्च संहृतमध्यमांगुलिभिः।। ०।। ० पाणिं प्रक्षाल्य सव्यं पाणिं
पादौ शिरश्चाभ्युक्ष्य स्पृष्टां भसा संहृतमध्यमांगुलित्रयेणास्यमुपस्पृश्य
सांगुष्ठया प्रदेशिन्या घ्राणाविलद्वय मनामिकया चक्षुःश्रोत्रे कनिष्ठिकयाना

भिं

वि॰प॰ २६ मिंचतलेन हृदयं॥ स वामिरंगुलिभिः शिरकादश्रौत्रेरसोच स्पृशेदित्येतदाचम
नमेवं द्विराचम्यात्मानमभ्युक्ष्य दर्भपवित्रपाणिः प्रथममंत्रकं पंचदशमात्रि
कं प्राणायामत्रयं कृत्वा समंत्रं स मंत्रस्य कल्कं यदा यत प्राणः प्रसप्रणवां स स्त॰ ३
व्याहृतिकां सावित्रीं सशिरस्कां त्रिरावर्त्तयेदित्येष समंत्रः प्राणायामोऽथ कर्म
संकल्पं कुर्यात्पात्रेस्थापाणौ वाऽप आधायास्थिरे तूदकाशये यावति कर्म कु
र्वीत तावत्तदुदकस्य विभागं कल्पयित्वा ताभ्यानित्रामाह्यताअपः स्वदर्भे
ण पाणिना दायादायात्मानं शिरमार्जयेदापूर्वं वक्ष्य आपोहिष्ठेति सृकःमिर राम: २६
थाचमनमुदकमादाय सूर्यश्चेति पिबेदेतत्समंत्रमाचमनमथ पुनराचम्य
र्जयेत्प्रणवव्याहृतिसावित्रीभिः वक्ष्य आपोहिष्ठेति सूक्तेन गायत्र्याशिरसा
चांभस्यात्मानं परिषिंचेदेतन्मार्जनमथ गोकर्णवत्कृतेन पाणिनोदकमा
दाय नासिकाग्रे धारयन्कृष्णघोरपुरुषाकृतिं पाप्मानमात्मानं मंतव्याव्यास्थि

तो विचिंत्य संयतप्राणोऽघमर्षणस्य सूक्तं द्रुपदामृचं वावर्तयेद्दक्षिणेन नासाविलेनज्ञा
नेप्रणो ― ॥ ॥ रनेयस्तवर्तन स्तेन संहृयेत्कृष्णं स्वेन कर्मनीपाणिस्थ उदके पातितं
ध्यात्वा तदुदकमवेक्षमाणो वामतो भुवि तीव्रपातेन क्षिप्त्वा तं पाप्मानं वज्रहतस
हस्रधा दलितं भावयेदेष पाप्मव्यपोहनमेकेन कुर्वंति मार्जनेनैव तस्य व्यपोहि
तत्वादिति द्रुपदकू पापशोधनी॥२॥ अथाचम्य दर्भपाणिः पूर्णामुदकांजलिमु
द्धृत्य स्वतिष्ठन्यापवर्तानामिश्यादित्याभिमुखः स्थित्वा प्रणवव्याहृतिपूर्वया सा
वित्र्याभिमंत्रितं क्षिपेदेतत्तु पुनः पाप्मव्यपोहनं नेच्छंति तेऽनाचम्यैवमर्घं मुक्षि
पेयुरतदेवार्घ्यानिवेदनमसावादित्यो ब्रह्मेति प्रदक्षिणं परिसृत्य पश्चारिषिध्या
य उपस्थाय स्रुचौ दक्षे दर्भान्निरस्य प्राक्कूले दर्भानास्तीर्य व्याहृतिभिरुपविश्य प्राणा
यामत्रयं कृत्वात्मानं व्याहृतिभिरभ्युक्ष्य सावित्र्या ऋषिदेवतछंदांस्यनुस्मृत्य
तामेतां चतुरक्षरशो विभक्तामविलयाभ्यां तैः षड्भिस्तदंगमंत्रैर्वा गायामनित्य

वि॰ प॰ स्वात्मानं तद्रूपं भावयेद्यथा तत्सवितुर्हृदयायनमः इति हृदये वरेण्यं शिरसे स्वाहेति शि
२७ रसि भर्गो देवस्य शिखायै वषडिति शिखायां धीमहि कवचाय हुमिति उरसि धियो यो नो
नेत्रत्रयाय वौषडिति नेत्रललाटेषु विन्यस्याथ प्रचोदयादस्त्राय फडिति करतलेऽ सं॰ ३
स्त्रं प्राच्यादिदशदिक्षु न्यसेदेवांगन्यासानंतरं मध्ये केनेच्छंति सविहितो यदि वैदिकरस्य
मंत्रदेवतां ध्यात्वा ओं गच्छ वरदे देवी यावाद्यतिष्ठन्नर्दनेषु नक्षत्रेण मंडलदर्शना
न्मंत्रार्थमनुसंधानः प्रणवव्याहृतिपूर्विकां सावित्रीं जपेज्जपपंचांगुष्ठसूत्रेणानामिका
यामध्यमादारभ्य प्रदक्षिणं दशभिरंगुल्यापर्वभिर्गणयेद्गणयेद् गच्छ वरदे देवि जपे मे सं
निधौ भव॥ गां यं तं त्रायसे यस्माद्गायत्री त्वं ततः स्मृते यावारुणमंत्रः॥ सवितुर्वरणी राम।
यं तेजो ध्यायेमहि यो अस्माकं धियः प्रेरयतीति मंत्रार्थः॥२॥ अथ देवताध्यानं यास्सं २७
ध्यासेव मंत्रोक्तादेवता रवद्रूपास्येतां सर्वदैकरूपां ध्यायेदनुसंध्यमन्यान्यरूपां वा
यदेकरूपां ऋग्यजुःसामत्रिपदेति मीमांसार्थायरदिक्षु पूर्वकुक्षिं पंचशिरसमग्निमु

खीं विष्णुहृदयां ब्रह्मशिरस्कां रुद्रशिखां दंडकमंडल्वक्षसूत्राभयांकचतुर्भुजां शुक्लवर
र्णां शुक्लांबरानुलेपनस्रगाभरणां शरच्चंद्रसहस्रप्रभां सर्वदेवमयामिमां देवीं गायत्री
मेकामेव तिसृषु संध्यासु ध्यायेद्यद्वा यदि भिन्नरूपां तां प्रातर्बालां बालादित्यमंडलमध्य
स्थां रक्तवर्णां रक्तांबरानुलेपनस्रगाभरणां चतुर्वक्त्रां दंडकमंडल्वक्षसूत्राभयांकच
तुर्भुजां हंसनारूढां ब्रह्मदेवत्यामृग्वेदमुदाहरंतीं भूर्लोकाधिष्ठात्रीं गायत्रीं नाम देवतां
ध्याये। द्वध्यमध्यंदिने तां युवतीं युवादित्यमंडलमध्यस्थां श्वेतवर्णां श्वेतांबरानुलेपन
स्रगाभरणां पंचवक्त्रां त्रिनेत्रां चंद्रशेखरां त्रिशूलखड्गखट्वांगडमरुकांकचतुर्भुजां
वृषभासनारूढां रुद्रदेवत्यां यजुर्वेदमुदाहरंतीं भुवर्लोकाधिष्ठात्रीं सावित्रीं नाम तामे
व देवतां ध्यायेत्सायं तां वृद्धां वृद्धादित्यमंडलमध्यस्थां श्यामवर्णां श्यामांबराभरणा
स्रगनुलेपनामेकवक्त्रां शंखचक्रगदापद्मांकचतुर्भुजां गरुडासनारूढां विष्णुदेव
त्यां सामवेदमुदाहरंतीं स्वर्लोकाधिष्ठात्रीं सरस्वतीं नाम देवतां ध्यात्वाऽवाह्य जपित्वा

वि०प० पजातवेदसेसुनवामसोममित्युपस्थायतच्छंयोरावृणीमहेनमोब्रह्मणेनमोस्त्वग्नय स्त०
२८ इत्येताभिर्परेस्थायप्रदक्षिणांदिशःसंध्यांनत्वाथसंध्यायैगायत्र्यैसावित्र्यैसरस्वत्यैसर ३
र्वाभ्योदेवताभ्यश्चनमस्कृत्यततउत्तमेशिखरेदेवीत्याभ्यांपर्वतमूर्धनिब्राह्मणेभ्यो
भ्यनुज्ञातागच्छदेवियथासुखमितिसंध्याविसर्जनमंत्रेणोअपिकावातयमनेरस्युके
शांतिश्चिरच्छरन्तनोअश्मना।इतिप्रदक्षिणांपरिक्रामन्नासस्यलोकादायाता।लोकाद्देलो
कालोकपर्वताद्येसंतिब्राह्मणादेवा।स्तेभ्योनित्यंनमोनमइतिनमस्कृत्यगुरूंश्चवृद्धा
श्चोपसंगृह्णीयादेवंसायंविशेषस्तुसूर्यश्चेतिमंत्रोग्निश्चेतिकृत्याज्जपंआर्चाद्यस्तमि राम:
तमंडलआनक्षत्रदर्शनादासीतोद्यमध्यंदिनेत्वापःपुनंत्वितिमंत्राचमनेनमाकृ २८
ष्णयाहंसवयावात्रिःसकृद्धाद्यर्घ्यमुक्षिप्योर्ध्वबाहुरुदुत्यमुदुत्यंजातवेदसंचित्रं
देवानामितिसूक्ताभ्यांतच्चक्षुरित्येकयाचादित्यमुपस्थायजपमासीनोयथोक्त
कालंकुर्यादित्येषसंध्याविधिर्व्याख्यातइति।।३।।अथवाजसनेयिसंध्योच्यते।।का

त्यायनः।।मध्याह्नेकरौप्रक्षाल्याचम्यत्रिरायम्यासुष्याणांत्वमित्याराप ऊर्ध्वंप्रक्षिप्योर्ध्वबाहुरु
रुदुत्यमुदुत्यंचित्रंतच्चक्षुर्यत्यापाचयथाशक्तिविभ्राडित्यनुवाकंपुरुषसूक्तशिवसंक
ल्पमंडलब्राह्मणेरित्युपस्थायप्रदक्षिणीकृत्यनमस्कृत्वा — विभ्राडिति।।अत्रयद्यपिसूत्र
कारेणसंक्षेपतोमध्याह्नसंध्योक्तातथापिसर्वशाखाधिकरणन्यायेनसंध्यात्रयंच
कर्त्तव्यंब्राह्मणेनविपश्चिता।।अन्यथानरकंयातिसर्वकर्माकरोपिसन्नित्यादिस्मृ
त्याचत्रिकालीनामार्जनादिसर्वंछंदोगपरिहितावाजसनेयिभिरपिकार्यं।।विरुद्धां
शस्तुस्वात्परावपारकमविरोधियदिति।।वचनात्।।अथानंतरंसंध्यातर्पणं।
कार्यं।।शौनकः।।अथांतिश्च ~~[illegible]~~ वाजपातेवाप्राणायामःकुशासने।।संध्यासुतर्पी
तांकार्यंस्नानाचाक्लृप्त्यादिकंततः।।ऋषिर्व्यासःसमुद्दिष्टोब्रह्मादेवतमुच्यते।।छंदोगा
यत्रकंचैवविनियोगस्तुलपणे।।प्रयोगस्तु।।ॐभूः।।पुरुषंतर्पयामि।।ॐऋग्वेदंत०मंड
लंत०हिरण्यगर्भरूपिणं०आत्मानं०गायत्रीं०वेदमातरं०सांकृतिं०संध्यां०कुमारीं०

वि॰ प॰ ब्राह्मी॰ उष — सं॰ निर्मूर्जं॰ सर्वसिद्धिकरी॥ सर्वमंत्राधिपतीं स्तर्पयामि॥ आदौ प्रणवमुच्चा
२८ र्य तर्पयीत तदंतिके॥ अनेन विधिना कुर्यात्संध्या तर्पणमुत्तमतिभिः॥ ॥अथ संध्या स्त॰
वंदनधर्माः॥ तत्र योगयाज्ञवल्क्यः॥ आपो हिष्ठेति तिसृभिर्ऋग्भिस्तु प्रयतः शुचिः॥ नवप्र ३
णवयुक्ताभिर्जलं शिरसि निक्षिपेत्॥ शौनकः॥ पूर्वोक्तेनैव विधिना प्रोक्षयेत् कुशवा
रिणा॥ विप्रुषोऽष्टौ क्षिपेदूर्ध्वमधो यस्य क्षयाय चेति॥ व्यासस्तु॥ भूमौ मूर्ध्नि तथाकाशे मू
र्ध्न्याकाशे तथा भुवि॥ ओंकारेण भुवि मूर्ध्नि स्यान्मंत्रस्नानं विधीयते॥०॥ आकाशे हृद
ये॥ भूमौ पादयोः॥ अर्घ्यविषये॥ गोशृंगमात्रमुद्धृत्य रविं वीक्ष्य जलांजलीन्॥ द्वौ पा राम:
दौ च समौ कृत्वा पाणी उद्धृत्य निक्षिपेत्॥ मुक्तहस्तेन दातव्यं मुद्रां तत्र न कारयेत्॥ २८
तर्जन्यंगुष्ठयोर्योगे राक्षसी मुद्रिका भवेत्॥ राक्षस्या मुद्रया दत्तं तत्तोयं रुधिरं भवेत्॥
गोशृंगलक्षणं तु। प्रादेशस्तु प्रदेशिन्या तालमध्यमया भवेत्॥ गोशृंगमनामि
कया वितस्तिस्तु कनिष्ठया॥ शातातपः॥ जलेष्वर्घ्यं प्रदातव्यं जलाभावे शुचिस्थले॥ प्रात

र्मध्याह्नयोः काले उत्थायार्घ्यं जले क्षिपेत्॥ उपविश्य तथा सायं स्थले चार्घ्यं विनिक्षिपेत्॥ व्यासः॥
कराभ्यां तोयमादाय गायत्र्या चाभिमंत्रितं॥ आदित्याभिमुखस्तिष्ठंस्त्रिरूर्ध्वं संध्ययोः क्षिपेत्॥
मध्या॥ मध्याह्ने सकृदेवेदं क्षेपणीयं द्विजातिभिः॥ अत्र हेतुः स्कांदे॥ त्रिंशत्कोट्यो महावीर्या मं
देहा नाम राक्षसाः॥ कृतघ्ना अतिदारुणाश्चोराः सूर्यमिच्छंति खादितुं॥ ततो देवगणाः सर्वे ऋष
यश्च तपोधनाः॥ उपासते सदा संध्यां प्रक्षिपंत्युदकांजलिं॥ दह्यंते तेन ते दैत्या वज्रीभूते—
तेन वारिणा॥ ततः प्रयाति भगवान्ब्राह्मणैरभिरक्षितः॥ वालिखिल्यादिभिश्चैव जग
तः पालनोद्यतः॥ पश्चाज्जपेच्च सावित्रीं प्रादक्षिण्यविवर्तनं॥ कुर्याज्जलेन नासां चा
चक्षुःश्रोत्रमुपस्पृशेत्॥ सूर्योपस्थाने विशेषमाह कश्यपः॥ हस्ताभ्यां स्वस्तिकं कृ
त्वा प्रातस्तिष्ठेद्दिवाकरं॥ मध्याह्ने तूर्ध्वबाहुः सायं मुकुलितौ करौ॥ तत्र मंत्रविशेषमा
ह देवलः॥ मित्रस्य चर्षणी॥ तिस्रो वस्व वस्त्वेति चोदये॥ इमं मे इति चतुष्केण सायं कुर्या
दुपस्थितिं॥ व्यासस्तु॥ संध्यात्रयेप्येकमेव ह्युपस्थानं प्रचक्षते॥ उद्वयं मुदुसं चित्रं त

वि॰प॰ चक्षुस्तिष्ठेद्दिवाकरं॥कात्यायनस्तु॥उच्चित्रमृग्द्वयेनैवमुपातिष्ठेदनंतरां॥संध्याद्वयेप्यु
नस्थानेमेतदाहुर्मनीषिणः॥मध्येत्वृक्उपर्यस्य विभ्राडादीच्छयां जपेत्॥अत्रोदिनस्य स्ना॰
३० मध्येऽस्य उदुत्यं चित्रं देवामित्याद्यमस्योपरिविभ्राडादीच्छयां जपेदित्यर्थः॥अथ जपध ३
र्माः॥तत्रव्यासः॥तिष्ठन्नासीतिजन्नोर्ध्वं गायत्र्यावाहनेद्विजः॥आवाह्यत्तु जपेत्तु प्राज्ञो गाय
त्रीं तां महाफलं॥गायत्र्येकपदीत्यादि गायत्र्याः प्रार्थनं चरेत्॥नमस्ते तुरीयायेति नमस्कृ
त्य च तां जपेत्॥आगच्छ वरदे देवी त्यादिनास्य विकल्प्य॥तेजोसीत्यादिवीजस्यनेपित्रा
स्वापरित्यात्तद्विषयत्वं वा॥ ॥गायत्रीध्यानं प्रकारान्तरेण॥मुक्तामुक्ताविद्रुमहेमनी
लधवलछायैर्मुखैः पंचभिर्युक्तामिंदुनिबद्धरत्नमुकुटां तत्वात्मवर्णात्मिकां॥गाय राम:
त्रीं वरदाभयांकुशकशां शुभ्रं कपालं गुणं॥शंखं चक्रमथारविंदयुगलं हस्तैर्वहं ३०
तीं भजे॥जपप्रकारेमहव्यासः॥प्रणवव्याहृतियुतां गायत्रीं च जपेत्ततः॥समाहि
तमनास्तूष्णीं मनसा चापि चिंतयेत्॥ध्यायेच्च मनसा मंत्रं जिह्वौष्ठौ न चालयेत्॥

~~जपस्तुचलज्जिकृद्विज~~ न्निर्गुणो॥उपांशुस्याच्छतगुणः साहस्रो मानसः स्मृतः॥विनाश॥२
न कंपमद्धिरो ग्रीवां दंतान्नैव प्रकाशयेत्॥कृत्वोत्तानौ करौ प्रातः सायं मुकुलितौ करौ
॥मध्ये तिर्यक्करौ प्रोक्तौ जपएवमुदाहृतः॥विधियज्ञाज्जपोयज्ञो विशिष्टो दशभिर्गु
णैः॥उपांशुस्तत्र लज्जिकृद्विजच्छंदः॥उपांशुं तं जपं प्राहुर्मनसा मानसं बुधाः॥पूर्वां संध्यां
जपंस्तिष्ठेत्सावित्रीमार्कदर्शनात्॥ ॥पश्चिमां तु समासीनः सम्यगृक्षविभावना
त्॥मध्याह्ने तु तिष्ठंश्चेद्वा समासीनो जपं कुर्यात्समाहितः॥अन्यः यः प्राङ्मुखः कु
र्यात्समासीनः कुशासने॥आसनान्याह व्यासः॥कौशेयं कंबलं चैव अजिनं पट्टमे
व वा॥दारुजं तालपत्रं च आसनं परिकल्पयेत्॥कृष्णाजिने ज्ञानसिद्धिर्मोक्षश्री
र्व्याघ्रचर्मणि॥वंशासने व्याधिनाशः सर्वं चित्रकंबले॥नादीक्षितश्च प्रविशेत्
कृष्णसाराजिने गृहस्थीति निषेधाद्दीक्षितविषयं कृष्णाजिनं॥आसनेर्व्याडस्यनं वस्त्र
ज्ञायापत्यं कमंडलुः॥शुची न्यात्मनेन तानि परेषां न कदाचन॥पादेन पादयाक्रम्य ज
पं नैव तु कारयेत्॥शिरः प्रावृत्य वस्त्रेण ध्यानं नैव प्रशस्यते॥न पाणिना पादं च पत्नो

वि० प्र० न नेत्रचपलो द्विजः॥ न च वाक्चपलश्चैव जपन् सिद्धिमवाप्नुयात्॥ मनःसंतोषणं शौचं
मौनं मंत्रार्थचिंतनं॥ अव्यग्रत्वमनिर्वेदो जपसंपत्तिहेतवः॥ स्वस्तिकासनमा स्तं०
३१ सीनो जपसिद्धिमवाप्नुयात्॥ जानूर्वोरंतरे सम्यक्कृत्वा पादतले उभे॥ ऋजुकायः ३
समासीनः स्वस्तिकासनमुच्यते॥ पद्मासनं समासीनः सर्वसिद्धिमवाप्नुयात्॥ उत्तानौ
चरणौ कृत्वा ऊरुसंस्थौ प्रयत्नतः॥ ऊर्वोर्मध्ये तथोत्तानौ पाणी कृत्वा ततो दृशौ॥ नासा
ग्रे विन्यसेदेवं पद्मासनमिदं स्मृतं॥ आसनांतराणि ग्रंथगौरवभीत्या नोक्तानि॥ वा
स्त्रेणाच्छाद्य स्वकरं दक्षिणं यः सदा जपेत्॥ तस्य तत्सफलं जप्यं तद्धीनमफलं भवेत्॥
जपकाले त्वक्षमालां गुह्यैरेरपि न दर्शयेत्॥ उद्ग्रंथिते तथा मेरौ पतिते चाप्युपस्पृ राम।
के प्राणायामत्रयं कृत्वा घृतप्राशनमाचरेत्॥ यज्जले शुष्कवस्त्रेण स्थले चैवा ३१
र्द्रवाससा। जपो होमस्तथा दानं तत्सर्वं निष्फलं भवेत्॥ अथ जपमालाप्रकारः॥ प्रा
मे॥ अरिष्टं पत्रजीवं च शंखं पद्मं तथा मणिं कुशग्रंथी च रुद्राक्षमुत्तमं चोत्तरोत्तरं॥

अंगुलीजपसंख्यानमेकं वरानेनोपर्वभिर्दशसंख्यातं पुत्रजीवफले दश॥ शतं वै शं
खमणिभिः प्रवालैश्च सहस्रकं। मौक्तिकैर्दशसहस्रं सौवर्णैर्लक्षमुच्यते॥ कुशग्रं
थ्या कोटिगुणं तु रुद्रस्याऽनंतकं फलं॥ अष्टगुणसमरंध्रा च परिवर्तादिदानवा॥ निश्छ
ला मपि ताऽव्यंगा अन्योन्यघृष्टिवर्जिता॥ स्वशाखचंचला या तु त्रुटिता तु या भिन्नस
त्रेण ग्रंथिता पारखंडस्य पुरातनी। मालाकाऽदुःखप्रदायिन्यो ग्रंथितानिंद्यतंतुभिः। पा
खंडस्यत संबाधिनी॥ अपक्वास्थिमात्रा मैत्रायः श्रेष्ठाः स्युर्जपकर्मणि॥ अष्टोत्तर
शतं संख्यामणीनां श्रेयसी भवेत्॥ तदर्द्धसंख्या कथिता मध्यमा चाधमा पुनः॥
सप्तविंशतिसंख्याता ततो न्हेवाधमा भवेत्॥ तर्जन्या न स्पृशेत्सूत्रं न कंपयेन्न विधू
नयेत्॥ अंगुष्ठस्य तु मध्यस्थं परिवर्त्तं समाचरेत्॥ मध्यमाकर्षणं तस्याः सर्वसि
द्धिप्रदायकं॥ नान्यांगुलिभिराकर्षन्नेरेवमत्र तथा स्पृशेत्॥ अभावे त्वक्षमाला
याः कुशग्रंथ्याथ पाणिना। जपं एवं हि कर्त्तव्यं एकाग्रमनसा सदा॥ पाणिमाला चेत्यं॥

वि॰प॰ अनामिकायांमध्यमंचमध्यपः प्रक्रमेणच ॥ ॥ तर्जन्यादिगतंतेनचअक्षमालिक
रेखिता ॥ ०॥ अस्यार्थः ॥ अनामिकामध्यारेखामादिंकृत्वातुदक्षक्रमेणप्रद स्त॰
३२ क्षिणावर्त्तेनतर्जन्याआदिरेखांउत्तेकांयसियंकरेस्थितामालेत्यर्थः ॥ यमः ॥ सरुरूस्वप ३
रमांदेवींतमध्यांद्दशावरां ॥ गायत्रींतुपेन्नित्यंसर्वकल्मषनाशिनीं ॥ पर्वभिस्तुज
पेद्देवीमन्यत्रानियमः स्मृतः ॥ गायत्र्यादिदेवीजप्यादिदः पर्वसुगीयते ॥ मध्यमा
दिपर्वद्वयंजपकालेतुवर्जयेत् ॥ तंमेरुंविजानीयाद्दूषितंब्रह्मणास्वयं ॥ अं
गुष्ठाग्रेणयज्ज — यंजप्तंमेरुलंघनाद्धनाद्यं ॥ असंख्यातंतुयज्जप्तंतत्सर्वंनि रामः
ष्फलंभवेत् ॥ आश्रमविशेषजपविशेषमाहमनुः ॥ ब्रह्मचारीगृहस्थश्चशत ३२
मष्टोत्तरंजपेत् ॥ वानप्रस्थोयतिश्चैवद्विसहस्राधिकंजपेत् ॥ गृहस्थस्यसं
ख्यांतरमुक्तंयमेन ॥ अष्टोत्तरशतंकुर्याच्चतुःपंचाशिकापिवा ॥ सप्तविंशतिका
कार्यतितोनैवाधमातोमे ॥ दशावरामितितुकार्यंतिरासत्कविषयं ॥ याज्ञवल्क्यो

ऽविशेषमाह ॥ सर्वेषांचैवपापानांसंकरेसमुपस्थिते ॥ दशसाहस्त्रिकाभ्यासोगायत्र्याः
शोधनंपरं ॥ मैत्रस्त्रिसिद्धिकामस्यचतुर्विंशतिलक्षकंजपयुक्तः ॥ शारदातिलके ॥ तल्लक्षं
विधानेनभिक्षाशीविजितेंद्रियः ॥ व्याहृतित्रयसंयुक्तांगायत्रींदीक्षितोजपेदिति ॥ त
थागृहेत्येकगुणंहयंनद्यांतुद्विगुणंस्मृतं ॥ गवांगोष्ठेदशगुणमग्न्यागारेदशाधि
कं ॥ सिद्धिक्षेत्रेषुसर्वेषुदेवतायाश्चसंनिधौ ॥ सहस्रशतकोटीनामनंतंविष्णुसं
निधौकाम्येविशेषणं ॥ गुलिविशेषः ॥ वसिष्ठः ॥ अंगुष्ठंमोक्षदंविद्यात्तर्जनीश
त्रुनाशिनी ॥ मध्यमाधनसिध्येस्यात्शांतिकंमेरायनासिका ॥ कनिष्ठाकर्षणाज्ञेयज
पकर्मणिसिद्धिदा ॥ कूर्मचक्रेदीपंदत्वाजपेत्सर्वसिद्धिरितिकूर्मचक्रमुच्यते ॥ वर्तु
लंनवकोष्टंतत्कृत्वाकूर्माकृतिलिखेत् ॥ स्वरयुग्मंक्रमेणैवरौं घरासुदिक्षुच ॥
कादीन्वर्गात्तन्यसमीशान्तांतथामध्येस्थापयेत् ॥ तन्नामाद्यक्षरंयत्रकूर्मास्यं
तत्रदीपकं ॥ तस्यास्यंकोष्टोहस्तौद्वौअधोधःकुक्षिपादकौ ॥ शेषंकोष्ठंभवेत्पु

वि०प० ष्ठं मुखे सिद्धिरनुत्तमा॥ करस्थाने महान्क्लेशः कुक्षौ दुःखसमं वाप्नुयात्॥ पदोर्हा
निस्तथा पृष्ठे पीडा स्याद्बंधनादिभिः॥ मोक्षार्थी च द्रुने कुर्याद्दिक्षिरोऽत्वाभिचारिकं॥ रा०
३३ श्रीकमः पश्चिमे कृत्वा उत्तरे शांतिदं भवेत्॥ ईशान्ये शत्रुनाशः स्याद् आग्नेये वशचुद्या २
पकः॥ नैरृत्ये शत्रुभीतिः स्याद्वायव्ये तु पलायनं॥ ग्रामे देवेनवापि यत्र कुत्रावलो
कयेत्॥ दीपस्थाने जपः कार्यः सर्वसिद्धिमभीप्सुभिः॥ कूर्मचक्रमसंज्ञाय यः
कुर्याज्जपयज्ञकं॥ तस्य ज्ञाप्यफलं नास्ति सर्वनिष्फलयिकल्पेत इति॥ होमस्तु॥
क्षीरौदनतिलाद्दूर्वाक्षीरद्रुमसमिद्वरैः॥ पृथक्कुसहस्रत्रितयं जुहुयान्मंत्रसि राम:
द्धये॥ ०॥ तत्संख्यास्य हस्याते मंत्रविज्जुहुतिलैः॥ सर्वपापविनिर्मुक्तो दीर्घमायुः सवि ३३
दति॥ अरुणा ~~[illegible]~~ ज्योतिर्मध्ये चैव जुहुयाद्युतं ततः॥ मलाल्लक्ष्मीभवेत्तस्य परामा
सान्नात्रसंशयः॥ बहुना किमिहोक्तेन यथावत्साधुसाधितो॥ द्विजन्मनामियं विद्या
सिध्यासिद्धा कामदुघा मतेति॥ अन्यजपे तु॥ शौनकः॥ प्रातर्विप्रः शुचिः स्नातो हवि

ष्याशी जितेंद्रियः॥ अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा॥ होमांश्च जपयज्ञांश्च नित्यं कुर्
वीत चैतथा॥ सर्वकर्मसमग्रं च ध्येयं परं ब्रह्मैव मुच्यते॥ एषिव प्रतिलोमोक्ता पाठाद्वस्तु वि
नाशिनी॥ कपिलाद्येन यः कुर्याद्धोममष्टोत्तरं शतं॥ तस्य कामाः प्रसिध्यंति षण्मासा
द्वजुहुतर इति॥ एतत्प्रकारेणायथाशक्तिजपं कृत्वा गायत्रीध्यानं कृत्वा षडंगन्यासा
न्कृत्वा॥ उत्तमे शिखरे जात इति विसर्जनं कृत्वा ब्रह्मातर्पणं कार्यं॥ योगी॥ करेनीरस
[illegible] नागाचितिमंत्रतः॥ निवेद्य जपं प्रोक्तः प्रयोगस्तत्र कथ्यते॥ प्रातःसं
[illegible] नगायत्र्यास्तु जपेन च॥ साष्टेन शतसंख्येन ब्रह्मा मे प्रीयतां रविः॥ इति॥
मुख्यकाले संध्यावंनोदेकरणे प्रायश्चित्तं॥ व्यासः॥ आदित्योऽभ्युदियाद्यस्य संध्योपा
स्तिमकुर्वतः॥ स्नात्वा प्राणांस्त्रिरायम्य गायत्र्यष्टशतं जपेत्॥ पारिजाते तु॥ कालाति
क्रमे तो वचतुर्थ्यर्घ्यं प्रदापयेदिसुक्तं॥ संगवपर्यंतं प्रातःसंध्यागौणकालः॥ आ
पदोषावसानं सायंसंध्यायाः॥ इति मंडनः॥ उदयास्तमयाद्र्ध्वं यावत्स्याद्घटिकात्रयं॥

वि० प० तावत्संध्यामुपासीत। प्रायश्चित्तमतः परमिति स्कांदे विशेष उक्तः॥ मध्याह्नेतदृशः॥ स्त०
३४ अर्घ्य[illegible]यामादासायंध्यामाध्याह्निकी ष्यते। अर्घ्यप्रदानतः॥ पूर्वमुदयोस्तमा- ३
येपिवा॥ गायत्र्याष्टशतं जप्यं प्रायश्चित्तं द्विजातिभिरिति। गौणकालेप्यसंभवे
यमः। दिवोदितानि कर्माणि प्रमादादकृतानि चेत्॥ शर्वर्याः प्रथमे यामे तानि कुर्या-
द्यथाक्रमं॥ अत्र मुख्यकालानुरोधात्सायंसंध्योपास्तेनं पूर्वं कृत्वा॥ गौणं नाम तेनि
चे[illegible]ति न्याये नातीतकालं कर्म पश्चात्कार्यमिति न्यायतः प्राप्तं तस्य निषेधार्थं
यथाक्रममिति वचनमिति पदनपारिजाते। दिवोतानि कर्माणि प्राप्नुवंत्युत्तरां
णीच॥ दिवोदितानि कृत्ये वविदध्यादुत्तरां तिं तु इति स्पष्टोक्तेश्च॥ अथ गरुडब्रह्म- राम:
यज्ञं सौरं जप्यं च वर्जयेत्॥ इति॥ स्नानं संध्यां त्यजन्विप्रः॥ सप्ताहाच्छूद्रतां व्रजे- ३४
त्॥ तस्मात्स्नानं च संध्यां च सूतकेपि न संत्यजेत्॥ सूतके मृतके चैव संध्याक-
र्म समाचरेत्॥ मनसोच्चरयेन्मंत्रान् प्राणायाममृते द्विजः॥ प्राणायाम मंत्राम्.

न सापि त्र्यर्घ्य इत्यर्थः॥ पैठीनसिस्तु॥ सूतके सावित्र्यांजलिं प्रक्षिप्य प्रदक्षिणं कृत्वा-
सूर्यं ध्यायन्नमस्कुर्यादिति — दानां तां संध्यामाह॥ अन्ये तु॥ उच्चार्य वाचा गायत्रीं द-
द्यादर्घ्यांजलीनपि॥ अष्टाविंशति कृत्वो वा गायत्रीं मनसा जपेदिति गायत्रीजपमा-
प्याहुः॥ अत्र यथाचारं व्यवस्थेयं॥ श्राद्धभोजिनोऽत्र विशेषः॥ संग्रहे॥ दशकृत्वः पि-
वेदां गायत्र्यां श्राद्धभुग्द्विजः॥ ततः संध्यामुपासीत शुध्यते तदनंतरं॥ गोभिलः॥
संध्या येन विज्ञाता संध्या नैवाप्युपासिता॥ जीवमानो भवेच्छूद्रो मृतः श्वा चाभिजाय-
ते इति॥ स्यादि॥ अत्र जपात्पूर्वं पश्चाद्वा भयत्र वी मुद्रा दर्शनीया॥ ताश्चोक्ता गाय-
त्रीहृदये चतुर्विंशतिः॥ सुमुख संपुट २ वितत ३ विस्तीर्ण ४ द्विमुख ५ त्रिमुख ६
चतुर्मुख ७ पंचमुख ८ षण्मुख ९ अधोमुख १० व्यापकांजलिक ११ शकट १२
यमपाश १३ ग्रंथित १४ संमुखोन्मुख १५ विलंब १६ मुष्टिका १७ [illegible] मीन १८ [illegible] वराह २०
सिंहाक्रांत २१ महाक्रांत २२ मुद्गर २३ पल्लव २४ तत्र ~~मुखं~~ संमुखं संहतोर्ध्व-
द्विमुख १५॥२

वि०प० स्तावुभावुत्तानौ कुंचितानांगुली॥ संपुटं पद्मकोशाभौ तावेवान्योन्यसंहतौ॥ विततं स्त०
३५ संमुखौ हस्तावुत्तानौ नावायतांगुली॥ विस्तीर्णौ संहतौ पाणी मिथो मुक्तांगुलिद्वयो॥ सं ३
मुखासक्तयोः पाण्योः कनिष्ठाद्वयमागत॥ शेषांगुलीनां वैरल्यात् द्विमुखं त्रिमुखाद्
यः॥ संमुखेति॥ संमुखासक्तपाण्योः कनिष्ठाद्वययोगेन शेषांगुलीनां विरलस्थितानांगु
ष्ठद्वयमारभ्यानामिकांतं यावत् द्विमुखत्रिमुखचतुर्मुखपंचमुखाख्या मुद्राः स्युः॥ शेषांगु
लीनां संयोगात् पूर्वयोगविनाशतः॥ तिर्यक्संयुक्तमानाम्नोः संयुक्तांगुलिमंडलौ॥ हस्तौ
परामुखमित्युक्तो मुद्रा मुद्राविशारदैः॥ अत्र पूर्वयोगविनाशात् उत्तरपूर्वयोगः क
निष्ठाद्वययोगस्तद्विनाशात्र यथा॥ शेषं सुगमं॥ आकुंचितांगुलौ संयुक्तौ न्युब्जौ हस्ता स्तमः
वधोमुखं॥ उत्तानौ तादृशावेव व्यापकांजलिकं करौ॥ अधोमुखौ बद्धमुष्टी च द्वौ सं ३५
मुष्टिकौ करौ॥ शकटं नाम कथितमिति बद्धमुष्टिकयोः पाण्योः सक्तौ नावामतर्जनी॥
कुंचितांगुष्ठा अन्यया युक्ता जतेन्यान्युब्जत्र्याख्या॥ यमपाशमिति अस्यार्थः बद्धमुष्टिक

योः पाण्योः उत्तानांकुंचितांगुष्ठा वामतर्जनी सा अन्यया दक्षिणतर्जन्या न्युब्जकक्रया युक्ता
यमपाशमुद्रेति॥ उत्तानसंधिसंलीनबद्धांगुलिदलौ करौ॥ संपुटघाटिकेतौ दीर्घावगुंठे
ग्रंथमुच्यते॥ उत्तानानि संधिसंलीनानि बद्धान्यंगुलिदलानि ययोस्तौ तथोक्तौ शेषं सु
गमं॥ संचितोर्ध्वांगुलिर्वामहस्तादृशा दक्षिणेन तु॥ अधोमुखेन संयुक्तः संमुखोन्मुख उ
च्यते॥ उत्तानोन्नतकोटी च विलंबाः कथिताः करौ॥ मुष्टी चान्योन्यसंसक्ता उत्तानौ मुष्टि
कौ भवेत्॥ मीनस्तु संमुखीनतौ युक्ता नामककनिष्ठिकौ॥ ऊर्ध्वसंयुक्तवक्राय शेषांगु
लिदलौ करौ॥ युक्ते संयुक्ते अनामिककनिष्ठिकयोस्तौ तथोक्तौ। तावन्योन्यसंमुखी
नतौ॥ तथा॥ ऊर्ध्वसंयुक्तानि वक्राण्यालि शेषांगुलिदलानि ययोः करयोस्तौ मीनो नाम
मुद्रा॥ अधोमुखकरो वामहस्तादृशा दक्षिणेन तु॥ पृष्ठदेशे समाक्रांतः कूर्मो नामाभिधी
यते॥ ऊर्ध्वमध्या वामभुजो दक्षकक्षाश्रये करे॥ वराहेति॥ दक्षकक्षाश्रये करे सति
उत्कलक्षणो वामभुजो वाराहो नाम मुद्रा तथा तथांगुलीसिंहाक्रांतकनिष्ठिकौ करौ॥

वि० प०
३६

किंचिदाकुंचिताग्रोच्चेन महाक्रांत ततः परं। तावेव कुंचिताग्रौ महाक्रांतं नाम मुद्रा। ऊर्ध्व स्त०
किंचित्कृतौ पाणी मुद्गरो वामतर्जनी। ग्रस्ता दक्षिणहस्तेनेति। अस्यार्थः। किंचिदूर्ध्वगत ३
योः पाण्योर्वामतर्जनी दक्षिणहस्तेन गृहीता सा मुद्गरमुद्रा॥ अधोमुखः स्थितो म
ध्ये पल्लवो दक्षिणः करः। अस्यार्थः। उत्फुल्लहस्ता वामतर्जन्याः मध्ये अधोमुखस्थितो द
क्षिणाकरः पल्लवो नाम मुद्रेति॥ न जातु दर्शयेन्मुद्रां महाजनसमागमे॥ देवास्तस्य न
पश्यंति विफलं चक्षुतं भवेदिति तस्माद्धस्तस्यैव मुद्रा दर्शनीयाः॥ अत्रावसरे गायत्री
तर्पणमुक्तं॥ शौनकेन॥ अर्घ्यांते चाजपांते वा प्रागासीनः कुशासने॥ संध्यासु तर्पणं रामः
कार्यं स्मृत्वा कृष्णादिकं ततः॥ ऋषिर्व्यासः समुद्दिष्टो ब्रह्मादिवतमुच्यते॥ छंदो गायत्र ३६
कं चैव विनियोगस्तु तर्पणे॥ सवितृप्रीतये गायत्रीतर्पणमहं करिष्य इति संकल्प्य ॐ
भूः पुरुष ऋग्वेदं तर्पयामि॥ ॐ भुवः पुरुष यजुर्वेदं त० ॐ स्वः पुरुष सामवेदं तर्पया
मि ॐ महः पुरुष अथर्ववेदः ॐ जनः पुरुष इतिहासपुराणं० ॐ तपः पुरुष सर्वागमः

ॐ सत्यं सत्यलोकं० ॐ भूर्भुवः स्वः पुरुषमंडलांतर्गतं० ॐ भूः एकपदां गायत्रीं॥ ॐ भुवः द्विप
दां गायत्रीं० ॐ स्वः त्रिपदां गायत्रीं ॐ भूर्भुवः स्वः चतुष्पदां गायत्रीं० ॐ उषसं० ॐ गाय
त्रीं॥ ॐ सावित्रीं० ॐ सरस्वतीं० ॐ वेदमातरं॥ ॐ पृथिवीं० ॐ अजयां० ॐ कौशिकीं०
ॐ सांकृतीं० ॐ सर्वापराजितीं० ॐ सहस्रमूर्तिं० ॐ अनंतमूर्तिं॥ मंत्रैरेभिस्तु योनि
सं चतुर्विंशतिसंमितैः॥ गायत्री तर्प्ययेत्तेन तर्पितं स्यच्चराचरं॥ अनेन विधिना कुर्या
त्प्रातःकाले च तर्पणं॥ मध्याह्ने चैव सायाह्ने मंत्रैरेतैश्च तर्पणमिति गायत्रीकल्पे
॥ इति प्रातःसंध्याविधिः॥ अथाभिवादनं॥ याज्ञवल्क्यः॥ संध्यां च विधिवत्कृत्वा
संध्ययोरुभयोरपि॥ ततोभिवादयेद्वृद्धानसावहमिति ब्रुवन्॥ यमः॥ अवाच्यो दी
क्षितो नाम्ना यवीयानपि यो भवेत्॥ भोभवत्पूर्वकं त्वेनमभिभाषेत धर्मवित्॥ मनुः॥
विप्राणां ज्ञानतो ज्येष्ठ्यं क्षत्रियाणां तु वीर्यतः॥ धनधान्येन वैश्यानां शूद्राणां च
व जन्मतः॥ आपस्तंबः॥ आयुष्मान्भव सौम्येति वाच्यो विप्रोभिवादने॥ अकार

वि० प० अशास्यनाम्नां ते वाच्यः पूर्वान्तस्वरप्लुतः॥ पाणिनिरपि॥ प्रत्यभिवादेऽशूद्रे इति॥ प्रत्यभि
३७ वादे टेः प्लुतो भवति न तु शूद्रे इति सूत्रार्थः॥ तथाचायं प्रयोगः आयुष्मान्भव सौम्य देवद स्मृ०
त्ता ३ इत्यादि॥ येन वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनं॥ नाभिवंद्यः स विदुषा यथा शूद्र ३
स्तथैव सः॥ बृहस्पतिः॥ जपयज्ञजलस्थं च समित्पुष्पकुशानलान्॥ उदपात्रार्घभैक्षा
वहंतं॥ नाभिवादयेत्॥ पारव्यं उंपतितं ब्रात्यं महापातकिनं शठं॥ सोपानत्कं कृतघ्नं
च नाभिवादयेत्कदाचन॥ मनुः॥ यस्य देशं न जानाजेयेत्॥ बृहन्नारदीयेपि॥ सभायां
यज्ञशालायां देवतायतनेष्वपि॥ प्रत्येकं तु नमस्कारो हंति पुण्यं पुराकृतं॥ तस्मा
त्सभास्थेभ्यः सकृदेव नमस्कुर्यादिभावः॥ संध्यायां तु यमोक्तो विशेषः॥ ज्यायानपि राम:
कनीयांसं संध्यायामभिवादयेत्॥ विना पुत्रं च शिष्यं च दौहित्रं दुहितुः पतिं॥ स्व ३७
यंतरे तु॥ सर्वेपि वा नमस्कार्याः सर्वावस्थासु सर्वदेति॥ अत्रत्यो विशेषो ब्रह्मचा
रिविधाने द्रष्टव्यः॥ अथ प्रातर्होमः॥ दक्षः॥ संध्याकर्मावसाने तु स्वयं होमो विधीयते॥

स्वयं होमे फलं यत्तु तदन्येनार्धमुच्यते॥ स्मृत्यर्थसारे॥ यजमानः प्रधानं स्यात्पत्नी पुत्रश्च
कन्यका॥ ऋत्विक्शिष्यो गुरुर्भ्राता भागिनेयः सुतापतिः॥ एतैरेव हुतं यत्तु तद्धुतं स्वय
मेव तु॥ पत्नी कन्या च जुहुयाद्विना पर्युक्षणादिक्रिया नियमादित्यादि॥ यजमानस्येतत्समा
वासंनिधानेऽन्येन होतव्यं॥ याज्ञिकैस्तु यजमानः पत्नी वा॥ उन्मादप्रवासादावन्यो
पि॥ तथा॥ नोपवासी प्रवासे स्यात्पत्नी धारयते व्रतं॥ सर्वदा यजमानो वा स्यजेत्तद्यशु
चः शुचिः आपदि पक्षहोमः कार्यः॥ मरीचिः॥ पक्षहोमं प्रकुर्वीत प्रवसन्नाग्निमान्यदि॥ पं
चयज्ञविधानं तु लौकिकेग्नौ विधीयते॥ बृहस्पतिः॥ प्रस्थं धान्यं चतुःषष्टिराहुतेः परि
कीर्तितं॥ तिलानां तु तदर्धं स्यात्तदर्धं स्याद्घृतस्य तु॥ कात्यायनः॥ पाण्या हुतिर्द्वादश
पर्वपूरिका घृतं दिना चेत्सुवपूरमात्रिकेति॥ नालिकादिनाग्नियमनं॥ न मुखेन मदनपा
रिजातो॥ गोभिलः॥ अग्निहोत्रस्य होमार्थं शुद्धिः स्यात्कालिकी भवेत्॥ पंचयज्ञान्नकु
र्वीत स्वशुद्धः पुनरेव सः॥ जातकर्मा॥ सूतके च समुत्पन्ने स्मार्तं कर्म कथं भवेत्॥

शौरु

नि॰सि॰ ३८ पिंडयज्ञंचरुंहोममसगोत्रेणकारयेत्॥ बृहस्पतिः। सूतकेमृतकेचैवअशक्तौश्राद्ध
भोजने॥ प्रवासादिनिमित्तेषुहावयेन्नतुहापयेदिति॥ रात्रेस्तुषोडशेभागेग्रहनक्षत्र रा॰
भूषिते॥ कालंत्वनुदितंज्ञात्वाहोमंकुर्याद्विचक्षणइतिकात्यायनवचनंवाजसनेयिविषयं॥ उप ३
यमनग्रन्थयोपासनस्यपरिचरणमस्तमितानुदितयोरितितत्सूत्रात्॥ उदितहोमस्त्वाश्व
लायनपरस्तंबादीनां॥ तत्सूत्रेतथाविधानात्॥ अत्रयद्यप्यसायंतदेवप्रातः। एवंकर्त्ताचि॥
मुख्यकालासंभवेगौणकालमाहमदनः। स्वकालादुत्तरोगौणःकालःपूर्वस्यकर्मणः
। यद्यागामिक्रियामुख्यकालस्यांतरालवत्। गौणकालत्वमिच्छंतिकेचित्प्राक्तनक
र्मणीति॥ अस्यार्थउक्तो॥ मदनपारिजाते॥ स्वकालात्तुयत्कालेकर्मविहितंतस्मान्मुख्य राम॰
कालादुत्तरोयःकालउत्तरकर्मकालावधिकःसपूर्वकर्मणोगौणकालः॥ यद्वाआगा ३८
मि॰कर्मणोयोमुख्यकालस्तस्यापिपूर्वकर्मार्थंकेचिद्गौणकालत्वमिच्छंति॥ तत्रदृ
ष्टांतः। अंतरालवदिति॥ यथापूर्वोत्तरकर्मणोर्मध्यकालस्तद्द्वयमपीत्यर्थःउत्तर

कर्मकालेपूर्वोत्तरकर्मणोःसमावेशयद्यपस्तः॥ तदसमावेशेतुअंतरालवद्गौणत्वव्य
वस्थाज्ञेया॥ सचगौणोयथायथाशक्नुयात्तथाकुर्यादित्युपबंध्यादितिन्यायाद्विहितांगाभा
वेत्सदृशप्रतिनिधिग्रहणस्येवचितत्वादावश्यकेषुनित्यनैमित्तिकेष्वेवमुख्यकालासंभ
वे[illegible]गौणंनतुकाम्येष्वपीतिचन्नवंद्यश्राद्धादेरमावास्यादिविहितकालातिक्रमेगौण
कालेकर्त्तव्यतास्यादितिचेन्न॥ अत्रोच्यते॥ कालोदेशोनकर्मविधीयते॥ नकर्मणिका
लः॥ तस्यानुपादेयत्वात्॥ तथाचकालोनिमित्तंनिमित्तभूतकालाभावेचाधिका
राभावादन्यकालेकृतंकर्माकृतमेवेतिनतत्रगौणकालग्रहणं॥ यानितुमुख्यका
लासंभवेगौणकार्याणीतिवाचनिकानितान्येवगौणकार्याणि॥ यथा॥ यथाकश्चि
चित्कर्त्तव्यंनित्यकर्मविज्ञानतोऽन्नप्राशनस्यविलोपोऽस्तिपितृकस्यविशेषतः। दिवोदिता
निकर्माणिप्रमादादकृतानिगत्या। प्रथमःप्रहरेकार्याणीतिप्रमादकृतानिचिरस्य
नकांतेतत्कार्यंस्तुनस्नास्ये~~स्वचेनिद्रत्यक्ते~~प्रहरेयोक्तेः। दर्शश्राद्धेतद्वचनाभावान्न

वि०प० गे।णाकालकर्त्तव्यतेतिस्व वेंसि मंत्रस्य मंत्रस्यमिसकलं विस्तरेण॥ अत्र प्रायश्चित्तादिस्व
३९ वविशेष औपासनविधाने द्रष्टव्यः॥ औपासनानंतरं ब्रह्मयज्ञकालः॥ पश्चाद्वा प्रात स्त०
राहुतेरिति कात्यायनोक्तेः॥ अत्र संभवे तर्पणं तस्य वं कार्यं॥ अत्रावरे देवता निर्माल्यो ३
द्वासनं मुक्तो॥ नारदीये॥ अपसारितनिर्माल्ये तरणौ॥ किरणा नूपुरा॥ पूजकस्तु तत॥
कुर्याद्दासनादिकेमात्मनः॥ अविवाहिता कन्या च अस्माच स्वरस्वती॥ देवतां च स्व
निर्माल्या हंति पुरायं पुराकृतमिति॥ किरणा॥ किरणोदयादित्यर्थः॥ मरीचिः॥ वि
दध्याद्देवतां पूजां प्रातर्होमादनंतरं॥ स्थंडिले प्रतिमायां वा वह्नौ वाप्सुद येपि वेति॥
इति प्रातर्महोविधिः॥ ॥ अथ नित्यदानं॥ याज्ञवल्क्यः॥ दातव्यं प्रत्यहं पात्रे निमित्ते राम
षु विशेषतः॥ याचितेनापि दातव्यं श्रद्धापूतं तु शक्तितः॥ अथ न्यन्नियत्किंचिद्दीय ३९
तेनुपकारिणे॥ अनुद्दिश्य फलं तस्य ब्राह्मणाय तु नित्यकमिति हेमाद्रौ॥ गत्वा यद्दी
यते दानं तदनंतफलं स्मृतं॥ सहस्रगुणमाहूय याचिते तु तदर्द्धकं॥ ग्रासादर्द्ध

ग्रासमर्थिभ्यः किं न दीयते॥ इच्छानुरूपो विभवः कदा कस्य भविष्यति॥ ॥ अस्मात्तु शी
मलं भुंक्ते अजपीडपग्रोलितं॥ अहुत्वाग्निं किं न भुंक्ते अदत्वा विषमश्नुते॥ देयवस्त्वा
ह याज्ञवल्क्यः॥ नो गोभतिलहिरण्यादिपात्रे दातव्यमर्चितं॥ नापात्रे विदुषा किंचिदा
त्मनः श्रेय इच्छता॥ अत्र चापात्रस्य नेन द्रव्यादि सन्निधौ पात्रे॥ सन्निहिततदुद्दे
नेत्यागं तस्मै प्रति अपर्णा वा कृत्वा पर्ये न्नत्वा पात्रे देयमिति सूचितं॥ प्रतिश्रुत्या
पि तत्र पापं ज्ञात्वा न तस्मै दद्यात्॥ अपात्रे दाननिषेधात्॥ अनधिकारणां न श्रो
द्धे॥ विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः॥ गृह्णन्प्रदातारमधो नयत्या
नमेव चेति स्मृतेः॥ अत्रेति कर्त्तव्य विशेषश्च तुर्थस्तवके ज्ञेयः॥ अत्र साध्वी स्त्री भर्त्र
हेतुपुण्यमवाप्नुते॥ तदुक्तं हेमाद्रिणा॥ यद्देवेभ्यो यश्च पित्रादिकेभ्यः कुर्याद्भ
र्ताभ्यर्चनं सत्क्रियां च॥ तस्यार्द्धं सा तत्फलेनान्यचित्ता नारी भुंक्ते भर्तृशुश्रूषयैव
यावं च यंति मन्तारि योनिदूषाश्च याः स्त्रियः॥ योनिदोषाननुप्राप्य फलं नाश्नंतिनिर

वि० प०
४०

यं गमः॥ अनाम्नायमला वेदा ब्राह्मणस्याव्रतं मलं॥ कौतूहलं मलं साध्वी मलं दान
स्य कीर्त्तनमिति। इति नित्यदानं॥ ॥अथ मंगलावेक्षणं दक्षः॥ देवप्रज्ञां ततो हित्वा स्ल० ३
गुरुमंगलवीक्षणं॥ रोचनं चंदनं हेम मृदंगं व्यसनं मणिं॥ तथा॥ गुरुमग्निं स्वसूर्यं च प्रो
तः पश्येत्सदा बुध इति। भारते॥ ॥वृद्धो ज्ञातिर्यथा मित्रं दरिद्रो यो भवेदपि॥ गृहे वा
सयितव्यास्ते धन्यमायुष्यमेव च॥ गृहे पारावता धन्याः शुकाश्च सह सारिकाः॥ ॥
गृहेष्वेतेन पापाय रक्तलया॥ वैतैलपायिका॥ उद्दीपकाश्च गृध्राश्च कपोता धृताम
रीस्तथा॥ अमंगल्यानि चैतानि तथा क्रोशो महात्मनो॥ कात्यायनः॥ श्रोत्रियं सुभ
गां मग्निं गामग्निचितमेव च॥ प्रातरुत्थाय यः पश्येदापद्भ्यः स प्रमुच्यते॥ श्रोत्रियल राम:
क्षणं भारते॥ जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते॥ विद्यया याति विप्रत्वं त्रिभि ४०
श्रोत्रिय उच्यते॥ याज्ञवल्क्यः॥ स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति॥ एकदे
शमुपाध्याय ऋत्विग्यज्ञकृदुच्यते॥ नारदः॥ लोकेऽस्मिन्मंगलान्यष्टौ ब्राह्मणो गौर्हु

ताशनः॥ हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः॥ एतानि सततं पश्येन्नमस्येदर्च
येद्बुधः॥ प्रदक्षिणानि कुर्वीत यस्तस्यायुर्न हीयते। इति मंगलावेक्षणं॥ इति श्रीमन्नाग
देवभट्टात्मज श्रीमदनंतभट्टविरचिते विधानपारिजाते आह्निकविधौ दिनप्रथमभा
गकृत्यसमाप्तं॥ श्रीकृष्णार्पणमस्तु॥ ॥अथ द्वितीयभागेऽध्ययनं कार्यं॥ तत्र दक्षः
॥द्वितीये च तथा भागे वेदाभ्यासो विधीयते॥ समित्पुष्पकुशादीनां स कालः समुदाहृतः
वेदाभ्यासोऽनेकधा भवति॥ वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं पुनः॥ तद्दानं चैव शि
ष्येभ्यो वेदाभ्यासो हि पंचधेति॥ तत्र तावदृष्यादिकमुच्यते॥ ॥ऋग्वेदस्याग्निर्ऋषिः
अग्निर्देवता गायत्री छंदः॥ अध्ययनादौ विनियोगः॥ यजुर्वेदस्य वायुर्ऋषिः वायु
र्देवता त्रिष्टुप् छंदः॥ सामवेदस्यादित्य ऋषिः॥ आदित्यो देवता॥ जगती छंदः॥ अध्या
यनादौ विनियोगः॥ अथाध्ययनं च॥ गुरुं चैवाप्युपासीत स्वाध्यायार्थं समाहितः
आहूतश्चाप्यधीयीत लब्धं चास्मै निवेदयेदिति विधिना कर्त्तव्यं॥ अधीत्य वेदाः पर्वगते

वि०प० व्यः॥ अथिसविधिविवेदे वेदार्थं निर्विचारयेत्॥ ससान्वयः शूद्रसमः पात्रतां न प्रपद्यत
४१ इति स्मृतेः॥ कृतज्ञाद्रोहिमेधाविशुचिकल्यानसूयकाः॥ अध्याप्या धर्मतः साधुशक्ताप्त स्मृ०
ज्ञानवित्तदाः॥ कल्यः अथिव्याधिरहितः॥ शक्तो गुरुशुश्रूषायां स्येष्टमन्यत्॥ एते कृ ३
तज्ञत्वादयो धर्माः व्यस्ताः समस्ता वा यथासंभवं ज्ञेयाः॥ वेदाभ्यासरतं क्षांतं महा
यज्ञक्रियारतं॥ न स्पृशंतीह पापानि महापातकजान्यपि॥ मनुः॥ न निंदाताडने कु
र्यात्पुत्रं शिष्यं च ताडयेत्॥ अधोभागे शरीरस्य नोत्तमांगे न वक्षसीत्यादि॥ अथा
नध्यायाः॥ उशनाः॥ अयने विषुवे चैव शयने बोधने तथा॥ अनध्यायं प्रकुर्वीत रा०म०
मन्वादिषु युगादिषु॥ अहं प्रेते च नध्यायः शिष्यर्त्विग्गुरुबंधुषु॥ उपाकर्मणि चोत्स ४१
र्गे स्वशाखाश्रोत्रिये मृते॥ चतुर्दश्यां पंचदश्यां मष्टम्यां राहुसूतके॥ ऋतुसंधिषु भु
क्त्वा च श्राद्धिकं प्रतिगृह्य च॥ इदं चैकोद्दिष्टव्यतिरिक्तविषयं॥ महैकोद्दिष्टे त्र्यहं न कीर्त्त
येद्ब्रह्मेति विशेषोक्तेः॥ पशुमंडूकादिभिरंतरागमने होरात्रमनध्यायः॥ दशोम्सुचा वा

स्मिं चेति सप्तविंशादनध्याया याज्ञवल्क्योक्ताः कालिकाः॥ तथा रात्रौ यामद्वयादर्वाचा
दिप्रहरत्रयोदश्यां॥ प्रदोषः स्यात् विज्ञेयश्चतुर्थीदूर्ध्वयामगा॥ सप्तमी सार्द्धयामस्था प्रदो
षो धीति वर्जितः स्मृतिः॥ अत्र ... व्योचिर्षबालब्रह्मचारिप्रकरणे द्रष्टव्यः॥ इति श्रीविधानपारिजा
ते आह्निकविधौ द्वितीयभागः कृत्यं॥ ॥अथ धनार्जनविधिः॥ दक्षः॥ तृतीये च तथा भागे
पोष्यवर्गार्थसाधनं॥ पोष्यवर्गस्तु॥ मातापितागुरुर्भार्या प्रजादीनः समाश्रितः॥ अभ्या
गतोऽतिथिश्चाग्निः पोष्यवर्ग उदाहृतः॥ योगीश्वरः॥ उपेयादीश्वरं चैव योगक्षेमार्थ
सिद्धये॥ ईश्वरमभिषेकादिगुणयुक्तमन्यं वा श्रीमंतं॥ अलब्धलाभो योगः॥ लब्धस्य
रक्षणं क्षेमः॥ मनुः॥ सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः॥ प्रयोगः कर्मयोगश्च
सत्प्रतिग्रह एव च॥ दायोन्वयागतं धनं॥ लाभो निधिदर्शनं॥ प्रयोगो वृद्ध्यर्थं धनप्रदा
नं कर्मयोगः कृष्यादिः॥ इदं तु विप्रादेर्यथायोग्यं ज्ञेयं॥ तथाहि॥ अध्यापनमध्ययनं यज
नं याजनं तथा॥ दानं प्रतिग्रहश्चैव विप्रशुद्धाः प्रतिग्रहः॥ प्रधानं क्षत्रियेकर्म प्रजानां परि
पालनं॥ कुसीदकृषिवाणिज्यं पाशुपाल्यं विशः स्मृतं॥ कुसीदो वृद्धिजीवनं॥ शूद्रस्य द्वि

वि०प० जस्तु शुश्रूषात्तया जीवन्वृत्तिर्भवेत्॥ शिल्पैर्वा विविधैर्जीवेद्द्विजातिहितमाचरन्॥ मनुः॥ अद्रो स्त०
४२ हेणैव भूतानामल्पद्रोहेण वा पुनः॥ या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि॥ ऋता ३
मृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा॥ सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन॥ ऋत
मुंछशिलं ज्ञेयममृतं स्यादयाचितं॥ मृतं तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतं॥ सत्यानृ
तं तु वाणिज्यं तेन चैवापि जीव्यते॥ सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत्॥ तथा॥
कुसूलकुंभीधान्यो वा त्र्यहिको श्वस्तनोऽपि वा॥ कुसूलं कोष्टकं॥ कुंभी उष्ट्रिका ताभ्यां प
रिमितं धान्यं यस्य स तथोक्तः॥ त्र्यहपर्याप्तं धान्यं यस्य स त्र्यहिकः॥ नास्ति श्वस्तनं धा
न्यं यस्य सोऽश्वस्तनः॥ कुसूलधान्यादिसंग्रहोपायमाह याज्ञवल्क्यः॥ जीवेद्वापि शि रामः
लोंछेन श्रेयानेषां परः परः॥ शस्यादेर्निपतितपरित्यक्तकवचेरीग्रहणं शिलं॥ एकैकक ४२
स्य सक्तस्य कणस्योपादानं उंछः॥ एषां कुसूलधान्यादीनां मध्ये परः परः उत्तरोत्तरः
श्रेयान्प्रशस्यतर इत्यर्थः॥ एतच्चाति स्वयत्नं यायावरं प्रत्युच्यते तथा॥ न शालीनं प्र
ति॥ एतद्द्विविधं वासिष्ठेनोक्तं॥ द्विविधो गृहस्थो यायावरः शालीनश्चेति॥ तत्राति

संयतो यायावरः शालीनस्तु प्रेष्यचतुष्पदधनधान्यादियुक्तः॥ शालीनस्यापि चातुर्वि
ध्यमुक्तं मनुना॥ षट्कर्मैको भवत्येषां त्रिभिरन्यः प्रवर्तते॥ द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रे
ण जीवति॥ अत्र षट्कर्माणि याजनाध्यापनप्रतिग्रहकृषिवाणिज्यपाशुपाल्यानि॥ शेषं
सुगमं॥ कूर्मपुराणे॥ देवस्यापि त्रयस्य श्रद्धयान्दातृत्वं तु विशोके त्रिशन्दां गतु विप्राणां क्ष
पिहत्वनिदोषभाक्॥ कृषिप्रकारो वृद्धपाराशरे द्रष्टव्यः॥ अथापदि प्रतिग्रहवृत्तिः॥ चतु
र्विंशतिमते॥ सीदंश्चेत्प्रतिगृह्णीयाद्ब्राह्मणेभ्यस्ततो नृपात्॥ ततस्तु वैश्यश्च शूद्रान्यः श्री
रवस्य वचनं यथा॥ असीदतस्तु विद्यमाने धने यस्तु प्रतिगृह्णीयाद्द्विजः॥ रौरवं न
रकं प्राप्य तत्रैव परिपच्यत इति व्यासोक्तमाकलनीयं॥ याज्ञवल्क्योऽपि॥ राजांतेवा
सियाज्येभ्यः सीदन्निच्छेद्धनं क्षुधा॥ दम्भिहैतुकपाखंडिबकवृत्तींश्च वर्जयेत्॥ युक्ति
बलेन सर्वत्र संशयकारी हैतुकः॥ राजात्र न्यायपरः॥ न तु राजमात्रं॥ यो राज्ञः प्रति
गृह्णाति लुब्धस्योच्छास्त्रवर्तिनः॥ स पर्यायेण यातीमान्नरकानेकविंशतिमित्य

वि० प० न्यायपरराजप्रतिग्रहोनिंदाश्रवणात्॥ याज्ञवल्क्योपि। प्रतिग्रहे सूनिचक्रिध्वजिवेश्या
४३ नराधिपाः। दुष्टा दशगुणा पूर्वात्पूर्वाद्देते यथाक्रमं॥ सूनी प्राणिहिंसापरः। चक्री तैलिकः स्त०
ध्वजी सुराविक्रयी॥ वेश्यापरांगनस्त्री। यमोपि॥ अराजन्यप्रसूतस्य राज्ञः स्वच्छंदवर्त्तिनः २
॥ घोरः प्रतिग्रहस्तस्य मध्वास्वादो विषोपमः। तथैव राजमहिषीराजामात्याः पुरोहिताः
पापेनाथेन संयुक्ताः सर्वे ते राजधर्मिणः॥ भारते — नधर्मी वेदविक्रयिणो ये च
वेदानां चैव दूषकाः। वेदानां लेखकाश्चैव ते नै निरयगामिनः॥ मनुः॥ एधोदकं
मूलफलमन्नमभ्युद्यतं च यत्॥ सर्वतः प्रतिगृह्णीयान्मध्वथाभयदक्षिणां॥ स
र्वतः शूद्रादपि। अभयदक्षिणां तु म्लेच्छादपीति ज्ञेयं कार्यः। अत्र विशेषो विष्णुपु राम:
राणे॥ संप्रोक्ष्य विप्रो गृह्णीयाच्छूद्रान्नं गृहमागतमिति॥ अत्र शूद्रान्नमामान्नं॥ ४३
ना आ शूद्रस्य पक्वान्नं गृहेऽनिषिद्धं॥ नद्यादिनो द्विजः॥ आददीतामममेतस्मादवृत्ता
वेकरात्रिकमिति मनूक्तेः। तथा॥ आमं मांसं मधु घृतं धानाः क्षीरमथोदितं॥ ॥

गुडं तक्रं च संग्राह्यं निवृत्तेनापि शूद्रतः॥ याज्ञवल्क्योपि॥ कुशाः शाकं पयो मत्स्या गंधाः
पुष्पं दधि क्षितिः॥ मांसं शय्यासनं धानाः प्रत्याख्येयं न वारि च। चकारद्गृहादि॥ अया
चिताहृतं ग्राह्यमपि दुष्कृतकर्मणः। अन्यत्र कुलटाषंढपतितेभ्यः तथा द्विषः इति विज्ञा
नेश्वरोक्तेः। कुलटादेः प्रत्याख्येयमेव॥ अयमुपदेशः प्रतिग्रहप्रवृत्तस्यैव न तु निवृत्तस्ये
ति विज्ञानेश्वरः॥ अथापद्वृत्तिः। बृहस्पतिः। अजीवन्स्वकर्मणा स्वेन विप्रः क्षात्रं समा
श्रयेत्॥ कौयी। कुसीदं कृषिवाणिज्यं प्रकुर्वीत स्वयं कृतं॥ तदभावे वाणिज्यं तद
भावे कुसीदकं॥ कुसीदो वृद्धिजीवनं वृद्धिमाह याज्ञवल्क्यः। अशीतिभागो वृद्धिः
स्यान्मासि मासि सबंधके॥ वर्णक्रमाच्छतं द्वित्रिचतुःपंचकमन्यथेति। असिति
भागः अशीतितमो भागः। अन्यथा बंधकरहिते प्रयोगे वर्णक्रमाद्द्वित्रिचतुःपंचकं
[illegible] नवर्णि॥ अयमर्थः॥ ब्राह्मणादधमर्णाद्द्विकं शतं॥ द्वौ भागौ अस्मिन्शते वृद्धि
[illegible] शतं॥ तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयत इति सत्ये राकन्॥

वि०प० ५४ एवं क्षत्रियादेस्त्रिकाकादिज्ञातं प्रतिमासं ज्ञेयं॥ विशेषांतरमाह स एव॥ कांतारगारक्त
दशकं सामुद्रा विंशकं शतं॥ द्विगुणा वास्यकृतां वृद्धिं सर्वे सर्वासु जातिषु॥ मनुः॥ नातिसां स्त०
वत्सरीं वृद्धिं नाभीष्टां तु पुनर्हरेत्॥ चक्रवृद्धिः कालकालिका वा-रिका कायिका- ३
च या॥ वृद्धेर्वृद्धिश्चक्रवृद्धिः प्रतिमासं तु कालिका॥ इच्छाकृता कारिका स्यात्का
यिका कायकर्मणा॥ हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत्॥ ब्राह्मणस्तु प
रिक्षीणः शनैर्दाप्यो यथोदयं॥ मनुः॥ वानस्पत्यं फलं मूलं दार्वग्न्यर्थं तथैव च॥
तृणं च गोभ्यो ग्रासार्थमस्तेयं मनुरब्रवीत्॥ यत्तु भारते लिखितस्याष्टहस्तकृतं
गृह्णतो हस्तकर्त्तनं तत्प्रकारांतरेण निर्वाहे सति तत्थानकार्यमित्येतदर्थमिप राम०
वधेयं॥ अंगिराः॥ व्याधितस्य दरिद्रस्य कुटुंबात्प्रच्युतस्य च॥ अध्वानं वा प्रवृत्त ५४
स्याभिक्षा च यैर्विधीयते॥ देवलः॥ याजनं योनिसंबंधं स्वाध्यायं सहभोजनं कृ-
त्वा सद्यः पतत्येव पतितेन न संशयः॥ उशनाः॥ पतिताद्धनमादत्ते मुद्गं वा ब्राह्मणो॥

यदि॥ कृत्वा तस्य समुत्सर्गमतिकृच्छ्रं समाचरेदिति॥ इति योगक्षेमविधिः॥ अथ चतुर्थभा
हेत्यं॥ ॥दक्षः॥ चतुर्थे तु तथा भागे स्नानार्थं मृदमाहरेत्॥ तिलपुष्पकुशादीनि स्नानं
चाकृत्रिमे जले॥ नदीषु देवखातेषु तडागेषु सरःसु च॥ स्नानं समाचरेन्नित्यं गर्त्तप्रस्रव
णेषु च॥ तत्र परनिर्जलैः स्नानं प्राहुः स्नानफलप्रदं॥ नवृक्षपापावारिमग्नानां यावत्सामि
वत्तत्समं॥ योगी॥ ब्राह्मणोः स्नातुमायातेः सहगच्छंति देवताः॥ पितरश्चापि गच्छंति वा
युभूता जलार्थिनः॥ गत्वोदकांते विविक्ते स्थापयेत्तान्यथाविक्षतौ॥ तान्मृदादिसंभारा
न्॥ त्रिधा कृत्वा मृदं तां तु गोमयं च विचक्षणः॥ मृदैकया शिरः क्षाल्यं द्वाभ्यां नाभेरथो
परि॥ अधश्च तिसृभिः कार्यः पद्भिः पादौ तथैव च॥ प्रक्षाल्य सर्वकायं च द्विराचम्य य
थाविधिः॥ मंत्रन्यस्तोपवीतं यन्नोद्धरत्त्वं कदाचनेति स्मृतेः॥ कुटस्थामेवोपवीतं क्षा
ऽनीयमित्युक्तं॥ तत्र विशेषो बह्वृचाह्निके मैत्र्यां॥ कंठाः कारणो वा ये च वाजसने-
यिनः॥ कंठादुत्तार्य सूत्रं तु कुर्वीरन्नेव ते द्विजाः॥ बह्वृचाः सामगाश्चैव ये चान्ये याजु-

चि०प० वा अपि॥ कंयादुत्तायस्तत्रं तु पुनः संस्कारमाप्नुयात्॥ तथा॥ लक्ष्मीमेवावगाहेत यदि स्याद
४५ शुचिर्नरः॥ आचम्य विधिवत् पश्चात्ततः स्नानं समाचरेत्॥ यमः॥ सपवित्रं करे कृत्वा आ स्त०
चम्य प्राङ्मुखः स्थितः प्राणायामत्रयं कुर्यात् कालज्ञानमतः परमिति॥ गंगाख्याति स्त्वि ३
स्थले विशेषो वामनपुराणे॥ नीयं तु कल्पयेद्विद्वान् मूलमंत्रेण मंत्रवित्॥ नमो नाराय
णायेति मूलमंत्र उदाहृतः॥ चतुर्हस्तसमायां तु चतुरस्रं समंततः॥ प्रकल्प्यावाहयेद्गं
गामेभिर्मंत्रैर्विचक्षणः॥ विष्णोः पादप्रसूतासि वैष्णवी विष्णुदेवते॥ त्राहि नस्त्वेन
सस्तस्मादाजन्ममरणांतिकात्॥ तिस्रः कोट्योऽर्द्धकोटिश्च तीर्थानां वायुरब्रवीत्॥ दिवि भु
व्यंतरिक्षे च तानि ते संति जाह्नवि॥ नंदिनीत्येव ते नाम देवेषु नलिनीति च॥ दक्षा पृथ्वी रा म:
च वीहगा विश्वकाया शिवामृता॥ विद्याधरी सुप्रसन्ना तथा लोकप्रसादिनी॥ एता ४५
नि पुण्यनामानि स्नानकाले प्रकीर्त्तयेत्॥ इति॥ प्रकारांतरमपि॥ नंदिनी नलिनी
सीता मालती च महापगा॥ विष्णुपादाब्जसंभूता गंगा त्रिपथगामिनी॥ भागीरथी

भोगवती जाह्नवी त्रिदशेश्वरी॥ द्वादशैतानि नामानि यत्र यत्र जलाशये॥ स्नानोद्यतः
पठेन्नित्यं तत्र तत्र वसाम्यहमिति॥ गंगायां तु तीर्थांतरं न स्मर्त्तव्यमित्युक्तं स्कांदे॥ गं
गा नदी समीपस्था चेन्नान्यां स्नाने नदीं स्मरेत्॥ यदि स्मरेत्तदा सद्यस्तस्य पुण्यं विनश्य
ति॥ स्नानकालेऽन्यतीर्थेषु जप्यते जाह्नवी जनैः॥ विना विष्णुपदीं कान्यत्समर्थमघ
शोधने॥ इति॥ ॥ अथ मध्याह्नस्नानविधिराश्वलायनगृह्यपरिशिष्टे॥ अथ म
ध्यंदिने तीर्थमित्य यो न स्यात् पाणिमुखे द्विराचम्यायतप्राणः शुचौ देशे खनित्रेण
मृत्पिंडमपास्य खात्वोपरि मृदं चतुरंगुलमुद्धृत्याधस्तान्मृदं खनित्वा गाय
त्र्यादाय गर्त्तमुद्वासितयापरिपूर्य मृदमुपात्तां शुचौ तीरे निधाय गायत्र्या प्रोक्ष्य
हस्ताद्यंगमनुलिप्य स्वात्स्नु सप्तकृत्वोऽयित्वादिसंनिरीक्ष्य तं ध्यायन् स्नायादेतन्म
लस्नानं प्राहुरथ तीरे द्विराचम्य तत्तीर्थमस्त्रेणादाय सव्ये पाणौ कृत्वा व्याहृति
भिस्त्रेधा विभज्य दक्षिणांगमस्त्रेण दशसु दिक्षु विक्षिप्योत्तरं तीर्थे क्षिप्त्वा

वि०प० तीयं गायत्र्याभिमंत्रितमादित्याय दर्शयित्वा तेन मूर्द्ध आपादं प्लावयेत्स्या प्रवचनेनवा स
५६ र्वांगमनुलिप्य सुमित्र्यान आपः ॐ षधयः संत्विति सकृद्दत्तुमिरात्मानमभिषिच्य दु स्ना०
र्मित्र्यास्तस्मै संतु योस्मान् द्वेष्टि यं च वयं द्विष्म इति मंत्रमभिद्धः क्षालयेद्दुःखवरणप्रा ३
यश्चित्तादिना तर्पणं तेनोक्तेन विधिना स्नायात्तत्र प्राग्वत्स्नयज्ञतर्पणाद्वस्त्रं निष्पी
डयेद्पुत्रादयो ह्यतेतत्पर्या इत्येषस्नानविधिस्तंदेतद्स्नैमवेऽहनिहिरेव कुर्याद्धोमा
दिशुन च गृहे मृदा स्नायन्निशीनोष्णोदकेन गृहे स्नानमन्मंत्रविधिं वर्जयेद्ध्रहिर्वा
श्रुचौ देशे संवेष्टश्चात्तु कुर्यादिति॥ अत्र न प्रातर्मृत्तिकास्नानं मध्याह्ने च गोमयो
रिति निषेधाद्गोमयस्नानं नोक्तं तदाश्वलायनविषयं॥ कात्यायनानां मध्याह्ने राम:
पितस्मृत्ये गोमयस्नानमुक्तं॥ तेषां प्रातःस्नानं संक्षेपेणाभवति। अनुदिते मित्या ५६
न्॥ तथा च छंदोगपरिशिष्टे कात्यायनः॥ अल्पत्वाद्धोमकालस्य बहुत्वात्स्नानक
र्मणः प्रातर्न तनुयात्स्नानं होमलोपो विगर्हितः॥ प्रातः संक्षेपतः स्नानं म [struck through]

ध्याह्ने तु सविस्तरमिति॥ अतश्च अथातो नित्यस्नानं नव्याख्या। विस्तारेण स्नानविधिरित्यं
तकंडिकोक्तः सर्वांगोपवृंहितं स्नानं मध्याह्न एव तेषां भवति। यथाह निति त्या॥ प्रातः
नित्यं स्नायद् नातुर इति कात्यायनवचनं तु प्रधानमृत स्नानपरं अनाहिताग्नि
परं वेति ज्ञेयं॥ प्रातर्न तनुयात्स्नानमिति तद्दुक्तेरेव॥ कात्याघमर्षणमंत्रमाहया
ज्ञवल्क्यः॥ जंबुकानाम गायत्री वेदवाजसनेयके॥ अंतर्जले सकृज्जप्त्वा ब्रह्म
हत्यां व्यपोहति॥ इदमापरममंत्रमुत्क्राम्येनो विमुंचति। तद्विष्णोरिति मंत्रेण
मज्जेदप्सु पुनः गायत्रीं चेष्ट्वावी स्वेष्टा प्राजापत्यर्षिकीस्मृता॥ अत्रोक्तौ संक्षेप
स्नानविधिमहयोगी याज्ञवल्क्यः॥ एष विस्तरतः प्रोक्तः स्नानस्य विधिरुत्तमः॥
असामर्थ्यान्नि कुर्याञ्चेत्तत्रायं विधिरुच्यते॥ स्नानमंतर्जले चैव मार्जनाचमने
तथा॥ जलाभिमंत्रणं चैव तीर्थस्य परिकल्पनं॥ अघमर्षणसूक्तेन त्रिरावृत्तेन
नित्यशः॥ स्नानाचरणमित्येतदुपदिष्टं महात्मभिरिति॥ अत्र विशेषमाह स एव॥

वि० प० मृदा स्नानं न कुर्वीत रात्रौ संध्यागतेषु च॥ नैमित्तिके तथा स्नाने तथा भौमार्कवारयोः
४७ ॥ तथा॥ भानौ भौमे त्रयोदश्यां नंदाभृगुमघासु च॥ मृदा स्नानं पिंडदानं कुर्यात्तिलत स्त० ३
र्पणं॥ पिंडदानमत्र कार्यं॥ निषंतु स्मृत्याह श्राद्धादिनवर्जं॥ आदित्ये हनि जन्म
र्क्षे तथा जन्मतिथावपि॥ भौमे न स्यादिने चैव न कुर्यात्तिलतर्पणं॥ भौमनंदिनेषु
श्राद्धमपि न कार्यं॥ येवामनं वर्यंति स्वधामिरिति श्रुतेरिति पारिजाते॥ स्नानां
गतर्पणादि पूर्ववत्॥ मध्याह्नसंध्यावंदने विशेषः पूर्वमेवोक्तः॥ ॥ अथ मध्या
ह्नसंध्या तर्पणप्रयोगः॥ स्ना॥ विद्याः कश्यप ऋषिः मध्याह्नसंध्या तर्पणे वि राम:
नियोगः॥ ॐ भुवः पुरुषं तर्पयामि॥ ॐ यजुर्वेदः॥ ॐ मंडलं॥ ॐ रुद्र रुचितां॥ ॐ अ ४७
तरात्मानं॥ ॐ सावित्रीं॥ ॐ वेदमातरं॥ ॐ सांकृतिं॥ ॐ संध्यां॥ ॐ युवतीं॥ ॐ रौद्रीं॥
ॐ उषसं॥ ॐ निर्मृजं॥ ॐ सर्वार्थसिद्धिकरीं॥ ॐ सर्वमंत्राधिपतिं॥ ॐ भूर्भुवः स्वः
पुरुषं॥ ततः उपस्थानादि सर्वं समाप्य॥ मध्याह्नसंध्यां गत्वेन गायत्र्या जपितेन च॥

यथासंख्येन जप्तेन रुद्रो मे प्रीयतामिति वासिष्ठोक्तमंत्रेण जपं निवेद्य मुद्रादि प्रदर्शयेत्॥ ब्र
ह्मयज्ञं कुर्यात्॥ ॥ तत्र स्मृतिः॥ शातातपः॥ अथ ब्रह्मयज्ञः स्वाध्यायो वै ब्रह्मयज्ञ इ
त्यादि॥ योगी॥ प्रदक्षिणं समावृत्य नमस्कृत्योपविश्य च॥ दर्भेषु दर्भपाणिः स्यात्प्रा
ङ्मुखस्तु कृतांजलिः॥ स्वाध्यायं च यथाशक्ति ब्रह्मयज्ञार्थमारभेत्॥ अत्र कर्मादौ
पवित्रादि प्राप्तावपि दर्भपाणिरिति पुनर्वचनं पवित्रोपग्रहव्यतिरिक्त दर्भप्राप्त्य
र्थं॥ ब्रह्मयज्ञे च ये दर्भास्ते कथं यागो विधीयते इति तेषां त्याग उच्यते॥ तनु
पवित्रादेः॥ योगी॥ आदावारभ्य वेदं तु स्नात्वोपर्युपरि क्रमात्॥ मैयदधीते त्व
हरहस्तत्स्वाध्याय इति स्मृत इति॥ ॥ अस्वाध्याय मपर्याः॥ स्नात्वा कृपादिकं
स्मृत्वा ॐकारव्याहृति गायत्री पूर्वकं मंत्रं॥ ब्राह्मणादिकं वेदं प्रणवांतं यथा
शक्ति पठित्वा प्रतिदिनमेवमेवोपर्युपर्यध्ययनेन समाप्यान्यं वेदमारभ्यैवमेव
समापयेदिति॥ ऋषिं छंदो देवतानि विनियोगं तथैव च॥ अविदित्वा जपेद्यस्तु

वि०प०
४८

महान्तमिवाप्नुयात्॥ आश्वलायनः। ब्रह्मयज्ञस्य यश्चैव गृह्योक्तो विधानतः॥ स्वाध्यायं
प्रणवाद्यं तं कुर्याद्वै वेद्द्विजः सदा॥ तदंते तर्पयेद्देवानृषीन्पितॄंस्तथा॥ शौनकोऽत्र विशे स्त्रि० ३
षमाह॥ ग्रामात्प्राच्यामुदीच्यां वा प्रागुदीच्यामथापि वा॥ निष्क्रम्य तत्र नादेये नद्यां स्व
पिवां तेषि॥ स्नात्वा यज्ञोपवीती च भूत्वाचम्योदके तथा॥ पवित्रे लक्षणोयुक्ते कृत्वा दक्षि
णे सुतारके॥ तयोरेकैकमेकैकपाणिनाधारयेत्पृथक्॥ एवं पवित्रवंतौ द्वौ पाणी
कृत्वा द्वयोरपि॥ सव्यस्य पाणेः — अंगुष्ठप्रदेशिन्योस्तु मध्यतः॥ दक्षिणस्यांगुलीन्य
स्य च तस्यांगुष्ठवर्जिताः॥ तथा सव्यकरांगुष्ठं दक्षिणांगुष्ठवेष्टितं कुर्वीत तच्चैव संबद्धौ रामः
पाणी दक्षिणजानुनि॥ निधाय स्वस्य हृदये पश्यन्केवलमंबरं॥ संमीलिताक्षयुग्मो ५८
वा निरुध्य मनसो गतिं॥ योगाधिरूढमात्मानं कृत्वा नन्यमनास्ततः॥ यावंतं मंत्रम
ध्येतुं शक्यस्वध्यायमात्मनः॥ तावंतमनुवाकं वा सूक्तं च गमिष्यापि वा॥ संकल्प्य म
नसा पूर्वमिदमध्येष्य इत्यथ॥ समस्ता व्याहृतीः पूर्वं जप्त्वा प्रणवपूर्विकाः॥ सावित्रीं च

जपेत्पश्चात् पूर्वमर्द्धर्चशस्ततः॥ पश्चात्समस्तामित्येवं जपित्वा त्रिः समाहितः॥ ततो यावत्
प्रतिज्ञातमध्यायं सूक्तमेव वा॥ ऋचं वाप्यनेकं वा त्वध्यायमधीयीत स्वशक्तितः॥ पश्चादेन
मरस्या चाकरोमीसंतसंयुतं॥ ऋचं जपित्वा पश्चादोमित्येवं समुदीयेत्॥ यद्वा पादति
थिभ्यः स्याद्ब्रह्मयज्ञस्य दक्षिणेति॥ माध्याह्निकात्पूर्वमेव तर्पणं चाग्निवेदिनां॥ अन्ये
षां स्वस्वगृह्योक्ते पश्चाद्वा पूर्वमेव वेति स्मृत्यंतरं॥ जप्यानाहाश्वलायनः॥ ऋचो यजूं
षि सामान्यथर्वांगिरसो ब्राह्मणानि कल्पं गाथाः नाराशंसीरितिहासपुराणानीति॥ ऋ
धाने॥ अग्निमीळे जपेत्पूर्वं तत्पापघ्नीकरं परं॥ पाराशरे तु वालौ तस्य तस्य वेदानां॥
वैसरहस्य स्वशाखिना॥ यमः ओंकारव्याहृतीस्त्वाद्यं त्रीं त्रिपदां तथा॥ मनसैव मनुस्त
स्य वेदादिकमुपक्रमेत्॥ स्वरवर्णलिखितं मात्रास्थानक्रियान्वितं॥ दैवमेवं पठेद्य
स्तु स्वाध्यायकमकृत्वा मनुः॥ वेदोपकरणे चैव स्वाध्याये चैव नैत्यके॥ नानुरोधो
स्त्यनध्याये होममंत्रेषु चैव हि॥ तथा ब्रह्मयज्ञपुरुषसूक्तस्य फलातिशयमुक्तं॥ मा

वि० प० ४९ मात्स्ये॥ ब्रह्मयज्ञे जपेत्सूक्तं पौरुषं चिंतयन्नृपः हरिं। सर्वान्नृ जपते वेदान् सांगोपांगान्द्वि स्त्रि० ३
जोत्तम इति॥ एवमुक्तविधिना ब्रह्मयज्ञं कृत्वा स्वगृह्योक्तमार्गेण देवऋषिपितॄन्
~~स्वगृह्योक्तस्वस्वशाखोक्त~~ स्वशाखोक्तपितृतर्पणं कुर्यात्॥ अथ तर्पणे धर्मा उच्यंते॥ स्मृ
त्यर्थसारे॥ ॥स्थले स्थाद्यां तेरपात्रे रोमकूपेन कुत्रचित्॥ असंस्कृतप्रमीतानां स्थ
थंले दद्याज्जलांजलिं। दाल्भ्यः॥ ब्रह्मयज्ञे जपे होमे देवर्षिपितृकर्मणि ॥अन्ये कृ
त्यकृतं सर्वं निमवंक्षिष्ठिकारकमिति॥ तेन तर्पणप्रयोगे ॐकारः प्रयोक्तव्यः॥ हा
रीतः॥ आर्द्रवासा जले कुर्यात्तर्पणाचमनं जपं॥ शुष्कवासाः स्थले कुर्यादिति वेद
विदो विदुः॥ तर्पणं जलप्रक्षेपस्तु जले स्थले वा कार्यः। यत्तु कार्ष्णाजिनिकारः देवा रामः ४९
नां च पितॄणां च जले दद्याज्जलांजलिमिति तदशुचिस्थलविषयं॥ तथा च वि
ष्णुः॥ यत्राशुचि स्थलं च स्यादुदके देवताः पितॄन्॥ तर्पयेत्तु यथाकाममप्सु
सर्वं प्रतिष्ठितं॥ सव्येनेत्यर्थः॥ एकैकमंजलिं देवा द्वौ तु सनकादयः॥ अर्हंति पि

तरस्त्रीं स्त्रीस्त्रियं एकैकमंजलीमिति॥ व्यासः॥ यत्तु॥ अन्वारब्धेन सव्येन पाणिना द
क्षिणेन तु॥ इति योगिवचनं॥ तथा॥ उभाभ्यामपि पाणिभ्यामुदकं यः प्रयच्छति॥
स मूढो नरकं याति कालसूत्रमवाक्शिरा इति व्यासवचनं च तच्छ्राद्धादिविषय
मिति मदनपारिजाते॥ युक्तमेतत्॥ श्राद्धे विवाहकाले च पाणिनैकेन दीयते॥ तर्प
णे तूभयेनैव विधिरेष पुरातन इति कार्ष्णाजिन्युक्तेः॥ यद्वा येषां शाखायां विशिष्टे
कहस्तेन तर्पणमुक्तं तद्विषयमिति ज्ञेयं॥ मात्स्ये॥ उभयोर्हस्तयोः कृत्वा सलिलैः
पूर्णांजलिं देवानां च पितॄणां च शुचिस्तर्पणमाचरेत्॥ प्रागग्रेषु तर्पयेद्देवानेव
पितृतर्प द्विगुणीकृत्य तर्पयेत्स्वयं॥ प्राचीनावीत्याह लक्षणमुक्तं भारद्वाजेन॥ उद्धृते
वामबाहौ तु दक्षिणस्कंधमाश्रितं॥ प्राचीनावीतमित्याहुस्तत्पित्र्ये कर्मसु॥
कंठावलंबितं चैव ब्रह्मसूत्रं यदा भवेत्॥ तन्निवीतमिति ख्यातं शस्तं कर्मणि। मानु
षे॥ पथाप्य[illegible] स्थानस्थितं सव्यं दैवके कर्मणि शस्यते॥ देवर्षिदिव्यपितृतर्पणं तु निवपि

वि० प० हकस्यापि भवति। जीवपितृकोप्येतानन्यांश्चेतर इति कात्यायनोक्तेः। न जीवत्पितृ
५० कः कुर्यादिति निषेधस्तु स्वपितृतर्पणविषयः। तस्यापसव्यप्रकारमाह मनुः। अप स्त०
सव्यं द्विजाग्र्याणां पित्र्ये सर्वत्र कीर्त्तितं। आप्रकोष्ठात्प्रकर्त्तव्यं मातापित्रोस्तु जीवतोरि ३
ति। आप्रकोष्ठात् प्रकोष्ठपर्यंतं। न जीवत्पितृकः कुर्यात्तिलैः कृष्णैश्च तर्पणमिति
कृष्णतिलनिषेधात्। तत्तर्पणे शुक्लतिला एव ग्राह्याः। अतिलमेव तत्तर्पणमिति
केचित्। पराशरः। शुक्लैस्तु तर्पयेद्देवान्मनुष्यान्शबलैस्तिलैः। पितॄन्संतर्पये
त्कृष्णैस्तर्पणे सर्वदा द्विजः। कौर्मे तु। देवान्ब्रह्मऋषींश्चैव तर्पयेदक्षतोदकैः।
पितॄंस्तिलैश्च संतर्प्येदिति धर्मविदो विदुरिति। तथा च देवर्षिपितृतर्पणे यवैर्वाकु रामः
शतिलैर्वेति विकल्पः। बाहुद्वंतिलैः कृत्वा जलस्थलपयोमिनेते। स्थलस्थे ५०
नन कर्त्तव्यं पितृणां प्रीतिमिच्छतेति पराशरः। यत्तु समसंस्थे तिलैर्नैव तर्प
णमिति मानपितृनिति तत्तु स्थलतर्पणविषयं। योगी। आवाहनपूर्वं मंत्रैरास्ती

र्पयच्छ्रंशुमान्। प्रागग्रेषु सुरान्सस्याद्दक्षिणाग्रेषु वै पितॄन्। आवाहनमंत्राः
विश्वेदेवास आगतेति आद्या देवर्षिपितृलिंगका ग्राह्याः। कुशास्तरणमपि स्थ
ले तर्पणविषयं। जले त्वसमवायात्। यमः। द्वौ हस्तौ युग्मतः कृत्वा पूरयेदुदकांज
लिं। गोशृंगमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत्। प्रादेशमात्रमुद्धृत्य सलिलं प्राङ्मु
खः सुरान्। उदङ्मनुष्यांस्तर्पयेत्पितॄन्दक्षिणतस्तथा। सुरर्षिकर्म कुर्वाणः
सव्यजानु निपातयेत्। पितॄणां कर्म कुर्वाणो वामजानु निपातयेत्। पाणिनैक
गुणं प्रोक्तं दर्भैः शतगुणं भवेत्। तर्पणं खड्गपात्रेण ह्यक्षय्यमुपकल्पते। दक्ष
। कुशाग्रैस्तर्पयेद्देवान्मनुष्यान्कुशमध्यतः। पितॄन्मध्यसमूलाग्रैस्तर्पणं तु यथा
क्रमं। खड्गमौक्तिकहस्तेन कर्त्तव्यं पितृतर्पणं। मणिकांचनदर्भैर्वा न निरन्त्यै
न कादाचनेति शातातपवचनादन्यो हस्तः खड्गादिमुद्रिकया कर्त्तव्यः। न तु
खड्गादिपात्रपरत्वेन। अन्यथाऽर्हंति पितरः स्त्रीस्त्रीनिजे तं तिलविधायकवा।

वि०प०
५१

पयबाधायते॥ अहं ते वोक्तं योगिना॥ अनामिकधृतं हेम तर्जन्यां रौप्यमेव च॥ क
निष्ठिकाधृतं खड्गं तेन पूतो भवेन्नरः इति॥ यद्वा त्रिष्टाचोर रक्षार्थं यस्मिन् सक्षम स्त०
पात्रे धृते ऽङ्गुलिभंगो न भवति तद्रौप्यमित्यध्यवसेयं॥ तथा च छागलेयः॥ लघुपात्रं ३
करे कृत्वा सौवर्णं खड्गमेव वा॥ राजतं ताम्रजं वापि तेन संतर्पयेत्पितॄन्॥ तथा॥
जलं ते तिलदर्भादीन्यनुष्ठानीयथा चते॥ नानुष्ठानफलं तस्य तत्तु रे वहितल्कद्वं॥
जलं ते निषेधादन्यत्र तदग्रहणे न दोषः॥ देवातिथ्यर्चने छते गुरुणं यादि चरितये॥
सर्वतः प्रतिगृह्णीयादित्युक्तत्वात्॥ तिलापवादमाह मरीचिः॥ सप्तम्यां रवीवा
रे च गृहे जन्मदिने तथा॥ भृत्यपुत्रकलत्रार्थी विकुर्यात्तिलतर्पणं॥ अन्यत्रापि रामः
पक्षयोरुभयो राजन् सप्तम्यां निशि संध्ययोः॥ विद्यापुत्रकलत्रार्थी तिलांश्चै ५१
वं सुवर्जयेत्॥ तथा॥ सप्तम्यां रविवारे च जन्मर्क्षदिवसे तथा॥ गृहे निषिद्धं
स्यात्तिलैस्तर्पणं तद्बहिर्भवेत्॥ बौधायनः॥ विवाहे चोपनयने चौले सति यथाक्रमं॥

वर्षमर्द्धं तदर्द्धं च नेत्या कुर्वीत तिलैस्तर्पणं॥ तस्य क्वचिदपवादमाह वसिष्ठः॥ उपरा
गे पितुः श्राद्धे अमावास्यां चैव संक्रमे॥ निषिद्धेऽपि हि सर्वत्र तिलैस्तर्पणमाचरेत्॥ कात्या
यनः॥ मन्वादियुगादि मरणे तीर्थपर्वविशेषतः॥ तिथिवारनिषेधेऽपि तिलैस्तर्पणमाचरेत्
॥ तथा॥ तीर्थे तिथिविशेषे च गयायां प्रेतपक्षके॥ निषिद्धेऽपि दिने कुर्यात्तर्पणं तिलमिति
त्रिस्थलिसेतौ॥ संग्रहे तु॥ कठाः कारावाश्च जायालायेच वाजसनेयिनः॥ सतिलैस्त
र्पणं कुर्युर्निषिद्धेष्वपि दिनेष्वपि॥ उद्धृतोदकतर्पणे तु॥ नरसिंहः॥ यद्युद्धृतं निषिंचेत्तु
तिलान्न संमिश्रयेज्जले॥ अतोऽन्यथा तु सव्येन तिलग्राह्या विचक्षणैः॥ अन्यथा
ऽनुद्धृतोदकतर्पणे मार्जनं तर्पणं श्राद्धं न कुर्याद्धारिधारया॥ कुर्याच्चेद्धारिधारभिस्त
स्य वै निष्फलं भवेत्॥ हेमरूप्यमयं पात्रं ताम्रं कांस्यसमुद्भवं॥ पितॄणां तर्पणे पात्रं मृ
न्मयं तु परित्यजेत्॥ षड्विंशदंगुलं पात्रमुत्तमं परिकीर्तितं॥ मध्यमं तु त्रिभागोनं क
निष्ठं द्वादशांगुलमिति शिवरहस्ये॥ तर्पणस्यावश्यकतामाह कात्यायनः॥ द्वा

वि०प० यां यथेष्टं रदात पार्न्नः पयः पियासुः क्षुधितो लमन्नं॥ बालो जनित्रीं जननीव बाले
५२ यो विसुमांसं पुरुषश्रयो वा॥ तथा सर्वाणि भूतानि स्थावराणि च॥ विप्रादुदकमिच्छ स्मृ०
ति सर्वाभ्युदयहेतवे॥ पतिसंन्यासि जीवत्पितृकस्तु देवर्षिदिव्यपितृतर्पणं कृ ३
त्वा स्वपितृपित्रादिभ्योपि तर्पयेत्॥ तदाह लौगाक्षिः॥ वृद्धौ तीर्थे च संन्यस्ते ताते च प
तिते सति॥ येभ्य एव पिता दद्यात्तेभ्यो दद्यात् स्वयं सुतः॥ अविभक्तै रपि भ्रातृभिर्ब्रह्म
यज्ञतर्पणे कार्ये॥ भ्रातृणामविभक्तानामेको धर्मः प्रवर्त्तते॥ विभागे सति ध
र्मस्तु भवेत्तेषां पृथक् पृथक्॥ होमाग्निदानरहितं न भोक्तव्यं कदाचन॥ अविभ रामः
क्तेषु यस्सृष्टेनैकेनापि कृतं कृतं॥ पृथग्गेहपाकानां ब्रह्मयज्ञो द्विजातिनां अग्नि ५२
होत्रं सुरार्चा च संध्या तर्पणमेव च॥ याज्ञवल्क्यायनोक्तेः॥ जपस्तु तीर्थयात्रा का
र्यमेव पृथक् पृथग् अग्निहोत्रमं त्रौपासनं॥ अग्निहोत्रस्य निषिद्धत्वात्॥ त
र्पणक्रममाह वसिष्ठः॥ देवानां तर्पणं पूर्वमृषीणां तदनंतरं॥ ततो दिव्यपितॄ

णां च स्वकीयानां ततः परं॥ व्यासः॥ पूर्वं पित्रादयस्तर्प्यास्ततो मात्रादयोपि च॥ ततो
मातामहाश्चैव मातामह्यस्ततः परं॥ हेमाद्रौ॥ पितृमातृमातामहपितृव्यभ्रातरः
सुताः पितृष्वसा मातुलाश्च ननान्द्रः भगिन्यश्च जामयः॥ भार्या पितृव्यपुत्राश्च भ्रातरः
श्वशुरपुत्रास्तथैव च॥ दुहिता श्वशुरः श्चैव मावबुका गुरवस्तथा॥ आचार्यः सुहृदः
शालाउपाध्यायश्चर्त्विकः रुवाभिन स्वसखायश्च मातापित्रोश्च बांधवाः॥ आ
त्मनो बांधवाश्चैव ज्ञाताज्ञाता यथाक्रमं॥ तर्पणीया गयाश्राद्धे तीर्थे महालयेऽक्र
मरति॥ संग्रहे तु॥ तातांबात्रितयं सपत्नजननी। मातामहादित्रयं सस्त्रिस्त्रीतना-
यादितातजननीस्वभ्रातरः सस्त्रियः॥ ताताम्बात्मभगिन्यपत्यधवयुग्जायापिता-
सद्गुरुः शिष्याप्ताः पितरो महालयविधौ तीर्थे तथा तर्पणे॥ इति अत्र इति पितरः स्त्री
स्त्रीस्त्रियः एकैकमंजलिमित्युक्तं। तत्र विशेषमाह शालंकायनः॥ मातृमुख्यास्तु या
स्तासां तासां दद्याज्जलाञ्जलीन्॥ त्रीस्त्रीश्चैव तथान्यासां दद्यादेकैकमंजलिं॥ स

वि०प० पत्न्याचार्यपत्नीनां द्वौ द्वौ दद्याज्जलांजली। सपत्नि माता॥ आचार्यः प्रसिद्धः। पर
५३ त्नीआत्मनः स्वस्य मातरि जीवंत्यां सपत्नी जननी मृता॥ तर्प्पयेत्केवलामेकां पुत्रि स्त०
णी वाप्यपुत्रिणीं तथा॥ सपिंडीकरणादूर्ध्वं पित्रोरेव हि पार्वणं॥ पितृव्यभ्रातृमा ३
तृणामेकोद्दिष्टं न पार्वणमिति हेमाद्रौ॥ ज्ञातृकर्तृका त्वेकरपं विशेषः॥ मातामहतर्प्प
णानंतरं मातृवंस्य तर्प्पणं कार्यमिति केचित्॥ तन्न॥ अनंतर मातामहात्तु कुल्या मातृ
णां य। प्रयच्छति स मूढो नरकं याति यावदाभूतसंप्लवमिति हेमाद्रौ निषेधात्॥
न चैतदन्यविषयं पितृभ्यस्तर्प्पणं कुर्यात्तितो मातृभ्य एव च॥ ततो मातामहानां च क्र
मेणैव च तर्प्पणमिति हारीतोक्तेः॥ तर्प्पणेरस्तु पलक्षणा सिंहकानादावप्येवमेव ज्ञे राम:
यं॥ प्रयोगक्रममाह यमः। संबंधमनु प्रथमं ब्रूयान्नाम गोत्रमतः परं॥ आद्धृत ५४
र्प्पणे चैव विधिरेष सनातनः। वसिष्ठः। संबंधमुत्कीर्त्य नामगोत्रमनंतरं॥ र
स्यादिरूपं संकीर्त्य स्वधाकारेण तर्प्पयेत्॥ योगी तु॥ तृप्यत्विति समुच्चार्य तृप्यता

मित्यादि याषि वा॥ विधिज्ञः प्रक्षिपेत्तोयं देवादीनां मंत्रेणतः। अमुं तर्प्पयामीति वा प्र
योगः॥ नामांते तर्प्पयामीति याद्दाकोमिति च ब्रुवंति कात्यायनोक्तेः॥ तथा च यथा
सूत्रं प्रयोगव्यवस्था द्रष्टव्या॥ यमतर्प्पणं तु काम्यं दिने विशेषणाव॥ तथाह वृद्धम
नुः। यांकांचित्सरितं प्राप्य कृष्णपक्षे चतुर्दशीं॥ यमुनां तु विशेषेण नियतो नियतें
द्रियः॥ यमाय धर्मराजाय मृत्यवे चांतकाय च॥ वैवस्वताय कालाय नीलाय पर
मेष्ठिने वृकोदराय चित्राय चित्रगुप्ताय वै नमः॥ इत्येतैर्नाममंत्रैस्तु प्रणवादिनमों
तकैः॥ तर्प्पयित्वा यमं देवं सर्वपापैः प्रमुच्यत इति। स्कांदे तु॥ कृष्णपक्षे चयोदश्या
मंगारकदिने यदि। तदा स्नात्वा शुभे तोये तर्प्पयेद्यमनामभिरित्युक्तेः॥ यमतर्प्पणं वा
जसनेयिनां नित्यं तु काम्यं॥ तत्र चैनित्यत्वे न विधानादिति केचित्॥ सर्वतर्प्पणां
ते ब्रह्मवैवर्त्ते विशेष उक्तः। यत्र क्वाचनसंस्थानां क्षुत्तृष्णोपहतात्मनां॥ तेषां
हि दत्तमक्षय्यमिदमस्तु तिलोदकं॥ संग्रहे तु॥ आब्रह्मस्तंबपर्यंतं देवर्षिपि

वि० प० त्रमानवाः॥ तृप्यंतु पितरः सर्वे मातृमातामहादयः॥ अतीतकुलकोटीनां सप्तद्वीप
५४ निवासिनां॥ आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकं॥ एवमुक्तविधिना संतर्प्यव स्त० ३
स्त्रं च तु गृहीत्वा यस्य लेपस्य नैव निष्पीडयेत्॥ तदाह पराशरः॥ एवं कृततर्प्पणो-
ऽकृत्वा सर्वेषां विधिवद्द्विज॥ निष्पीडयेत्स्नानवस्त्रं तिलदर्भसमन्वितं॥ नैव पूर्वं तर्प-
णाद्वस्त्रं नचोन्मत्सिनपादयोः॥ शिखास्वेदोदकं नैव द्विगुणं त्रिगुणं नवा॥ एतेषु
पीडयन्वस्त्रं सव्यं सी कुरुते क्रियां॥ यत्तु॥ द्वादश्यां पंचदश्यां च संक्रमे श्राद्धवास
रे॥ वस्त्रं निष्पीडयेन्नैव न च क्षारेण योजयेदिति तत्तु समंत्रनिष्पीडननिषेधपरं॥ मंत्रस्तु
॥ ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः। ते गृह्णंतु मया दत्तं वस्त्रनिष्पी रामः
डनोदकं इति॥ अथ श्राद्धांगतर्पणविशेषः॥ प्रयोगपारिजाते॥ दर्शे तिलोदकं ५४
पूर्वं पश्चाद्द्द्यान्महालये॥ मातापित्रोः क्षये पूर्वं न पश्चात्तु परेहनि॥ वर्गैकस्य
क्षये येषामन्येषां तु विवर्जयेत्॥ वृद्धशातातपः॥ पूर्वेति लोदकं दत्वा श्राद्धमश्रा

द्धं समाचरेत्॥ प्रत्यब्दे केचिदेवम् एवं परेहनि तिलोदकं॥ हारीतोपि क्षयाहं प्रकृत्या-
ह॥ ततः परेह्नि कुर्वीत तर्पणं पुरुषः सुधीः॥ तद्दिने वा तिलदर्भैस्तु प्रातः स्नात्वा सुधी
समं॥ गार्ग्यः॥ परेद्युः श्राद्धकृन्मर्त्यो यो न तर्पयते पितॄन्॥ अतृप्ताः पितरस्तस्य शा
पं दत्वा व्रजंति ते॥ स्नात्वा तीरं समासाद्य उपविश्य कुशासने॥ संतर्पयेत्पितॄन्
भक्त्या त्वा वस्त्रं च धारयेत्॥ इदं श्राद्धदेवतामात्रपितृविषयं॥ तेन नित्यतर्पणं वह्न्य
देवत्यं श्राद्धदिने यथाकालमेवेत्येव॥ अत एव निषिद्धपिदिने कुर्यात्क्षयाहे तिलत
र्पणामिति वचनं पुत्रस्य तेन नित्यतर्पणविषयत्वेन॥ अन्यथा क्षयाहे तर्पणमेवना
स्तीति कुत्र प्रतिप्रसवः स्यादित्युक्तं प्रयोगरत्ने नारायणभट्टैः॥ महालयश्राद्धे तु
देवर्षिपितृतर्पणं कृत्वा श्राद्धं कुर्यात्॥ श्राद्धानंतरं तु श्राद्धदेवतामात्रपितॄन् तद्
मेव तर्पयेत्॥ क्षयाहे तु नित्यतर्पणं पूर्वमेव कार्यं॥ श्राद्धांगमात्रतर्पणं षिः।
दिने संध्यावंदनोत्तरमेव कार्यं शिष्टाचारात्॥ तथा पक्षश्राद्धं तु निर्वर्त्य मे

वि० प० तां स्याद्दिनेदिने। सकृन्महालये दद्यात्परेहनि तिलोदकं॥ जीवमानपिता यस्य मं प स्त०
५५ यदि विपद्यति॥ मातुः श्राद्धं सुतः कुर्यान्न कुर्याद्धा ध तर्पणामिति संग्रहे॥ श्राद्धा उ०
पर्तो श्राद्धांगतर्पणामित्यर्थः॥ वृद्धिश्राद्धादौ तु मात्स्ये वा॥ वृद्धिश्राद्धे सपिंडे उच्यते २
त श्राद्धे तथैव च॥ समानु मासिके श्राद्धे न कुर्यात्तिलतर्पणामिति गार्ग्योक्तेः॥ तीर्थ
प्राप्तौ तु स्वगृहे रवाकौ तर्प्पणं तत्कृत्वा देवा यक्षास्तथा न॥ गादिस्यादि पुरातोक्त
मंत्रैर्देवान्सतर्प्य सनकः सनंदनश्चेति ऋषीन्संतर्प्य अग्निष्वात्तास्तथा सो
म्यश इति पितृन्तर्पतां च कुर्यादिति त्रिस्थलीसेतौ उक्तेः॥ तर्पणफलमाहा ब्रांखः
६२ एवयः सर्वान्तानि तर्प्पयेदन्वहं द्विजः। स्वगर्भपरमं स्थानं तेजोरूपं निरामय राम:
मिति॥ अकारणे नियोक्ता कात्यायनेन॥ अतर्पितदेहात्तु रुधिरं पिबंतीति॥ त ५५
र्पणानंतरं जले देवतार्चनमाह योगि याज्ञवल्क्यः॥ निष्पीडस्नानवस्त्रं तु
आचम्य विधिवत्ततः। देवानामर्चनं कुर्यात् ब्रह्मादीनाममत्सरः॥ ब्राह्मे वेदमं

त्रैर्द्दृष्टुसा विश्रैर्मंत्रवारुणैः॥ तल्लिंगैरेव मंत्रैस्तु अर्च्चयेत्सुसमाहितः॥ अथ च गंतो हृद
ये सूर्यं स्पृष्ट्वादि क्षत्ति मात्सुचा॥ पद्मस्य तेषु हरेः सम्यगान्व न मुनिभिः स्मृतमिति॥ तल्लिं
गा मंत्रा ब्रह्मजज्ञानमित्यादयः॥ अत्राथ स्परेन वरुपूजां केचिदिच्छंति। ततः सूर्याया
र्घ्यं दद्यात्॥ तदुक्तं नृसिंहपुराणे ततोर्घ्यं भानवे दद्यात्तिलपुष्पाक्षतान्वितं॥ उत्थाय
मूर्ध्नपर्यंतं गायत्रीमंत्रमुच्चरन्निति॥ योगी॥ ततोवलोकयेदर्कं हंसः शुचिषदित्यृ
चा॥ स्वयं परिस्तुप स्थायस्तयंत्याति प्रदक्षिणां॥ आदृत्यचन मस्कुर्यादिग्भ्यो दिग्देवतां
अपिति। प्रयोगस्तु ॐ प्राच्यै दिशे नमः इंद्राय नमः इत्यादि रूपोज्ञेयः। एवमुक्तविधिना
स्नानादि कृत्वा कलशे मुक्तमोदकेनार्घ्यपात्रस्तोत्रहं त्र्यै जेतु॥ तदुक्तं मात्स्ये॥ जलदेवं
नमस्कृत्या ततो गत्वा कृतं बुधः॥ पौरुषेण तु सूक्तेन ततो विष्णुं समर्चयेदिति॥ इति श्रीमद
नंतभट्टविरचिते विधानपारिजाते मध्याह्नस्नानादिविधिः॥ अथ गृहे देवतार्च्चनविधिः।
तत्र। विधाय देवता पूजां प्रातर्होमादनंतरं॥ दर्वाश्लिय एव कुर्वीत देवतानां च पूजनमि

वि०प० तिमरीचिवचनात् पूर्वाह्णोदेवतार्चनस्य मुख्यकालः॥ पौरुषेण तु सूक्तेन ततो विष्णुं स
५६ मर्चयेत्॥ वैश्वदेवं ततः कुर्याद्बलिकर्म तथैव चेति कूर्मपुराणोक्तो मध्याह्नकालो गौणः॥ स्त०
नारदीये तु॥ प्रातर्मध्यंदिने सायं विष्णुपूजां समाचरेत्॥ यथा संध्यास्तु तानि याद्देवपू ३
जा तथा बुधैः॥ अशक्तौ विस्तरेणैव प्रातः संपूज्य केशवं॥ मध्याह्ने चैव सायं च पुष्पा
ञ्जलिमपि क्षिपेदिति॥ पूज्यदेवताश्च निगमे दर्शिताः॥ ब्रह्माणं विष्णुमीशानं सूर्यमग्निं
गणाधिपं॥ दुर्गां सरस्वतीं लक्ष्मीं गौरीं वा नित्यमर्चयेत्॥ पाद्मेपि आदिसंगरा ना
यं च देवी रुद्रं यथाक्रमेत्॥ नरायणं विष्णुमुख्यमेते च कुलदेवताः॥ कौर्मे॥ न वि
ष्णवाराधनात्पुण्यं विद्यते कर्म वैदिकं॥ तस्मादनादिमध्यान्तं विष्णुमाराधयेन्नरः राम:
॥ तस्मिन्नाराधिते देवः सर्वमाराधितं भवेदिति॥ पंचायतनस्थापनक्रम उक्त आ ५६
चारदीपे॥ शंभौ मध्यगते हरीनहरभूदेव्यो हरौ शंकरेभास्यनागसुता रवौ हरग
णेशाजांबिकाः स्थापिताः॥ देव्यां विष्णुहरैकदंतरवयो लंबोदरे जेश्वरेनाद्याः शंक

रमागतौ निश्चयमद्य व्यस्ता स्युस्ते ह्यानिदाः॥ प्रधानस्य॥ शंकरभागतः॥ ईनसूर्य॥ आग्नेय्यां श
क्तिः॥ ईशान्यादि क्रमेणैव सर्वं॥ शेषं प्रसिद्धं॥ न्यासमाह योगी॥ अंगुष्ठे चैव गोविंदं त
र्जन्यां च महीधरं॥ मध्यमायां हृषीकेशमनामिकायां त्रिविक्रमं॥ कनिष्ठायां न्यसेद्विष्णुं
करमध्ये च माधवं॥ हस्तन्यासो मयाख्यातो द्विजातां पावनः परः॥ अग्नौ हुते च दत्ते
च देवतार्चनमेव च॥ हस्तन्यासप्रसादेन सर्वं भवति चाक्षयं॥ शारदातिलके॥ भूत
शुद्धिस्तथा प्राणप्रतिष्ठां मातृकस्ततः॥ संध्यादौ तु स्य हत्वा न कर्त्तव्याः पुनः पुनरि
त्युक्तेः॥ अथांगन्यासः॥ करयोः पादयोर्जान्वोः कट्यो नाभौ हृदि क्रमात्॥ कंठे बा
ह्वोर्मुखे नेत्रे मूर्ध्नि चात्मादितो न्यसेत्॥ अयं प्रत्यक्षं पुरुषसूक्तन्यासः॥ षडंगन्यास इह यो
के अन्याः षडूर्च उत्तरे॥ यथात्मनि तथा देवे न्यासं च परिकल्पयेत्॥ ॐकार पूर्वकै
र्मंत्रैः षोडशाभिः पृथक् पृथक्॥ न्यासेन तु भवेत्सोपि स्वयमेव जनार्दनः॥ आवाह
नासनं पाद्यमर्घ्यमाचमनीयकं॥ वस्त्रोपवीतेन गंधमाल्यादिभिः क्रमात्॥ धूपं दीपं

वि० प० नैवेद्यं नमस्कारं प्रदक्षिणं॥ षोडश्यो ह्यासनं देयं नायतो विधिः। स्नानेव स्त्रेच नैवेद्ये च पा
५८ द्याचमनीय॥ अर्घ्ये स्नाने तथा वस्त्रे उपवीतोपहारयोः। इति॥ आगमदीक्षावतस्तु तदागमो
क्तप्रकारेण न्यासान् कृत्वा वैदिकतांत्रिकमिश्रमार्गेण पूजा कार्या॥ तदुक्तं मेकादशस्कंधे रत० ३
वैदिकं तांत्रिकं मिश्रं त्रिविधं ते त्रिमिश्रकं॥ उत्तमं स्वर्चपूजानां विष्णुमक्तस्ये माधवेति॥ अत्रो
पयुक्तं लिख्यते॥ प्रक्षाल्य पादावाचम्य देवतायतनं विशेत्॥ समासीनस्तु संकल्प्य पा
त्रासादनमाचरेत्॥ आराधकः स्वस्य पुरः शंखस्थापनमाचरेत्॥ यत्र शंखे भुवि संस्था-
प्य पूजयेत्पुरुषोत्तमं॥ तस्य पूजां न गृह्णाति तस्मात्पीठं प्रकल्पयेत्॥ शंखोदकं स
दा पुण्यं अतिप्रियतमं हरेः॥ उद्धरिण्या जलं ग्राह्यं नाप्सु शंखे निमज्जयेत्॥ शंखस्य पृ राम: ५८
ष्ठे स्थले गन्तव्यः पापकरं ध्रुवं॥ तेन न स्नापयेद्देवं पूजानां स्नापसंभवः॥ सं— घर्षित वस्त्रे
ण लिंग संशोधितेजलैः॥ सुवर्णताम्ररजतपात्रे स्थे शंखसंस्थितेः॥ यद्दान्न तन्न म
त्वा त्र संस्थितेः स्नपयेदिति वैमित्यादि स्वपुराणोक्तपूजापाध्याये उक्तं॥ इति नारदीये॥ ॥

आत्मनो दक्षिणे भागे तुलस्यादि निधापयेत्॥ ॥ घृतदीपं च तत्रैव तैलस्य तु विपर्ययः॥ वाम
भागे जलैः पूर्णं शंखमेवं निधापयेत्॥ यथा देहे तथा देवे मंत्रन्यासं समाचरेत्॥ ऋषिभिर्मनुजै
र्वापि स्थापिते न समाचरेत् हस्तन्यासादिके देवे स्वगंन्यासं समाचरेत्॥ न्यासनिषेयः। स्था
वरपरः। चलाचलेति द्विविधा प्रतिष्ठा जाव मंदिरं उद्यासावाहने नस्तो। स्थिरायामुद्वावा
र्चने॥ अस्थिरायां विकल्पः स्यात्स्थंडिले तु भवेद्द्वयमिति भार्गवतोक्तेः॥ तथा॥ द्विजाना
मेव नान्येषां शालग्राम शिलार्चनं॥ स्त्रीणां वेवा यशूद्राणां विप्रहस्तेन पूजनं। स्त्रीणा
मनुपनीतानां शूद्राणां च जनेश्वर। स्पर्शने नाधिकारोस्ति विष्णोर्वा शंकरेपि वेति वृहन्ना
रदीये॥ कौर्मेपि॥ ब्राह्मणाय पिहरं विष्णुं न स्पृशेच्छूद्र यश्छति॥ सनातनाम्नतानाथावाते
स्पानास्ती हनि छक्कतिरिति। लिंगस्पर्शनिषेधोपीदानीतन प्रतिष्ठितलिंगविषयो न पु
नरनादि लिंगे विषयः॥ तथा च नारदीये॥ यदा प्रतिष्ठितं लिंगं मंत्रविद्भिर्यथाविधिः
॥ ततः प्रभृति शूद्रश्च योषिद्वापि न संस्पृशेदीति॥ दक्षिणानां द्विजान्येषां स्त्रीणामपि

वि० प० तथैव च॥ लिंगेस्य गुरुणा दत्ते पूजानान्यत्र सा स्मृते॥ इति नंदिपुराणोक्तेः॥ स्त्रीशूद्राणां
५८ पार्थिवलिंगादिपूजाधिकारो ज्ञेयः॥ ॥यत्तु॥ जपस्तपस्तीर्थयात्रा प्रव्रज्या मंत्रसाधनं॥ स्त०
देवताराधनं चैव स्त्रीशूद्रपतनानि षट्॥ इति तत्तु शालग्रामादिविषयमिति सर्वमनवद्यं॥ ३
निर्माल्योद्वासनं प्रातः कार्यमित्युक्तं नारदपांचरात्रे॥ यः प्रातरुत्थाय विधाय नित्यं निर्मा
ल्यमीशस्य निराकरोति॥ न तस्य दुःखं न दरिद्रता च नाकालमृत्युर्न च रोगमात्रं॥ क्रिया
सारे॥ मध्यमानामिकामध्ये पुष्पं संगृह्य पूजयेत्॥ अंगुष्ठतर्जनीभ्यां निर्माल्यमपनो
दयेत्॥ ग्राह्यपुष्पाणि नृसिंहपुराणे॥ पुष्पैररण्यसंभूतैः पत्रैर्वा गिरिसंभवैः॥ अपर्यु
षितनिश्छिद्रैः प्रोक्षितैर्जंतुवर्जितैः॥ आत्मारामोद्भवैर्वापि पुष्पैः संपूजयेद्धरिं॥ शमी रामः
शमीपुष्पं बिल्वपुष्पं चंपकं तगरं तथा॥ करवीरं तथा श्वेतं पाटलं कुशपुष्पकं॥ ५८
वनमालाप्यशोकं च सेवंती कुब्जमालती॥ त्रिसंध्यं च तथा श्वेतं कुंदं च शतपत्रकं
॥मल्लिका चैव जाती च सर्वपुष्पाधिशिष्यते॥ प्रयोगपारिजाते व्यासः॥ प्रतिमापीठ

यंत्राणां नित्यस्नानं न कारयेत्॥ कारयेत्सर्वदिवसे यदि वा मलधारणं॥ तथा॥ जातीपु
ष्पसहस्रेण दद्यान्माल्यं ~~वासं॥ तथा॥ जातीपुष्पसहस्रेण~~ सुशोभनं॥ विष्णवे विधि
वत्तयो तस्य पुण्यमनंतकं॥ अपामार्गभृंगराजं शमीपत्रं च खादिरं॥ दूर्वा च कुशप
त्रं च दमनं मरुकं तथा॥ ततः श्रेष्ठं बिल्वपत्रं ततस्तु तुलसी वरा॥ एतेषां च यथा लाभं
पत्रैरभ्यर्चयेद्धरिमिति॥ कलिका वर्ज्यान्यस्तकमलचंपकं॥ स्नातेन तु सीग्राह्याना
न्यथा राजवदद्गमे॥ अस्नात्वा तु संछित्वा देवार्चे पित्रकर्मणि॥ तत्सर्वं निष्फलं या
ति पंचगव्येन शुद्ध्यति॥ इति पद्मउक्तेः॥ अथ वर्ज्यपुष्पाणि विष्णुधर्मोत्तरे॥ उग्रगं
मा धीन्यगंधीनि कुसुं[illegible]नि तदापयेत्॥ अन्यथायतनजातानि कंटकीनि तथैव च॥ र
क्तान्यकालजातीनि चैत्यवृक्षोद्भवानि च॥ श्मशानजातपुष्पाणां दानं देवे विवर्जये
त्॥ काकरोरव्यास्य पुष्पाणि तथा धत्तूरकस्य च॥ कूष्मांडं च कुरंटं चार्कं नैवेदयेज्जना
र्दने॥ शिवस्य वर्ज्यानि प्रासाददीपिकायां॥ जपाबंधूकसिंदूरं तथा त्रैसंधिकेस्यमे॥

वि०प० मंदंती केतकी यूथी मालती कुटजातिच॥ बर्बरी स्पर्जपत्री च तथा च कुमुदद्वयं॥ आनी
५९ तं नार्पयेद्यस्तु मोः प्रमादादपि दोषहृत्॥ स्कांदे तु ग्राह्याणि युक्तानि॥ बार्हं नंकलिकारं स्तं०
च करवीरं तिलस्य च॥ बिल्वपत्रं च कल्हारमर्कं मंदारमेव च॥ नीलोत्पलं च रक्तं च क ३
मलं पद्मसंज्ञकं॥ कदंबं च कुसुमं च अशोकं बकुलं तथा॥ एवमादीनि पुष्पाणि वि
शिष्टानि शिवार्चने॥ काशीखंडे॥ कस्तूरिकाया द्वौ भागौ द्वौ भागौ कुंकुमस्य च॥ चंदन
उस्यत्र यो भागाः शशिनस्त्वेक एव हि॥ यक्षकर्दम इत्येव सुसमं सुरवल्लभः॥ गारुडे॥
कर्पूरं चंदनं दर्पः कुंकुमं च समांशकं॥ सर्वगंधमिति प्रोक्तं समस्तामरवल्लभं॥ ॥दे
वीपुराणे॥ विशेषः॥ ॥शिवे विवर्जयेत्कुंदमुन्मत्तं च हरेः सदा॥ देवीनां चार्कमंदारौ वा राम।
दित्ये तगरं तथा॥ ॥आचारदीपेपि॥ अक्षतैर्नार्चयेद्विष्णुं न तुलस्या गणेश्वरं॥ दूर्वा ५९
भिर्नार्चयेद्दुर्गां न केतक्या महेश्वरं॥ जलं पर्युषितं त्याज्यं पत्राणि कुसुमानि च॥ तुलस्य
गस्त्यबिल्वानि गंगावारि न दुष्यति॥ न निर्माल्यं हरेम पुष्पमर्पयेदपि लिंगस्य देति॥ तथा॥

वस्य नीतं स्वयं पतितमेव च॥ ऐरंडपत्रैरानीतं तस्य पूजा च निष्फला॥ योर्चयेद्विधिवस्तन्या
परानीतैश्च साधनैः॥ पूजाफलार्द्धमेवाप्नोति न समग्रं फलं लभेत्॥ शौनकोपि॥ उत्तमा वनजा
पूजा क्रयक्रीता तु मध्यमा॥ अधमा याचिता पूजा चौर्येणैव तु निष्फला॥ चौर्यदोषः शूद्रस्य।
न द्विजस्य॥ तदुक्तं मिताक्षरायां॥ याज्ञवल्क्येन॥ ग्रामेद्ध्यागोप्रचारो भमीराजवरो वीने
॥ द्विजस्त्रैौ य पुष्पाणि सर्वतः स्ववदाहरेत्॥ तृणं वा यदि वा काष्ठं पुष्पं वा मदिवाफलं॥
अनापृच्छन्हि गृह्णानः॥ अस्त्रौ वेदं दमर्हतीति॥ तुलसीग्रहणनिषिद्धदिवसाहदिकालनि
र्णये॥ भानुभौमगविनीमेचव्यतीपाते च वैधृतौ॥ संक्रांतौ पक्षयोरंतौ द्वादश्यां निशि संध्य
यो॥ तुलसीं ये विचिन्वंति ते छिंदंति हरेः शिरः॥ वैष्णवस्य तु विशेषः॥ स्कांदे॥ ॥न छिंद्यात्तु
लसीं विप्रा द्वादश्यां वैष्णवः क्वचित्॥ अन्ये च पि निषिद्धेषु चिनुयात्तुलसीं सदेति॥ गारुडेऽ
पि भानुवारं विना दूर्वां तुलसीं द्वादशीं दृशीं दिनेति॥ ॥तच्छेदनमंत्रस्तु॥ ॥तुलस्यमृत
जन्मासि सदा त्वं केशवप्रिये॥ केशवार्थं विचिन्वामि वरदा भव शोभने रति॥ अथ बिल्वा

वि०प०
६०

हीनामनिर्माल्यदिनसंख्योच्यते॥ द्वादशिके॥ बिल्वोयामार्गजातीतुलसिचशमिशतांके
तकीमंगमहृदयामिंदोमोजाहिदनामुनितिलकलनगरकमलकल्हारमृद्मः॥ चंपाश्चारातिकु स्त०
तीदमनमरुवका॥ बिल्वतोउदानिश्रास्त्रांसिंदश ३० अयुक्ता १ यरीदृशा ११ दधिननिधिवा ३
सु ८ मत ९ यामरमयरावांमारतेदानुधर्मे॥ हरिचंदनकस्तूरीकर्पूरैः केसरान्वितं॥ गंधं
दद्यात्प्रयत्नेन दुष्टगंधान्विवर्जयेत्॥ गंधेन देवास्तुष्यंति दर्शनाद्यक्षराक्षसाः॥ नागाः
समुपभोगेन त्रिमिरे तेस्तु मानुष्याः॥ अतऊर्ध्वं प्रवक्ष्यामि धूपदानविधेः फलं॥ नियासाः
सारितश्चैव हानि ताश्चैव तेत्रयः॥ नियासाः शाद्वलकीवृक्षाः देवानां दयितास्मृता॥ गुग्गु
लुः प्रवरस्तेषां सर्वेषामितिनिश्चयः॥ अगरुः सारिणां [illegible] श्रेष्ठो यक्षराक्षसभोगिनां॥ राम।
दैत्यानां शल्लकीपश्चकां क्षितोयश्चलद्विधः॥ अथ सर्जरसादीनां गंधेः॥ पार्थिवैर्द ६०
रवेः फलितो रससंयुक्तो मनुष्याणां विधीयते॥ दीपदानेषु प्रवक्ष्यामि फलं योगमनु
त्तमं॥ यथायेन यदीचेव यद्देयापादशाश्वते॥ ज्योतिस्तेजः प्रकाशं च ऊर्ध्वं॥०॥०॥

गंधापिवरायते॥ प्रदानं तेषां यस्मात्तेजो वर्द्धयते नृणां॥ ऊर्ध्वं तमस्तेभिस्त्वं च दक्षिणा
यनमेवच॥ विनाशयति तस्मै तमसश्चैव मेषजं॥ आलोकदानाच्चक्षुष्मान् प्र
भायुक्तो भवेन्नरः॥ दीपान्दत्वा नो महिंस्यान्नरुरेन्नोपनाशयेत्॥ दीपहर्त्ता भवेदंधः
स्तमो गतिरसुप्रभः॥ हविषा प्रथमः कल्पो द्वितीयश्चौषधीरसैः इत्यादि॥ तथा॥ स्ना
नेधूपे तथा दीपे नैवेद्ये भूषणे तथा॥ घंटानादं प्रकुर्वीत तथा नीराजनेपि च॥ व
नस्पतीतिमंत्रेण देवपादे च धूपयेत्॥ धूपयेच्च जनेनैवनकेरणानवासस॥ तुल
सीरहितं पुष्पं ह्यदिशाल्पंसमर्पितं॥ तुलसीमंजरी याश्च तदभावे तु पल्लवाः॥ तद
भावे तु पत्रस्य तदभावे तु काष्ठकं॥ तदभावे तु मूलं स्यान्मूलाभावे तु मृत्तिका॥ मृ
त्तिकाया अभावे तु तुलसीशब्दमुच्चरेत्॥ तथा॥ रुचयं नियापि नंदीपमालि प्रांतिसु
राराः॥ तस्यान्निर्वापये दीपं देवानां मालमूत्रये॥ पूजाकाले तु नैवेद्यं तच्चेषुष्पा
दिपंनैवतु॥ कल्पनीयं यथाचोक्तं हरिरो वार्जुनायवै॥ पत्रं पुष्पं फलं तोयं योमे

वि० प० भक्त्या प्रयच्छति॥ तदहं भक्त्युपहृतमश्नामि प्रयतात्मनामिति गीतायां॥ ॥वसिष्ठः॥ उपा स्त०
६१ देयानि शास्त्रोक्तानि भक्ष्याणि च फलानि च॥ सुपक्वानि सुहृद्यानि पवित्राणि निवेदयेत्॥ २
कदलीकारवल्ली च पटोली बृहतीद्वयं॥ कुष्मांडं कंटजं चैव उर्वारु द्वयमेव च॥ पा
नसं नारिकेलं च धात्रीं च बदरीफलं॥ कपित्थं जंबु वृंताकमाम्रमाम्रातकं तथा॥
अपवित्राणि तुसरावाहाः कोद्रवाणि कुलित्थानि निष्पावं च मसूरकं॥ कूष्माणि याव
कल्यानि मूलकं तिलपिष्टकं॥ एतच्च वर्जयेन्नित्यं हरेर्नैवेद्यदाने॥ पंचरात्रे॥ पासंस्था
न्नहविर्भोज्यान्यारिभिः॥ क्षाति ताम्रवहिः॥ तन्मस्त्वामि ख्यलुद्दिष्टं कृत्वा हुंकारमुद्रिका रामः
न॥ देवस्य दक्षिणे पार्श्वे नीत्वा फलकेसमितिषु॥ सुवर्णादिषु पात्रेषु परिस्थाप्य चोद्धरेः॥ ६१
नपिबद्धं स्वतोयं च मंत्रेण विनिक्षिपेत्॥ संप्रोक्ष्य तं नैवेद्यं मुद्रां चैवाम्ननी धेनुकी
धवान्नवेत्॥ तस्मात्तु मे ऽद्भुतं नैवं नैवेद्यं प्रोक्षयेद्बुधः॥ ततः प्राणाहुतयो दातव्याः
परमात्मनि॥ मूलमंत्रं जपेद्वत्त ततो नारायणात्मकं॥ अष्टोत्तरशतं चैव अष्टाविंशति

मेव वा॥ स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकं॥ धूपे दीपे च पाद्ये च तांबूले दंतधावने॥
घंटानादं विना धूपं न विद्वान् दातुमर्हति॥ दीपाद्यवारनैवेद्यं घंटाशब्देन मन्वितं॥
चतुरंगुलोत्सेधं दीपं वर्तिस्य मन्वितं॥ बुद्धेरादाय हस्ताभ्यामापादतलमस्तकं॥ त्रि
परिभ्राम्य देवेशं वह्निरेनं ततः क्षिपेत्॥ नीराजनेन महाविष्णोर्मुखं सूर्यसमप्रभं॥ ये प
श्यंति महाभागास्तेषां पुराण मनंतकं॥ कोट्यो ब्रह्महत्यानामगम्यागमकोटयः॥ दह
त्यालोकमात्रेण विष्णोरारात्रिकं दे स्वाति॥ तत्रैव॥ आवाहनं च स्नानं विसर्जनं निरोधनं॥ अर्घ्य
चाचमनं चैव गंधपुष्पविलेपनं॥ दद्याद्देवोपचारांस्तु सर्वेभ्यः पृथक् पृथक्॥ सदावरणा
सें स्येभ्यः स्वाहांतैः स्वस्वनामकैः॥ धूपदीपादिकं तेषां तत्सर्वं विष्णोर्नोसहेति॥ अथ विष्णु
शक्तयः॥ विमलोत्कर्षिणी ज्ञाना क्रिया योगा तथैव च॥ प्रह्वी सत्या तथेशानोऽनुग्रहा वि
ष्णुशक्तयः॥ ॥ अथ पीठस्य॥ वामा ज्येष्ठा ततो गौरी कलकालविकर्णिका॥ विकारि
णय कृपा प्रोक्ता बलाबलनिकर्णिका॥ मनोन्मनीति संप्रोक्ताः शैवपीठस्य शक्तयः॥ ॥

चि० प० ॥अथ गणेशस्य॥ तीव्राख्या ज्वालिनी नंदा भोगदा कामरूपिणी॥ उग्रा तेजोवती स स्त० ३
६२ त्या नवमी विघ्ननाशिनी॥ ॥अथ सूर्यस्य ॥सूक्ष्मा जया भद्रा - - - - - विमला
तथा॥ अमोघा वैद्युती चेति नवमी: सर्वसिद्धिकी॥ कीर्तिश्च संनति व्युष्टि कन्त्यादि ऋद्धिश्च
दुर्गा शान्त्य उदाहृता॥ तथा॥ द्वादश्यां हरेः स्नानोपचारो न कार्य इत्युक्तं नरसिंह परिच
र्यायां॥ जन्मप्रभृति यत्किंचित्सुकृतं तु पुरार्जितं॥ नश्यंति द्वादशादिने हरेर्निर्माल्यलंघ
नादिति पाद्मोक्तेः॥ न चैतन्निर्माल्यलंघनविषयं॥ तस्य सर्वदेवसंबंधिनः सर्वदानि
षिद्धत्वेन हरिद्वादशीपयोर्वैयर्थ्यापत्तेः॥ स्नानं यो हरये दद्याद्द्वादश्यां वैष्णवो दिवा॥ राम:
यद्यपदेजा फलं सर्वं वा फलेया य गच्छतीति पंचरात्रस्पष्टमभिधानात्॥ दिवानिषेधा ६२
द्रात्रावभिषेको द्वादश्यामिति गम्यते॥ दमनकपवित्रारोपणद्वादश्योस्तु रात्रावपि ना
भिषेकः॥ दमनद्वादशी चैव पवित्रारोपणी तथा॥ न स्नानं हरये दद्याद्रात्रावपि कदा
चनेति स्मृतेः॥ कार्त्तिकद्वादश्यां प्रातः स्नपनमुक्तं निर्णयामृते॥ प्रातरुत्थाय मतिमा

न्विष्णोः स्नानं प्रकल्पयेत्॥ दध्ना क्षीरेण मधुना तथा गंधोदकेन च॥ नैवेद्यपात्रमुक्तं
स्कांदे॥ हिरण्मयं राजतं ताम्रं कांस्यपालाशपत्रकं॥ नैवेद्यार्थाब्जपत्रं वा पात्रं चि हरेरतिप्रि
यं॥ मध्यमोऽयं चलेत्वं च चोच्छ्रायेयं गुलान्वितं(?)॥ दद्या — हरये नित्यं यच्छिपमथा—
मन॥ प्रक्षिप्य तुलसीं प्रोक्ष्य स्वच्छत्योभिमंत्रयेत्॥ नैवेद्यं शंखतोयेन प्रोक्षेत्तेन—
केन च न॥ पानीयं चामृतीकृत्यापरे शायनिवेदयेत्॥ ततो जवनिका कार्या मुहूर्त्तं
मनवेक्षमाणा आसीनो जपतीति नित्यपूजाप्रकरणे बौधायनोक्तेः॥ गंडूषार्थं जलं
दत्वा दद्याद्वाचमनं ततः॥ हस्तवालेसं... हरिमुकुरं भूषणानि च॥ कर्पूरैलादिसंयु
क्तं तांबूलं च निवेदयेत्॥ प्रदर्शयेद्दद्याद्दर्शं किंत्वयि छत्रचामरे॥ मंगलं नीराजनं चैव
वपुष्पांजलिमथार्पयेत्॥ प्रदक्षिणानमस्कारान्कुर्याद्भक्तिपूर्वकं॥ पदात्पदां
तरं गच्छेत्करौ चलनवर्जितौ॥ वाचा स्तोत्रं मनो ध्यानं चतुरंगं प्रदक्षिणं॥ उरसा
शिरसा दृष्ट्या मनसा वचसा तथा॥ पद्भ्यां कराभ्यां जानुभ्यां प्रणामोष्टांग ईरितः॥

विध० यत्नुरक्तेः॥स्पृष्ट्वा गुदं स्पृष्ट्वा लिंगं स्पृष्ट्वा न पठेद्बहिः॥स्त्रीणां वक्षःस्थलं स्पृष्ट्वा सा भूमि
६३ र्न्निपतित्॥एवमिति तच्च नमस्कारव्यतिरिक्तविषयं॥नमस्कार उरसेति विधानात्॥ स्त०
एकां चंड्यां रवौ सप्त तिस्रो दद्याद्विनायके॥चतस्रः केशवे दद्यादिति वचोर्द्धप्रदक्षि २
णं॥अर्द्धप्रदक्षिणां पि देवस्य योनमेत्॥तत्र वक्षः चंडा स्वभात्॥ततो देवानुकीर्तनं॥जि
तं॥ते पुंडरीकाक्ष नमस्ते विश्वभावन॥नमस्ते स्तु हृषीकेश महापुरुष पूर्वज॥नमो हि
रण्यगर्भाय प्रधानाव्यक्तरूपिणे॥ॐ नमो भगवते वासुदेवाय शुद्धज्ञानस्वभाविने
देवानां दानवानां च सामान्यमपि दैवतं॥सर्वदा चरणद्वंद्वं व्रजामि शरणं तवेत्यादि
रूपविधानोक्तं स्तोत्रं॥तत्तु प्रथमस्तबके पुरुषसूक्तविधाने द्रष्टव्यं॥एवं भगवंतं॥ राम:
प्रदक्ष्य ब्रह्मादीन् पूजयेत्॥मुखेषु पुष्पांजलिं दत्वा गतो शार्चनं भवेत्॥ततो शरणं वस्तु ६३
रव्यश्चेत् तत्र सर्वक्रमाद्धवेदिग्याचारदीपोक्तेः॥तत्र मंत्रः॥रमा ब्रह्मादयो देवाः सनका
द्याः शुकादयः॥श्रीनृसिंहप्रसादेन सर्वे गृह्णंतु शांभवा इति॥ततो शास्य तु वक्ष्ये तुउ
पद्यत्॥

स्पतु चं शंखं तो॥शत्यास्तु उच्छिष्टं च शत्रे दद्यात्॥ ॥अथ पूजापराधः॥ ॥स्कांदे॥नां
गुष्ठमर्दयेदेवं नांध पुष्पैः समर्चयेत्॥कराग्रे नक्षिपेत्तोयं वज्रपातं समं भवेत्॥शा
लग्रामशिला तोयं पीत्वा यस्तु मस्तके॥प्रक्षेपणं प्रकुर्वीत ब्रह्महा स निगद्यते॥गा
रुडे॥पादोदकं पिबेन्नित्यं नैवेद्यं भक्षयेद्धरेः॥शेषास्तु मस्तके धार्य इति वेदानुशास
नं॥पादोदकस्वरूपं तु॥उदकं चंदनं चैव शंखं स्व तुलसीदलं॥घंटासक्तं शिला
ताम्रं नवमिश्र रत्नोदकमिति॥पावनं विष्णुनैवेद्यं सुरासिद्धर्षिभिः स्मृतं॥ ॥अन्य
देवस्य नैवेद्यं भुक्त्वा चांद्रायणं चरेत्॥स्कांदे॥विष्णुमहीस्थितं पुष्पं शिरस्या यो व
हेन्नरः॥अपर्युषितपापः स्याघावच्चुगच्छतु तुष्टयं॥तीर्थग्रहणप्रकारस्तु॥वस्त्रं च
तु गुलीत्यप्रसार्य वामके करे॥दक्षिणेन करेणाथ शंखोदकमथाददेत्॥प्रक्षि
प्य मस्तके विद्वांस्तीर्थमास्यं चिरत्ततः॥देवदेव जगन्नाथ शंखचक्रगदाधर॥देहि
देव ममानुज्ञां तव तीर्थनिषेवणे॥लब्ध्वाथानुज्ञां ततस्तीर्थे पिबेन्मंत्रमिमं ततः॥

वि० प० शालग्रामशिलावारि पापहारि निषेव्यतां ॥ अकालमृत्युहरणं सर्वव्याधिविना स्म० २
६४ शनं ॥ सर्वदुरितोपशमनं विष्णुपादोदकं शुभं ॥ विष्णोः पादोदकं पीतं कोटिजन्माघ
नाशनं ॥ तदेवाष्टगुणं पापं भूमौ बिंदुनिपातनात् ॥ स्नाने कृत्वाचमने चैव भोज-
नादौ तथैव च ॥ तथैव भोजनस्यांते शालग्रामजलं पिबेदिति ॥ आदित्यपुराणे तु ॥
आग्नेयं शिवनिर्माल्यं पत्रं पुष्पं फलं जलं ॥ शालग्रामस्य संपर्कात्सर्वं याति पवित्र
तामिति विज्ञेबोक्तेः निषेधस्तु केवलपरोवर्गं तुल्यः ॥ शिवैकभक्तस्य तु ग्राह्यमपि भ
वति ॥ निर्माल्यं धारयेद्भक्त्या शिरसा पार्वतीपते ॥ राजसूयस्य यज्ञस्य फलं प्रा
प्नोति निश्चयमिति ॥ अग्रभक्षेति वदतां लोभादिनानग्राह्यमिति सूचितं यद्यानि- रामः
षेधस्तु महास्थानपरः ॥ कूपे सर्वं विनिक्षिपेदिति पाद्मोक्तेः ॥ अन्यत्रापि ॥ बाणलि ६४
गे स्वयंभूते चंद्रकांते हृदि स्थिते ॥ सौवर्णे मरकते चैव शांभोर्नैवेद्यभक्षणमिति
॥ अथ वाराहोक्ताः ॥ पूजापराधाः ॥ द्वात्रिंशत्तत्र मुख्यास्ते वाराहे विष्णुनोदिताः ॥

तिर्यक्पुंड्रधरो भूत्वा यस्कृत्वा देवतार्चनं ॥ याचितैः पत्रपुष्पाद्यैर्यः करोति ममार्चनं ॥
अप्रक्षालितपादो यः प्रविशेन्मम मंदिरं ॥ मम दृष्टेरभिमुखं तांबूलं चर्वयेच्च यः ॥
कौसुंभशाकं मर्त्यो यो भक्षयेन्मम सेवकः ॥ नरस्तु करपलोशस्थैः पुष्पैः कुर्यान्ममा
र्चनं ॥ ममार्चामासुरे काले यः करोति विमूढधीः ॥ अवैष्णवस्य पक्वान्नं यो मह्यं वि
निवेदयेत् ॥ अवैष्णवेषु पश्यत्सु मत्पूजां विदधाति यः ॥ दीनां तरितपक्वान्नं यो मह्यं
विनिवेदयेत् ॥ नीलीरंजितवस्त्रं यत् अन्येर्यो मह्यं निवेदयेत् ॥ नवमक्षालितवस्त्रं जी
र्णं तथैव मे निवेदयेत् ॥ अमोनीधर्मलिप्तांगो मत्पूजां विदधाति यः ॥ वातसूत्रनिरो
धेन मत्पूजां विदधाति यः ॥ नखोदकेन स्नपनं कुरुते मे मानवः ॥ कृत्वा वातसमाच म
म्य तथाप्रेक्ष्य तकं बलः ॥ पीठासनोपविष्टस्तु पूजयेद्यो निरासनः ॥ मन्मयेधूपप
हनं ॥ दीपं च कुरुतेऽर्चने ॥ मत्पूजनको न कुरुते तां तु पूजां वदामि ते ॥ मत्पूजने केशि
वेधश्री मन्दत्कोऽशिवोधन ॥ भक्ताष्टम्यां न कुरुते नक्तं न हरिवासरं ॥ परस्य

वि० प० परिधानं परिधायार्चयेच्च मां॥ अपूजयित्वा विघ्नेशं सम्भाव्याचकपालिनं॥ वृद्धोपलक्
६५ मौक्तियपते त्रिलोचनि विघ्नकृत्॥ अंधकारे स्थितो मां च सभाष्य च रजस्वलां॥ वामहस्ते स्त० ३
च मां हत्वा स्नापयेद्यदि मूढधीः॥ महापराधान् जानीहि द्वात्रिंशत्सत्तमामितान्॥ अ
अन्येपि॥ अंगलग्नं च जीर्णं च वस्त्रं देवे न चार्पयेत्॥ मन्त्रयेभिन्नपात्रे वा पाशे लो
हकांस्यजे॥ पद्भ्यां वे करभूम्योस्तु न नैवेद्यं समर्पयेत्॥ याने वापि उके वापि गमनं भ
गवद्गृहे॥ देवोत्सवाद्यसेवा च अप्रणामस्तदग्रतः॥ उच्छिष्टे चैव चाशौचे भागव
द्वादनादिकं॥ शक्तौ गौणोपचारस्तु अनिवेदितभक्षणं॥ तत्तत्कालोद्भवानां च
फलादीनामनर्पणं॥ मित्यागस्त्योक्तापराधाः॥ अन्यग्रंथे केतकिपूजायां पद्मदेव रामः
तानियमो भविष्यपुराणे॥ गृहे लिंगद्वयं नार्च्यं गणेशत्रितयं तथा॥ शक्तित्रयं त ६५
थानार्च्यं लिग्रामद्वयं तथा॥ द्वौ शंखौ नार्चयेच्चैव भग्नां च प्रतिमां तथा॥ नार्चयि
च्चेत्तथा मत्स्यकुर्यादिद्वादशार्कं तथा॥ द्विचक्रे द्वारकायास्तु नार्च्यं सिंध्वयं तथा॥ शा

लग्रामाः समाः पूज्या विषमा न कदाचन॥ विषमेषु च यं शस्तं समेषु द्वितयं न हि॥ एतेषां
पूजनान्नित्यमुद्वेगं प्राप्नुयाद्गृही॥ तथा॥ रक्षात्क्षावक्रोडेति सूक्ष्मः शालग्रामशि
लो न पूज्य इत्यपि पुराणे॥ अत्र गृहिस्सुपादानाद्ब्रह्मचारियत्यादेर्न दोष इति ध्वन्यते॥
शालग्रामलक्षणमुक्तं स्कांदे॥ शालग्रामशिलायास्तु प्रतिष्ठा नैव विद्यते॥ महापू
जां तु कृत्वा देवं पूजयेत्तां तथा तो बुधः॥ खंडितं स्फुटितं भग्नं पार्श्वे तिव्रं विभेदितं॥
शालग्रामसमुद्भूतं शैलं दोषावहं न हि॥ चक्रं वाकेवलं तत्र पद्मेन सह संयुतं॥ के
वलो वनमालाया हरिलक्ष्म्यास्सहोस्थितः॥ अत्रापि दोषाभावोयत्यादिपरः॥ द्वारदे
शे समे चक्रे दृश्येते नांतरीयके॥ वासुदेवः सविज्ञेयः शुक्लाभश्चातिशोभनः॥ द्वौ चक्रौ
वेकलग्नौ तु पूर्वभागश्च पुष्कलः॥ संकर्षणः सविज्ञेयो रक्ताभश्च तेजसा॥ प्रद्युम्नः
सूक्ष्मचक्रस्तु पीतदीप्तिस्तथैव च॥ सुषिरं छिद्रबहुलं दीर्घाकारं तु तद्भवेत्॥ अनि
रुद्धस्तु नीलाभं वर्तुलं चातिशोभनं॥ रेखात्रयं तु यद्वारे पृष्ठे पद्मेन लांछितं॥ नाना

वि०प० वर्त्तमानं तस्याच्छालग्रामो गेन चिह्नितं॥ अनेकमूर्त्तिसंयुक्तं सर्वकामफलप्रदं॥ विदि-
६६ क्षु दिक्षु सर्वासु यस्योर्ध्वं दृश्यते सुखं॥ देवदेवो विज्ञेयः पुराणपुरुषोत्तमः॥ अर्द्धचं- शा० ३
द्राकृति र्देवो हृषीकेशस्तु दाहृतः॥ तमच्युतमनेत्यगं विषयां श्रसमीकृतान्च श्री-
धर तु तथा देवचिह्नितं वनमालया॥ कदंबकुसुमाकारे रेखापंचकसंयुतं॥ मत्स्य-
रूपं तु देवेशं दीर्घाकारे तु तन्भवेत्॥ विंदुद्वयसमायुक्तं कांस्यवर्णं सुशोभनं॥ वामपा-
र्श्वे स्थिते चक्रे श्यामवर्णे च विंदुके॥ लक्ष्मीनृसिंहो विख्यातो भुक्तिमुक्तिफलप्रदः॥
कपिले नृसिंहो पृथुचक्रे सुशोभने॥ ॥ब्रह्मचार्यधिकारस्याच्छान्यस्तस्य प्र-
पूजने॥ नरसिंहस्त्रिविंदुः स्यात्कपिलः पंचविंदुकः॥ ब्रह्मचार्येणसंपूज्यः स्या- राम:
दन्यथा सर्वविघ्नदः॥ स्थूलचक्रद्वयं मध्ये गुंडलाग्राम षटिका॥ द्वौ रोपरि त- ६६
तथा रेखा पद्मकस्य सुशोभना॥ स्फुटितं विषमं चक्रं नारसिंहं तु कापिलं॥ संपू-
ज्य मुक्तिमाप्नोति संग्रामे विजयी भवेत्॥ त्रिविक्रमं तथा देवं श्यामवर्णं महाद्युतिं॥

वामपार्श्वे तथा चक्रे रेखा चैव तु दक्षिणे॥ प्रदक्षिणावर्त्तकृतं ख्याता वनमालाविभूषिता॥
सा शिला लक्ष्मसंज्ञा स्याद्धनधान्यसुखप्रदः॥ स्थूलो दामोदरो ज्ञेयः सूक्ष्मचक्रोऽम-
वेत्तु यः॥ चक्रे च मध्यदेशस्थे पूजितः सुखदायकः॥ चतस्रो यत्र दृश्यन्ते रेखा पार्श्वे
समीपगाः॥ द्वे चक्रे मध्यदेशे तु सा शिला तु चतुर्मुखी॥ तन्नाम्ना मलकी तुल्या सूक्ष्मा
चातीव या भवेत्॥ तस्यामेव तदा ब्रह्मा दृश्या सर्वसाम्यहं॥ अथायथा शिला सू-
क्ष्मा तथैव चमन्तत्फलं॥ तस्मात्तां पूजयेन्नित्यं धर्मकामार्थसिद्धये इत्यादि॥ द्वार-
कायां चक्रतीर्थे चक्रांकं नेत्रमुत्तमं॥ समुत्पन्नं मुने साक्षात्तत्फलं दर्शयाउ वच्मो-
कितो॥ तस्माच्चक्रांकमपि पुनः पूज्यं मनश्चार्यद्विजैः सदा॥ भिन्नचेद् धनाशाय स्थूले
बुद्धिविनाशनं॥ दीर्घश्यायु [illegible] दंतेयं रूक्षं बुद्धिविनाशकं॥ [illegible] वर्णं सुमं
चक्रं वृत्तचक्रं तथैव च॥ स्कांदेति॥ प्रतिमामन्त्रिलिङ्गानामपि कोशीखंडादौ दोषाः
॥ग्रंथगौरवभिया न लिखिता॥ पूज्यपूजकयोर्मध्ये पर्वमित्यभिधीयते॥ नशा

नैऋतकोपदक्षपद्वाये ह्वस्तु तमद्वेत्॥ देवस्य मुखमारभ्य दिशा प्राचीं प्रकल्पयेत्॥ तत्र
दिपरिवाराणामंगाद्यवरणक्रमात्॥ इदमागमोक्तपूजाविषयं॥ यस्मिन्निवस्यान्वि
तुनस्तु देति प्राचीति तं॥ वेदविदो वदंति॥ मध्यं पुनः पूजके पूजयोः सदागमज्ञाः प्रवदं
ति पूर्वमिति संग्रहोक्तेः॥ तथा॥ अकुर्वन् देवतापूजां भुंजाया हूस्ततो पदि॥ मासस
ख्यान् लोहपिंजनेश्वातियममंदिरे॥ न विद्याराधनादन्यद्धि पत्ते कर्म वैदिकं॥ त
स्मादन्यनादि मध्यां तं नित्यमाराधयेद्धरिमिति कूर्मपुराणोक्तेरिपलमतिमंगलं
॥इति श्रीमन्नागदेवभट्टात्मज श्रीमदनंतभट्टविरचिते विधानपारिजाते देवतार्च
नविधानं॥ ॥अथ पंचमहायज्ञाः॥ तत्र यमः॥ पंचसूनाः गृहस्थस्य वर्त्तते हह
रहः सदा॥ कंडनी पेषणी चुल्ली जलकुंभ उपस्करः॥ एतानि वाहयन्विप्रो बाध्य
ते वै मुहुर्मुहुः॥ एतेषां पावनार्थाय पंच यज्ञाः प्रकीर्त्तिताः॥ हिंसास्थानं सूना॥
उपस्करो मार्जन्यादिः॥ कात्यायनोपि॥ देवभूतपितृब्रह्ममनुष्याणामनुक्रमात्॥

महासत्राणि जानीयात्त एव हि महामखाः॥ एतेषां पंचयज्ञविधानं तु गृहीनित्यंन का
पयेदिति शंखवचनान्नित्यमेव॥ ननु फलश्रवणात् काम्यं॥ नवा कंडन्यादिनि
मित्तश्रवणान्नैमित्तिकमिति॥ तदुक्तं मिताक्षरायां॥ यदेषां कंडन्याश्रवणं तत्तनन्त
ख्यापनार्थं न काम्यत्व प्रतिपादनायेति॥ एवं नित्यत्वेपि॥ सायं प्रातर्वैश्वदेवः
कर्त्तव्यो बलिकर्म च॥ अनश्नतापि सततमन्यथा किल्बिषी भवेदिति॥ कात्याय
नवचनाद्वैश्वदेवाख्यं कर्म पुरुषार्थमेव च॥ नत्वन्नसंस्कारकं॥ अत एव प्रवस
तोप्यावश्यकमिदमित्याह परिशिष्टकारः॥ प्रवसेदाहिताग्निश्चेत्कदाचित्॥ का
लपर्ययात्॥ यस्मिन्नग्नौ भवेत्पाको वैश्वदेवस्तु तत्र वै॥ मनुरप्येवमेवाहो
वैश्वदेवे तु निर्वृत्ते यद्यन्योतिथिराव्रजेत्॥ तस्मा तदन्नं यथाशक्तिप्रदद्यान्न
बलिं हरेत्॥ यमन्नसंस्कारः स्यात्तर्हि वलिनाम वैश्वदेवं न कुर्यादिति न वदेन्म
नुरिति तट्टीकापि॥ केचित्तु सायंप्रातः सिद्धस्य हविष्यस्य जुहुयादित्याश्वलाय

नि० प०
६८

नादिचनात्पुरुषार्थत्वमन्नसंस्कारकत्वं चतुभयात्मकत्वं मन्यते॥ अत्र सायंशब्देन
रात्रिः कथ्यते॥ प्रातःशब्देन च दिनमिति ज्ञेयं॥ धर्मप्रश्नेप्येवमेव॥ यस्याग्नौ तत्क्रि स्त०
यते यस्य चाग्रे न दीयते॥ न तद्भोक्तव्यमिति यस्येति कर्मणि षष्ठी॥ यदन्नमित्यर्थः॥ ३
अस्मं मिश्रः॥ संग्रहे॥ भ्रातॄणामविभक्तानां एकपाकेन वै यदि॥ वैश्वदेवादि
क श्राद्धं कुर्युस्ते वै पृथक्पृथक्॥ तथा॥ अविभक्तेन पुत्रेण पितृमध्ये मृतेऽग्नि
स्थानान्तरे पृथक्कार्यो दर्शश्राद्धं तथैव चेति॥ तथान्यो विशेषो मदनपारिजाते
जमदग्निराह॥ वैश्वदेवं तथा रात्रौ कुर्या[illegible]ति तथा॥ महतः पंचयज्ञास्तु दि रामः
वैवेत्याह धर्मोपि दिति॥ अस्यार्थः॥ येषां तु शाखिनां ब्रह्मयज्ञव्यतिरिक्तमहाय. ६८
ज्ञानां वैश्वदेवबलिहरणां तु भाषितेषां वाजसनेयादीनां दिवैव वैश्वदेवः सायंक
मनिरात्रौ॥ येषां तु श्वशाखायां कालद्वयेपि तद्विधानमस्ति नास्ति वा तेषां माध्य
न्दिनादीनां कालद्वयेपि भवतीति निर्णय इति॥ तत्रैव व्याख्यातं॥ हविष्य

युपवाख्यास्तदनु श्रीहयः स्मृता इत्यादि हविष्यं ज्ञेयं॥ पंचयज्ञमहत्वमाह मनुः॥
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणं॥ होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूज
नं॥ अध्यापनमध्ययनं॥ तर्पणं नित्यश्राद्धं॥ अत्र विकल्पमाह कात्यायनः॥ श्रा
द्धं वापि पितृयज्ञः स्यात्पित्र्यो बलिरथापि वेति॥ पितृभ्यः स्वधा नम इति यो बलिः स
पितृबलिः॥ मनुः॥ दद्यादहरहः श्राद्धमन्नाद्येनोदकेन वा॥ पयोमूलफलैर्वापि पि
तृभ्यः प्रीतिमावहन्॥ पितॄनुद्दिश्य विप्रांस्तु भोजयेद्विप्रमेव वेति॥ शक्तितो व्य
वस्थेयं॥ अत्र च विशेषमाह व्यासः॥ आवाहनं स्वधाकारं पिंडाग्नौकरणं तथा॥
ब्रह्मचर्यादिनियमो विश्वेदेवास्तथैव च॥ नित्यश्राद्धे त्यजेदेतान्भोज्यमन्नं प्रक
ल्पयेत्॥ यथाशक्त्यल्पमपि॥ नित्यश्राद्धे देवहीनं नियमादिविवर्जितं॥ दक्षिणारहि
तं चैव दातृभोक्तृव्रतोज्झितं॥ अत्र दक्षिणानिषेधो यथोक्तदक्षिणापरः॥ न तु तत्सा
मान्यपरः॥ दत्वा तु दक्षिणां शक्त्या नमस्कारैर्विसर्जयेदिति ऐनिस्पर्शाप्रकरणोक्ता

वि० प० सोक्तेः॥ एदं श्राद्धं षड्दैवतं। तत्तु षट्पुरुषं ज्ञेयं दक्षिणापिंडवर्जितमिति व्यासोक्तेः॥ एदं
६९ यत्रामावास्याश्राद्धे दैवपूर्वं षड्देवतारूपं नास्ति च तन्न भवति॥ यत्र सांवत्सरिकादौ नेष्टा स्त० २
स्तत्र भवति॥ नित्यश्राद्धं न कुर्वीत प्रसंगात्तत्र सिध्यतीति चमत्कार एवोक्तेः॥ तथा
कालविशेषकाम्यश्राद्धमप्युक्तं हेमाद्रौ॥ अयनद्वितये श्राद्धं वैधृतद्वितये तथा
मन्वादौ च युगादौ च पिंडनिर्वपणादृते॥ सर्वसंक्रांतिष्वपि तथैव यादिस्मृति
वचनाद्युगादिमन्वादिसंक्रांत्यमावास्यावैधृतिमहालयाष्टकापातेषु काम्यादि
श्राद्धान्यप्यनुसंधेयानि॥ अथ वैश्वदेवधर्माः॥ व्यासः॥ जुहुयात्सर्पिषाभ्यं-
क्तं तैलक्षारं विवर्जयेत्॥ दध्यक्तं पयसाक्तं वा तदभावेंभसापि वा॥ स्मृत्यर्थसा- राम:
रे॥ अलाभे येन केनापि फलशाकोदकादिभिः॥ पयोदधिघृतैः कुर्याद्वैश्वदेवं ६९
स्तु वै सदा तु॥ हस्तेनान्नादिभिः कुर्याद्दिक्षु रं जलितं तः॥ कात्यायनः॥ पाणाकृति
हृदिशा पर्वप्ररिका हृताहिनाश्चेश्चुवमार्ग प्रसरिका॥ देवेन तीर्थेन च हूयते हविः

स्वंगारिणि स्वर्चिषि विद्वत्ते पावके॥ उत्ताने न तु हस्तेन आंगुष्ठाग्रेणापीडितां॥ संहतांगु
लिपाणिस्तु वाग्यतो जुहुयाद्धविः॥ कोद्रवं च णमाषं मसूरं च कुलित्थकं॥ क्षारं च
लवणं सर्वं वैश्वदेवे विवर्जयेत्॥ आपस्तंबीयेपि॥ न क्षारलवणाहोमो विद्यते त-
थापरान्नसंसृष्टस्येति॥ क्षारलवणं परान्नसंसृष्टेति न हविष्यान्नहोतव्यमिति
मदनपारिजाते व्याख्यातं॥ क्षारलवणं पुराणे॥ तिलमुद्गादृते शैव्यं सस्ये गो-
धूमकोद्रवा॥ चीनकं देवधान्यं च चणकं च तथैव हि॥ स्विन्नधान्यं सर्वशा-
के मेष क्षारगणाः स्मृताः॥ आश्वलायनगृह्यपरिशिष्टे विशेष उक्तः॥ सत्यव देवय-
ज्ञोऽहरहर्गोदिने संमिलतः सर्वाभिः प्रदत्तस्मादेतमहरहः कुर्वीत तमेन्नं-
वैश्वदेवं कृतशेषेणाप्रयागन्नेन वा कुर्यान्नान्यशेषेण वैश्वदेवं कुर्यादिति॥
स त्वाः पंचायनप्रजास्तु परत्ययः। तत्प्रकरणात्त्वात्॥ इदं तु स्मार्तविषयं॥ वै-
ष्णवानां तु॥ विष्णोर्निवेदितान्नेन यष्टव्यं देवतांतरं॥ पितृभ्यश्चापि तद्देयं तद-

वि०प० सायंकल्प्यते॥ पितृश्राद्धं तु यो दद्यादुदये परमात्मने रेतोदाः पितरस्तस्य मन्वं स्त०
८० ति श्लोके श्राद्धभागिन इति पंचरात्रोक्ते नैवेद्यश्राद्धे वपं च महायज्ञास्तु॥ त्रोपनिवेदने २
दोषश्रवणात्॥ यदि पूर्वं ब्रह्मयज्ञो न कृतस्तर्हि मनुष्ययज्ञात्पूर्वं कर्तव्यः॥ य
श्चाश्नाति जपः प्रोक्तो ब्रह्मयज्ञस्तु स स्मृतः॥ स चार्वाक्तर्पणात्कार्यः पश्चाद्वा प्रा
तराहुते॥ वैश्वदेवावसाने वान्यत्रैतस्मिन्निति त्रतरइति कात्यायनोक्तेः॥ स च प्रत्य
हेऽसत्वेद्देव स्यात्॥ नक्तं तु तिनहोमं च स्वाध्यायं पितृतर्पणमनेकः श्राद्धदिवसं कु
र्यात्स्मा नेह हनि कुत्रचिदिति मरीच्युक्तेः॥ हुतमिति मनुष्ययज्ञः॥ होमो देवयज्ञः॥ राम:
स च येषां दिवा रनोक्तस्तेषामेव निषिद्धः॥ न पतनमपि तीर्थ चित्रो ष प्रास्तेमव त्ये ८०
तत्॥ कृततर्पणो विप्र तीर्थे स्नात्वा पर्येति त्वन्निति लिङ्गोक्तेः॥ अयं वैश्वदेवः
श्राद्धसाग्नेः पूर्वं निरग्नेः पश्चात्॥ तमरवाच्य मनग्निक जन्तः स्वच्य न्यै। कृते वो
त्तरं स्वस्तुके विकरस्य स्वस्य चोत्रके तनकौ। तरे ताचरेदिति॥ अनु वैश्वदेवा

नंतरं श्राद्धं चरेदित्यर्थः॥ हेमाद्रौ पिपक्षालकर्मनिर्वर्त्य वैश्वदेवं च साग्निकः॥ पिंडा
यज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुध इति॥ तथा॥ वैश्वदेवाहुतीरग्नावुर्वाग्ब्राह्मण
भोजनात्॥ पितृयज्ञं तत्तु विधिवद्बलिं दद्याद्विधानत इति॥ अग्नौ अग्नौकरणोक्ते
ब्राह्मणभोजनात्॥ पूर्वं वैश्वदेवः कार्यत इत्यर्थः॥ यद्वा॥ वैश्वदेवं तथा कृत्वा प
श्चाद्ब्राह्मणवाचनमिति॥ अनेन विकरानंतरं स्वस्तिवाचनात्पूर्वं कर्तव्य इति॥
भावः॥ पित्रर्थं निर्वपेत्पाकं वैश्वदेवार्थमेव च॥ वैश्वदेवं न पित्र्यर्थं न दार्शं वैश्वदे
विकमिति पृथक्पाके श्रिः॥ वाजसनेयिनामुभयार्थमेकएव पाकः॥ उद्धृत्य घृता
क्तमन्नं पृच्छत्यग्नौ करिष्य इति सूत्रव्याख्याने कर्काचार्येण तथा व्याख्यातत्वात्॥
साग्नेरपि क्वचिदेतद्भवति॥ श्राद्धाङ्गेन वकुर्वीत वैश्वदेवं तु साग्निकः॥ लौकि
के त्वाह्निके मुक्ता तत्र स्वं तु विधीयत इति शाट्यायनोक्तेः॥ निरग्निविषये षड्
शान्तं॥ प्रातिवासरिको होमः श्राद्धे क्रियते यदि देवात्त्वं नगरस्तितिको

वि०प० व्यतिषिंचेत् रक्तं चेति॥ पैठीनसिरपि॥ पितृपाकं समुद्धृत्य वैश्वदेवं करोति यः॥ आसुरं त- स्तं०
७१ द्भवेच्छ्राद्धं पितॄणां नोपतिष्ठति॥ श्राद्धशेषे ततो दद्यात्तदिति स्मरणात्॥ श्राद्धं निर्वर्त्य विधि- ३
वद्वैश्वदेवादिकं ततः॥ कुर्याद्भिक्षां ततो दद्याद्धंतकारादिकं नेतर इति॥ यतोन्नाद्यु-
द्धृतत इति निबंधकारैर्व्याख्यातं॥ तस्याप्येकादशाहश्राद्धे तु भिन्नपाके न वैश्व-
देवो भवति॥ एकोद्दिष्टेषु शेषं तु ब्राह्मणेभ्यः समुत्सृजेदिति देवलेन तदन्नस्योत्स-
र्गविधानात्॥ संप्राप्ते पार्वणश्राद्धे एकोद्दिष्टे तथैव च॥ अग्रतो वैश्वदेवः स्यात्प-
श्चादेकादशाहनीति वैश्वदेवविधानाच्चेति सर्वमनवद्यं॥ वैश्वदेवानां मंत्रविशे-
षः॥ पांचरात्रोक्तः॥ साग्नेस्तु द्विजस्यापि वैश्वदेवस्य विशेषतः॥ श्राद्धं नैवेद्यशे- राम:
ण वैश्वदेवादिपूर्वकं॥ आदिशब्दो बलिहरणं॥ बृहत्साराशारे पिपंचमोध्याये॥ वै- ७०
श्वदेवं कदा कार्यं श्राद्धे च समुपस्थिते। पाके मुख्यं पृथक् सेवेत्सर्वमेव विधीयते
वैश्वदेवोग्रतः श्रेष्ठे वसाग्निहीनाग्निकस्य च॥ कर्तव्यः पाकमुद्धृत्य पश्चादेकोद्दिष्ट वि-

वर्जयेत्॥ कठकरावादेरपि विशेषोथ मनुशासने॥ निर्वर्त्य श्राद्धयज्ञं वैश्वदेवं विधाय
च॥ ततो गृहबलिं दद्यात् कठकारावादिकान्वितेनेति। स्थालीपाकदिने विशेषमाह दे-
वलः॥ अकृते वैश्वदेवे तु स्थालीपाकाः प्रकीर्तिताः॥ अन्यत्र पितृयज्ञात्तु सोपराह्णे
विधीयते॥ पितृयज्ञः पिंडपितृयज्ञः॥ स्थालीपाका इति बहुवचनं स्थालीपाका-
साध्यकर्मोपलक्षकं॥ नित्यश्राद्धं पितृयज्ञस्त्वाश्वलायनादिविषयं॥ वाजसनेयि॥
नां तु पिंडो बलिः पितृयज्ञः॥ अपरपक्षे श्राद्धं कुर्वीतेति सूत्रं व्याख्याकुर्वता कर्का-
चार्येण श्राद्धशब्दस्य राजसूयवत्समुदायनामधेयत्वं पूर्वपक्षयित्वाऽसावेतत्त
इति मंत्रवर्णादिना पिंडदाने पितॄणां देवत्वात् मासिकदानस्यैव नामधेयत्वमि-
त्युक्त्वात्॥ अंगप्रधानचिंतायां प्रयोजनं तु प्रधानाकरणे नांगकरणमिति॥ तेस-
ते ब्राह्मणभोजनस्यांगत्वात्॥ गयादौ तथा दृष्टत्वाच्च समलं प्रपंचेन॥ ॥अथ मनु-
ष्ययज्ञः॥ अचिंतितमनाहूतं वैश्वदेवस्यावस्थितं॥ अतिथिं तं विजानीयान्नैकेश्वा

वि०प० मनिवाखिनं॥ चक्षुर्दद्यान्मनो दद्याद्वाचं दद्याच्च सूनृतां॥ अनुव्रजेदुपासीत स यज्ञः पंचद-
७२ क्षिणः इति दानधर्मे॥ इत्यादिलक्षणोपेताया नोदृष्टगोत्रकुलाय श्रान्ताया समादि स्मृ०
नार्चयित्वान्नं परिविष्योदङ्मुखः सनकादीन्ध्यायन्निदमन्नं सनकादिमनुष्ये- ३
भ्यो हंतेत्युक्त्वा दद्यात्॥ अग्रे दानासामर्थ्ये काष्ठाजिनिः॥ भिक्षां वा पुष्कलं दद्याद्धं-
तकारमथापि वेति॥ मनुः॥ ग्रासमात्रं भवेद्भिक्षा अग्रं ग्रासचतुष्टयं॥ अग्रं चतुर्गुणी-
कृत्य हंतकारो विधीयते॥ ब्राह्मणाभावे कात्यायनः॥ अप्युद्धृत्य यथाशक्ति किंचि-
दन्नं यथाविधि॥ पितृभ्यश्च मनुष्येभ्यो दद्यादहरहर्द्विजः॥ उद्धृत्य पात्रे निक्षिप्य सर्वा रामः
तदभावे गवादौ दद्यात्॥ पादौ वैश्वदेवात्प्रागेतिथिरागच्छति तदा व्यासः॥ अकृ- ७२
ते वैश्वदेवे तु भिक्षुके गृहमागते॥ उद्धृत्य वैश्वदेवार्थं भिक्षां दत्वा विसर्जयेत्॥ भि-
क्षुरपि तेनैव दर्शितः॥ ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः॥ अध्वगः क्षी-
णवृत्तिश्च षडेते भिक्षुकाः स्मृताः॥ एते पंच महायज्ञा यथाकाले यथाकृतास्तदा यमः॥

दिवोदितानि कर्माणि प्रसादादकृतानि चेत्॥ शर्वर्याः प्रथमे पादे तानि सर्वाणि कारयेत्॥
अन्नयज्ञावगाहौ च सौरं च परिवर्जयेदिति॥ एवं स्वस्वशाखोक्तप्रकारेण वैश्वदेवः
साग्नेर्भवति॥ निरग्नेरपि पृष्ठोदिविविधानेन स्वस्वशाखोक्तरीत्या॥ तदुक्तं कात्यायनगृह्य-
परिशिष्टे॥ अथातो धर्मजिज्ञासा केशांतादूर्ध्वमपत्नीक उत्सन्नाग्निरनग्निको वा प्रवा-
सी ब्रह्मचारी वा उँ उन्वानिरिति ग्रामाग्निमाहृत्य पृष्ठोदिवीयथिष्ठाप्य त्रिभिस्त्रसा॥ चित्रैः
प्रज्वाल्य तान्वस्य वितुस्तस्य वितुविश्वानि देव सवितरिति पूर्ववदष्टौ हुत्वा पाकं चेत्त-
त्र वैश्वदेवं ब्रह्मणो प्रजापतये गृह्याभ्यः कश्यपायानुमतये विश्वेभ्यो देवेभ्योऽग्नये-
स्विष्टकृते इत्युपस्थाय पूर्ववद्बलिमेकेनैवं कृते तेन वृथा पाको भवति न वृथा पाकं प-
चेन वृथा पाकमश्नीयात् पिंडपितृयज्ञपक्षाद्याग्रयणानि कुर्यादिति॥ अग्न्य-
लयनोपि॥ लेखादयो — यच्चा तस्त तां सविश्वानि नो यानि यान इमे च मंत्राः॥ ना-
परोपणं वाप्यवरोपणं वाप्युत्पत्तिरेव विधुरान लक्ष्येति॥ अथ यथालत्स्यादिना
पृष्ठोदिविविधानं॥ न करोति तत दाशाकले वैश्वदेवः कार्यः॥ तदुक्तं व्यासस्मृतौ॥

वि० प० अनग्निकस्तु यो विप्रः अदायान्नं घृतं प्लुतं ॥ शाकलोक्तविधानेन जुहुयाल्लौकिके
७३ ऽनले ॥ व्यस्ताभिर्व्याहृतीभिस्तु समस्ताभिस्ततः परं ॥ षड्भिर्देवकृतस्येति या इमं स्मृ०
त्रैर्यथाक्रमं ॥ प्रजापतिं स्विष्टकृतं हुत्वैवं द्वादशाहुतीः ॥ देवकृतस्येति षण्मंत्रास्तु ३
॥ ॐ देवकृतस्यैनसोवयजनमसि स्वाहा ॥१॥ मनुष्यकृतस्य० स्वाहा ॥ पितृकृ०
स्वाहा ३ आत्मकृ० हा ४ अन्यकृत० ५ एनस एनस० स्वाहा ६ अग्नये चेन न मम
ति सर्वत्र त्यागः ॥ ॐकारपूर्वः स्वाहान्ते त्यागः ॥ शिष्टविधानतः ॥ भुवि दर्भान्समा
स्तीर्य बलिकर्म समाचरेत् ॥ विश्वेभ्यो देवेभ्य इति सर्वभूतेभ्य एव ॥ भूतानां पत रामः
य इति नमस्कारेण शास्त्रवित् ॥ दद्याद्बलित्रयं चाग्नेः पितृभ्यश्च स्वधा नमः ॥ पा ७३
त्रनिर्णेजनं वारि वायव्यां दिशि निक्षिपेत् ॥ उद्धृत्य षोडशग्रासमात्रमन्नं घृतोक्षि
तं ॥ इदमन्नं मनुष्येभ्यो हन्तेत्युक्त्वा समुत्सृजेत् ॥ गोत्रनामस्वधाकारैः पितृभ्यश्चा
पि शक्तितः ॥ षड्भ्योन्नमन्वहं दद्यात् पितृयज्ञविधानतः ॥ ततोन्यदन्नमादाय निर्ग

त्य भवनाद्बहिः ॥ काकेभ्यः श्वपचेभ्यश्च प्रक्षिपेद्ग्रासमेव च ॥ उपविश्य गृहद्वारि ति
ष्ठेद्यावन्मुहूर्तकं ॥ अप्रमत्तचोऽतिथिं लिप्सुर्भावशुद्धः प्रतीक्षक इति ॥ सच्छूद्रस्या
पि वैश्वदेव उक्तो याज्ञवल्क्येन ॥ भार्यारतिः शुचिर्भृत्यभर्ता श्राद्धक्रियापरः ॥ नम
स्कारेण मंत्रेण पंचयज्ञान्न हापयेदिति ॥ न हापयेदनुतिष्ठेत् ॥ नमस्कारेण मं
त्रेणेति ॥ देवेभ्यो नमो ब्राह्मणेभ्यो नमः पितृभ्यो नमो मनुष्येभ्यो नम इति नमस्कारां
तेन मंत्रेण ॥ यद्वा ॥ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ॥ नमः स्वाहायै स्व
धायै नित्यमेव नमो नमः इति वायुपुराणोक्तेः ॥ नवा शूद्रस्य पंचमहायज्ञा
भवंति ॥ ते च मद्रव्येणाकार्याः ॥ पक्वेनेति षिद्धत्वात्तु ॥ पाकाभावे प्रवासे च तं
डुलानोषधीस्तथा ॥ पयो दधि घृतं वापि कंदमूलफलानि च ॥ इति स्मृत्युक्तानुक्त
व्यद्रव्येण पंचमहायज्ञान्कृत्वा तद्द्रव्यं तत्प्रकुले प्रवेष्टपितव्यमिति शास्त्र
रहस्यं ॥ श्राद्धं त्वामेनैव शूद्रस्येत्यादिना यमोदामेनैव श्राद्धं ॥ विवाहे तु वि

वि०प० वाङ्मात्रसंस्कारश्चेदपि लभते स इति विधायेतरसंस्कारनिषेधपरात्तद्व
७४ चनाच्छिष्टसमाचाराच्च लौकिकेऽग्नौ ब्राह्मणद्वारा नाममंत्रैः धर्मादिना होमो भ स्म०
वतीति गम्यते॥ स्कांदे प्रभासखंडे शूद्रस्य निषिद्धमुक्तं॥ न दर्भानुद्धरेच्छूद्रो न पिबे ३
त्कापिलं पयः॥ मध्यपत्रे न भुंजीत ब्रह्मवृक्षस्य भामिनि॥ नोच्चरेद्वेदमंत्रांश्च पुरोडा
शं न भक्षयेत्॥ न शिखां नोपवीतं च नोच्चरेत्संस्कृतां गिरं॥ न पठेद्वेदवचनं त्रिषवं
न हि सेवयेत्॥ नमस्कारेण मंत्रेण क्रियासिद्धिर्भवेद्ध्रुवं॥ निषिद्धाचरणं कुर्वन्नपि
तभिः सद्धमज्जतीति॥ न शिखामित्येतदसच्छूद्रविषयं॥ सच्छूद्रे तु॥ परिचर्या
शूद्रस्य नियता वृत्तिरनियताः केशवेषा इति वसिष्ठस्मरणात् द्विकस्येन शिखा राम:
भवतीति गम्यते॥ मनुः॥ शूद्राणां मासिकं कार्यं वपनं न्यायवर्तिनां॥ अर्थव ७४
च्छौचकल्पश्च द्विजोच्छिष्टस्य भोजनं॥ अपर्याप्तविषयस्तद्वच्छौचे सूतकादौ कल्प्यः प्र
कारः शेषस्य स्पष्टः॥ अन्यच्च॥ दिवाचं पुरतः कृत्वा ब्राह्मणानां नृपोत्तम श्रोतव्यमे

व शूद्रेण नान्यैश्च द्विजातिभिः॥ तथा॥ स्त्रीभिः शूद्रैश्च श्रोतव्यं कृत्वा ब्राह्मणमग्र
तः॥ पुराणं चेतिहासश्च श्रोतव्यं च दिने दिने॥ तथा॥ क्षमा सत्यं दमः शौचं दानमिं
द्रियसंयमः॥ अहिंसा गुरुशुश्रूषा तीर्थानुगमनं दया॥ आर्जवं लोभशून्यत्वं देव
ब्राह्मणपूजनं॥ अनभ्यसूया च तथा धर्मः सामान्य उच्यते इति विष्णूक्तः साधार
णधर्मः शूद्रेणाप्यनुष्ठेयः एतच्च बहुप्रपंचनेति प्रकृतमनुस्त्रियते॥ एवं कृते वै
श्वदेवो गोग्रासं दद्यात्॥ तदाह कश्यपशृंगः॥ गवां ग्रासं च कुर्वीत नित्यमेव समा
हितः॥ गवां कंडूयनं स्पर्शं ग्रासमाह्निकमेव च॥ तत्र मंत्रः॥ सौरभेय्यः सर्वहिताः
पवित्राः पापनाशनाः॥ प्रतिगृह्णंतु मे ग्रासं गावस्त्रैलोक्यमातरः॥ इति मंत्रेण
संपूज्य गोग्रासं दद्यात्॥ ततो नरहिः काकबलिः॥ मनुः॥ शूनां च पतितानां च श्व
पचां पापरोगिणां॥ वायसानां क्रिमीणां च शनकैर्निक्षिपेद्भुवि॥ तन्मंत्रस्तु॥
ऐंद्रवारुणवायव्या याम्या वै नैर्ऋतास्तथा॥ वायसाः प्रतिगृह्णंतु भूमौ पिंडं

वि०पा० मयार्पितं ॥ वायसेभ्यो नम इति वायसबलिः ॥ तथा ॥ द्वौ श्वानौ श्यामशबलौ वैव
७८ स्वतकुलोद्भवौ ॥ ताभ्यां पिंडं प्रदास्यामि रक्षेतां पथि मां सदा ॥ इति श्वभ्यो नम इ स्मृ० ३
ति श्वबलिः ॥ तथा ॥ पिपीलिकाः कीटपतंगकाद्या बुभुक्षिताः कर्मनिबद्धबंधाः ॥ प्रयांतु ते
तृप्तिमिदं मयान्नं तेभ्यो विसृष्टं सुखिनो भवंतु ॥ इति कृमिकीटपतंगेभ्यो नम इति त
द्बलिर्देयः ॥ तथा ॥ प्रवासं गच्छतो यस्य गृहे कर्त्ता न विद्यते ॥ पंचानां महतामेषां स
यज्ञैः सह गच्छतीर्थत्रीमोक्षस्यदानमन्नतो गमनं तथा ॥ असंख्यातं तु यज्जप्तं त
त्सर्वं निष्फलं भवेत् ॥ तथा ॥ न पश्येद्भूतबलिं वीरः दत्वा गृहबलीन्द्विजः स्वयं नै
वोद्धरेन्मोहाद्यदि तद्धी विनश्यति ॥ गालवः ॥ वैश्वदेवं दिवा नक्तं नैमवेष्ठेत्पथ रामः
कृत्यकृत् ॥ प्रातरेव द्विरावृत्त्या कर्त्तव्यं स्मृतिशासनात् ॥ तथा ॥ दिवा वा यदि ७८
वा रात्रौ क्रियते वैश्वदेविकं ॥ द्विरावृत्त्या तदा कुर्यादिति वेदविदो विदुः ॥ एत
च्चयथारव्यां सायं प्रातर्वैश्वदेवो विहितस्तद्विषयं ॥ अन्येषां सकृदेव भवती
स्मरणात् प्रवासे च्यवेत यथाशक्ति कर्त्तव्यमेव ॥ तत्रापि वैश्वदेवस्त्यानि विद्धः ॥ यद्दत्तो हो ॥ द्वि

त्यक्तमेव ॥ शौनकः ॥ वैश्वदेवं तथा श्राद्धं ब्रह्मयज्ञं च सूतके ॥ न कुर्यात्स्वयमन्येन कारये
न्नैव सर्वथा ॥ स्मृत्यर्थसारेपि ॥ कुर्यात्पंचमहायज्ञान्नित्यदा सूतकं विनेति ॥ तथा ॥
आत्मार्थं पचनं यस्य रत्यर्थं यस्य मैथुनं ॥ वृत्त्यर्थं यस्य चाधीतं निष्फलं तस्य जीवितं
॥ अस्नाताशी मलं भुंक्ते ह्यजपी पूयशोणितं ॥ अहुत्वाशी कृमीन्भुंक्ते अनर्च्य रुधिरं
तथैव यचेयादि ॥ ततस्तृतीयाबालजुष्टा गम्योपपथाहं मश्रीयुः ॥ अन्येपि तत्काल
समागता भोज्यानीयाः ॥ भोजनकाले समागतान्सखिसंबंधिबांधवान्भोजयेदि
ति वसिष्ठोक्तेः ॥ एवं पंचमहायज्ञा अहरहः कार्याः ॥ अन्नाभावे केनचिदा काष्ठाद्देवे
भ्यः पितृभ्यो मनुष्येभ्य ओदपात्रादिति कात्यायनोक्तेः ॥ विना सूतकं पंचमहाय
ज्ञाकरणे प्रायश्चित्तमुक्तं स्मृतौ ॥ स्वकर्महीनो पतनमब्देनैवत्यं नायदि ॥ स्वक
र्महीनो नास्तिकया मासेन पतनं स्मृतं ॥ द्वादशाब्दव्रतेनैव तस्य शुद्धिस्तु नान्यथा
॥ तन्निरीक्ष्यार्कमीक्षेत स्पर्शे स्नानं सचेलकं ॥ वेदोदितानां नित्यानां कर्मणां स
८

मतिक्रमे॥ स्नातकव्रतलोपे च प्रायश्चित्तमभोजनमित्याद्यलं प्रपंचेन॥ ॥इति श्रीमद
नंतभट्टविरचिते विधानपारिजाते आह्निकविधौ वैश्वदेवविधानं॥ ॥अथ भोज
नविधानं॥ तत्र याज्ञवल्क्यः॥ संभोज्यातिथिभृत्यांश्च दंपत्योः शेषभोजनं॥ बालस्व
वासिनीवृद्धगर्भिण्यातुरकन्यकाः॥ दंपत्योरपि मध्येपि पूर्वं पतिः शेषान्नमश्नी
यात्॥ ततः पत्नीति॥ भारते दानधर्मे॥ अदत्त्वातिथिभ्यो यो भुंक्ते भुक्तैव नरः सदा
अघं स केवलं भुंक्ते इति विद्धि युधिष्ठिर॥ अभुक्तवत्सु नाश्नाति आत्मलोलुपचयो नरः।
अभोजनेमतेनाथजितः स्वर्गोभिवसुना॥ देवेभ्यश्च पितृभ्यश्च संश्रितेभ्यस्तथैव
च॥ अवशिष्टानि यो भुंक्ते तमाहुर्विघसाशिनमिति॥ देवलः॥ आहारं तु रहः कुर्या
न्निर्हारं चैव सर्वदा॥ गुप्ताभ्यां लक्ष्म्युपेतः स्याद्व्यक्ताभ्यां हीयते श्रिया॥ रहः॥ ए
कांते॥ निर्हारः पुरीषाद्युत्सर्गः स्त्रीसंगश्च॥ मैथुनं सततं गुप्तमाहारं च सदाच
रेदिति दानधर्मोक्तेः॥ व्यासश्च॥ पंचार्द्रो भोजनं कुर्यात्प्राङ्मुखो मौनमास्थितः॥

हस्तौ पादौ तथैवास्यमेषां पंचार्द्रता स्मृता॥ आचारदीपे॥ स्नास्यतो वरुणः कांतिं
जुह्वतोग्निः श्रियं हरेत्॥ भुंजतो मृत्युरायुष्यं तस्मान्मौनं त्रिषु स्मृतं॥ मनुः॥ आयु
ष्यं प्राङ्मुखो भुंक्ते यशस्यं दक्षिणामुखः॥ श्रियं प्रत्यङ्मुखो भुंक्ते ऋतं भुंक्ते उदङ्
मुखः॥ एतत्काम्यं॥ नित्यविधिस्तु प्राङ्मुखोन्नानि भुंजीत तथोत्तरमुखोपि वेति
॥ अनायुष्यं त्वेवं मुखस्य भोजनं मातुरिति पुत्रे दिशतीत्यापस्तंबस्मरणाज्जीवन्मा
तृकस्य दक्षिणामुखभोजननिषेधः॥ आचारदीपेपि॥ पुत्रवान्न स्वगेहे नित्यं ना
श्नीयाद्दक्षिणामुखः॥ सोमवारे तथा यत्नं वर्जयेत्तु सदा बुधः॥ भोजनकालमाह म
नुः॥ सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितं॥ नांतरा भोजनं कुर्यादग्निहोत्र
समो विधिः॥ भारते दानधर्मे॥ सायं प्रातर्मनुष्याणामशनं देवनिर्मितं॥ नांतरा
भोजनं दृष्टमुपवासविधिर्हि तत्॥ अंतरा सायमाशं च प्रातराशं न यो नरः॥ सदोप
वासी भवति यो न भुंक्ते तरा नर इति॥ अत्र प्रातःशब्दः पंचधा विभक्तदिनस्य तृतीय

भागवान्यकः॥ तथा॥ ततो भोजनवेलायां कृत्वाचारं सदाभवान्॥ व्यो ध्यवगसिभोप स्त॰
तो भोजनं कारयेद्बुधः॥ माता पिता गुरुर्भार्या पुत्रो दासस्तथैव च॥ अभ्यागतो ऽतिथि ३
श्चाग्निः पोष्यवर्गो ऽयमीनव॥ ब्रह्मपुराणे॥ उपलिप्ते समे स्थाने शुचौ शुद्धासनान्वि
ते॥ मंडलं गोमयेन स्याद्यवगौरमृत्स्नया॥ मंडलमाहव्यासः॥ चतुरस्रं त्रिको
णं च वर्तुलं चार्द्धचंद्रकं॥ कर्तव्यमानुपूर्व्येण ब्राह्मणादिषु मंडलं॥ शौरवः॥ आ
दित्या वसवो रुद्रा ब्रह्मा विष्णुस्तथैव च॥ मंडलं त्वपजीवंति तस्मात्कुर्वीत मंडलं॥
यातुधानाः पिशाचाश्च असुरा राक्षसास्तथा॥ हरंति रसमन्नस्य मंडलेन वि रामः
वर्जितं॥ आसनमाह मनुः॥ श्रीपर्णी च शमीशामी द्रौ कदंबो वारुस्तगोध्या॥ पंचास ७७
नोपविष्टस्तु स्नानहोमादिकं चरेत्॥ न ज्येष्मुक्तं प्रचेतसा॥ गोशालन्ननयंभिन्नं
तथा पालाशं पिप्पलं॥ लोहबद्धं सदैवार्कं वर्जयेदासनं बुधः॥ तथा॥ मधुपर्के
भोजनांते संध्यादौ नित्यकर्मणि॥ आसनस्थः सदाचामेदन्यत्र कुक्कुटासनः॥ य

स्तु भोजनवेलायामासनस्थ उपस्पृशेत्॥ ब्राह्मणो भोजनात्पूर्वं तमाहुः पंक्तिदूषकमि
त्यादिस्मृतेः सेरीनस्थस्याचमननिषेधः॥ यौटीनसिः॥ एकैव तु यो भुंक्ते विमले कां
स्यभोजने॥ चत्वारि तस्य वर्द्धंते ह्यायुः प्रज्ञा यशो बलं॥ भिन्नभोजननिषेधादभिन्नकां
स्यपात्रं॥ सौवर्णसिति चैव पात्रे भोजनमाचरेदिति स्मृतेः॥ सौवर्णादिकमपि विभवे
सति कार्यं। ताम्रपात्रे न भुंजीत भिन्नकांस्ये मलाचिनः इति वृद्धमनूक्तेः ताम्रपात्रनिषे
धः॥ स्वीयपात्रे सर्वदा भोज्यं॥ परपात्रे तु भुंजानः प्राजापत्यं चरेद्द्विजः इति स्मृतेः॥ पा
त्रपरिमाणमाह योगी॥ पंचाशत्पलादूर्ध्वं महाभाजनमिष्यते॥ नातिदीर्घं ना
तिह्रस्वं रालिमात्रप्रमाणकं॥ गंधयत्तरेतु॥ पलविंशतिमारभ्य अतऊर्ध्वं यथेच्छ
या॥ इदमेव गृहस्थानां न यतिब्रह्मचारिणां मितस्यप्रमाणमप्युक्तं॥ तत्र मंत्रा
द्रघुपावात्ति निधेयानि नतन्मध्ये॥ लघीयांस्यपि पात्राणि भोस्थाप्यानि मार
त॥ पयःशाकादिभुक्तय पंच महाभाजनोपरि॥ स्वस्वेपार्श्वे च पानीयपात्रं दद्यात्

वि०प्रा० द्विचस्तता॥ आचारदीपे॥ दक्षिणां तु परां सव्य वामे नीरनिधापनात्॥ अभोज्य तस्य दे
७८ दन्नं पानीयं सुरयासमं॥ तथा॥ तांबूलाभ्यंजनं चैव कांस्यपात्रे च भोजनं॥ यतिश्च स्त्री० ३
ब्रह्मचारी च विधवा च विवर्जयेदिति व्याघ्रपादुक्तेर्यस्यादे॥ कांस्यपात्रनिषेधः॥ अ
थ प्रसंगाद्विधवाधर्माः कथ्यंते॥ स्कांदे॥ पत्यौ मृतेऽपि या योषिद्वैधव्यं पालयेच्च या॥ सा
पुनः प्राप्य भर्त्तारं स्वर्गलोकान्समश्नुते॥ एकाहारः सदा कार्यो न द्वितीयः कथं
चन॥ त्रिरात्रं पंचरात्रं वा पक्षव्रतमथापि वा॥ मासोपवासं वा कुर्याच्चांद्रायण
मथापि वा॥ यवान्नेन कृताहारैः शाकाहारैः पयोव्रतैः॥ प्राणायामं प्रकुर्वीत यथा
वत्प्राणात्॥ स्वयं व्रजेत्॥ वैशाखे कार्त्तिके माघे विशेषनियमं चरेत्॥ स्नानं दानं रामः
तीर्थयात्रां विष्णोर्नाम मुहुः पुनः॥ नाधिरोहेदनड्वाहं प्राणैः कंठगतैरपि॥ कंचु ७८
कं न परीदध्याद्वासो न विकृतं वसेत्॥ विधवाकबरीबंधो भर्त्तृबंधाय जायते॥
शिरसो वपनं तस्मात्कार्यं विधवया सदा॥ पर्यंकशायिनी नारी विधवा पातयेत्पतिं॥

तस्मात् भूशयनं कार्यं पतिसौख्यसमीहया॥ नैवांगोद्वर्त्तनं कार्यं स्त्रिया विधवया
क्वचित्॥ गंधद्रव्यस्य संभोगो नैव कार्यस्तया पुनः॥ यद्यदिष्टतमं लोके यच्च पत्यु
ः समीहितं॥ तत्तद्गुणवते देयं पतिप्रीणनकाम्यया॥ तर्पणं प्रत्यहं कार्यं भर्त्तुः कुश
तिलोदकैः॥ तत्पितुस्तत्पितुश्चैव तन्नामगोत्रादिपूर्वकं च॥ तर्पणं तु पुत्रपौत्राभावे ज्ञे
यं॥ श्राद्धं च तर्पणं चैव न कुर्यात्पुत्रिणी सदेति मृगः॥ विष्णोस्तु पूजनं कार्यं
पतिबुद्ध्या न चान्यथा॥ पतिमेव सदा ध्यायेद्विष्णुरूपधरं परं॥ अपत्यं तु सुतं किंचि
न्न कुर्याच्छ्रेष्ठं तत्स्मरेति॥ पुत्राद्यभावे तु विवंशो पुरायकल्पतकस्ये विशेषः॥ मूलेनैयं
चित्रगं वापि कृत्वा भर्त्तारं मसमनः॥ तदाज्ञया स्नानदानव्रतादीनाचरेत्सदेति॥ अ
थ मृत्त्यं मनुस्त्रियते॥ कांस्यपात्राभावे यमः॥ रंभाकुटजमध्वीसंजंबूपनसचंप
काः॥ पद्मोदुंबरपालाशाश्मपत्रा पवित्रकाः॥ अत्रिः॥ वटार्काश्वत्थपत्रेषु कुंभीतिं
दुकपत्रयोः॥ श्रीकामो नैव भुंजीत कोविदारकरंजयोः॥ करेरवपरके चैव त्रि

वि०पा० लायां ताम्रभाजने॥ भिन्नकांस्ये च वस्त्रे च न भुंजीत तथायसे॥ आसने पादमा
७९ रोप्य यो भुंक्ते ब्राह्मणः क्वचित्॥ मुखेन धमितं चान्नं तुल्यं गोमांसभक्षणैः॥ स्तं० ३
दक्षः॥ भोजनं हवनं दानमुपहारः प्रतिग्रहः॥ बहिर्जानु न कार्याणि तद्वदाचम
नं जपः॥ नाश्नीयाद्भार्यया सार्द्धं नाकाशे न ततोत्थितः॥ शयानः प्रौढपाद
श्च कृत्वा चैवावसक्थिकं॥ आकाशेयं त्वादो॥ पादारोपितपादः प्रौढपादः स्व
गृहे त्वविशेषः॥ मात्रा सहोपनीतस्याद्विवाहे भार्यया सह॥ अन्यत्र सह भुंजा
नः समः स्यात्सह भूमिः सह॥ प्रयोगपारिजाते गर्गः॥ रंभापत्रे पलाशे च युवा कुर्या
त्पारणं क्वचित्॥ सप्तजन्मकृतं पुण्यं तत्क्षणादेव नश्यति॥ पुत्रमिताक्षरा रामः ८०
यां॥ पलाशपत्रे भोजी च भवेद्धोरा त्रिरात्रेण शुध्यतीति यो नित्यनिषेध उक्तः स वटाश्व
पलाशविषय इति मदनपारिजाते व्याख्यातं॥ पलाशपत्रे भोजीयः सोनंतफ
लमश्नुत इति विशेषोक्तेः॥ यमः॥ शाकादिपुरतः स्थाप्यं भक्ष्यं भोज्यं च वामतः॥

अन्नं मध्ये प्रतिष्ठाप्यं दक्षिणेन घृतपायसे॥ पात्रं धृत्वा तु वामेन यावद्भवति भोजनं
॥ पाणिना दक्षिणेनैव पर्युक्ष्य परिषेचयेत्॥ अंगुष्ठस्तर्जनी चैव मध्यमा चैव सर्व
दा॥ तिस्रोऽपि द्वे कांगुली चैव प्रशस्ता पात्रधारणे॥ भारते॥ आज्याहुतिं विना चैव
यत्किंचित्परिविष्यते॥ दुराचारैश्च यद्भुक्तं तं भागं रक्षसां विदुः॥ मार्कंडेयोत्र विशेष
माह॥ न्यस्तपात्रस्तु भुंजीत पंच ग्रासान्महामुने॥ शेषमुद्धृत्य भोक्तव्यमश्रयतोमत्र
कारणमिति॥ उद्धृत्य यं त्वादौ पात्रस्थापयित्वेत्यर्थः॥ यंत्रसंग्रहे॥ कांस्यस्य का
ष्ठकस्यापि वंशस्यापि तथैव च॥ यंत्रिका तु त्रिकोणा वा कर्तव्या पात्रधारणे॥ ब्र
ह्मांडे॥ अदने परमान्ने च हतपात्रस्थितं यदि॥ तदाज्यमेव प्रोक्तं तदन्नं
मांसमुच्यते॥ ब्राह्मे॥ सैंधवं लवणं चैव तथा मानससंभवं॥ पवित्रे परमे ह्येते
प्रत्यक्षे च तु दुष्यते॥ सामुद्रेन निर्मितं जं चैव प्रत्यक्षे चैव दुष्यते॥ तस्माद्दिव्यं देव्यां
तरं परिवेष्यं॥ श्राद्धादिभोजने यंत्रीभाव उक्तो ब्राह्मे॥ पंच ग्रासांस्तु भुंजीत केचिदे

वि० पा० इमनिसंकरेत्॥ पात्रमुद्धृत्यनोद्धंतु भक्षयेत्सैतत्काहते॥ गर्गः॥ सव्यंचव्येन चप्रातवारि
८० णा परिषेचयेत्॥ सायंकालेतथैवस्यादन्नंत्वेमोत्यादितः क्रमात्॥ आपस्तंबः॥ कौ श्रा० ३
शेनुविमृश्याज्जित्यं पवित्रं दक्षिणेकरे॥ भुंजानस्तुविशेषेण ग्रहितोन्नविशुद्धये॥॥
भोजनेनवर्तुलं प्रोक्तं पवित्रं सर्वेषि वर्जितमिति॥ तथा॥ उद्धृत्य किंचिदन्नाग्रं धर्मराजा
यवैवलिं॥ दत्वाथ चित्रगुप्ताय भक्तेभ्यश्च तथैव च॥ अन्नेनैव घृतान्नेन नमस्का
रेण वैभुवि॥ तिस्रः शवाहुती दद्याद्भोजनादौ तु दक्षिणे॥ इति भविष्यपुराणे॥ भो
जनादावन्नेनेत्युक्ते भोजनादन्यत्र फलाहारादौ न चित्राहुतिरिति गम्यते॥ कौ रा० म०
चित्॥ भूपतये भुवनपतये भूतानां पतये नमः॥ एवं बलित्रयं दद्याद्भोजनादौ ८०
विशेषरसाहुः॥ अत्राचारतो व्यवस्थां॥ पितृकार्ये तु॥ पितृणां मन्त्रमुद्दिश्य बलिं कु स्र
र्वंति ये द्विजाः॥ आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठति॥ युक्तस्पर्शनांते स्पर्शो
दकेकस्यांते बलिं हरेत्॥ होमस्तु मधुवातांते होमांते चोदकं पिबेदिति लत्तु वेश्यदे

विकद्विजविषयं॥ पित्र्यद्विजस्य बलिदाननिषेधात्॥ इति श्राद्धकल्पे॥ सूतकेपि बलिदा
नापोशानप्राणाहुतिपात्रधारणादयो भुंजिनियमा भवंतीस्मृत्यर्थसारे स्पष्टमुक्तं॥
अन्यत्रापि॥ नित्यस्नानं च शौचं च भोजनं नियमान्वितं॥ अस्पृश्यस्पर्शने स्नानं कु
र्यादिव च॥ सूतके॥ अन्यत्रानधिकारात्तर्पणादेवाचादयो न भवंति मनुः॥ दत्वा तु
चित्रगुप्ताय हस्तं प्रक्षालयेद्द्विजः॥ अप्रक्षालितकरो भुंक्ते रौरवं नरकं व्रजेत्॥ चंद्रिका
यां दक्षः॥ भोजनादौ बलिमुक्तेस्समुद्धृत्य च भोजने॥ अनुद्धृत्य च यो भुंक्ते प्राणायामा
ष्टकं चरेत्॥ उक्ता उमृतोपस्तरणमिति स्वाहांतमेव च॥ अपोशानांतरं द्याद्भोजि
नादौ पिबेज्जलं॥ अपोशानमकृत्वा तु यो भुंक्ते द्विजसत्तमः॥ अभोज्यं तद्भवेदन्नं
भुक्त्वा दोषमवाप्नुयात्॥ तद्दोषपरिहारार्थं प्राणायामान् समाचरेत्॥ अपोशाना
र्थं यत्तोयं घृतं चेन्निःस्रुतं भवेत्॥ हस्तं प्रक्षाल्य तोयेन पुनर्वै धारयेज्जलं॥ अपो
शानं करे कृत्वा यद्याशीर्वचनं पठेत्॥ अभोज्यं तद्भवेदन्नं दाता भोक्ता च किल्बिषी॥

योयस्याज्ञांसमाश्नाति स तस्याश्नाति किल्बिषं॥ न दोषपरिहारार्थं मंत्रमेतदुदीर
८८ येत्॥ अन्नं ब्रह्म रसो विष्णुर्भोक्ता देवो महेश्वरः॥ एवं ध्यात्वा द्विजो भुंक्ते स चान्नदोषैर्न स्मृ०
लिप्यते॥ प्राणाहुतीः कृत्वा तु पश्चादन्नं परिमर्दयेत्॥ मर्दितं भोजयेद्यस्तु प्राजापत्यं २
ततश्चरेत्॥ चित्राहुतिदानानंतरं हस्तं प्रक्षाल्य पंक्तिदोषसंभावना चेज्जलधाराद्
ीपंक्तिभेदादि युक्तं॥ पारिजाते वृद्धमनुना॥ एकपंक्त्युपविष्टानां दुष्कृतं यदुरात्म
नां॥ सर्वेषां तत्समं तावद्यावत्पंक्तिर्न भिद्यते॥ अग्निना भस्मना चैव स्तंभेन सलि
लेन वा॥ द्वारेणैव च मार्गेण पंक्तिभेदो बुधैः स्मृतः स्तंभेनेति क्वचित्॥ पाठः॥ या राम:
ज्ञवल्क्यः॥ अपोशानेनोपरिष्टादधस्तादशनं तथा॥ अनग्नममृतं चैव कार्यमन्नं ८१
द्विजन्मना॥ दक्षः॥ शब्देनापोशनं पीत्वा शब्देन घृतपायसं॥ शब्देनापः पयः पीत्वा
सुरापानसमं भवेत्॥ आर्द्रामलकमात्रं तु यद्वा बदरमात्रकं॥ प्राणाहुतिप्रमाणं च
सघृतान्नस्य तद्भवेत्॥ घृतहीनं तु यो भुंक्ते नरस्त्वाहुतिपंचकं॥ पश्चाद्घृतेन यो

भुंक्ते द्विजश्चांद्रायणं चरेत्॥ घृताभावे तु गव्येन संस्कुर्वीत तिलेन वा॥ गव्येन दध्ना नेय
र्थः॥ पराशरः॥ मुखे चान्नस्य निक्षेपो मंत्रैः प्राणादिपंचभिः॥ भोजने तद्विशेषो ज्ञेयं ते
चैव नियमाः स्मृताः॥ पात्रात्मनस्तथा मौनं तदर्धमपि चेद्धृया॥ शौनकः॥ स्वाहांताः प्र
णाद्याश्च नाम्ना मंत्रास्तु वायवः॥ जिह्वया च ग्रसेदन्नं दशनैर्न नः स्पृशेत्॥ तथै
व षड्भिर्दद्यात्तु स्वचेतन्ये सुखात्मनि॥ तर्जनीमध्यमांगुष्ठलग्ना प्राणाहुतिर्भवेत्॥ म
ध्यमानामिकांगुष्ठैरपाने जुहुयाद्द्विजः॥ कनिष्ठानामिकांगुष्ठैर्व्याने तु जुहुयाद्बुधः॥ क
निष्ठातर्जन्यंगुष्ठैरुदाना हुनेद्द्विजः॥ सर्वांगुलिभिरादाय समानस्याहुतिर्भवेत्॥ त
थैव षड्भिर्जुहुयात्स्वचेतन्ये सुखात्मनीति॥ केचिद्धन्वन्तरिः स्वाहेति समर्पी मा कुः॥ अत्र
ध्यायं प्राणाग्निहोम तं जुहोमीत्यादि तैत्तिरीयपारतत्रे केन ध्येत्वोदिति॥ इदं च प्राणा
ग्निहोत्रमिति ज्ञेयं॥ तदुक्तं ज्ञानपद्धात्मो॥ ते पुरुषमाविशानत्तत्स्य मुखमेवाहव
नीयं कुर्वीत जिह्वा ... समिधमन्नमेव सुक्को माहुतिं ते पुरुषं तर्पयतः स यशवानेद्द

वि॰ प॰ नश्यत्यग्निहोत्रमेवास्याहुतंभवतीति॥ श्रुत्यंतरेपि॥ सयइदमविद्वानग्निहोत्रंजुहोतिय
८२ थांगारानपोह्यभस्मनिजुहुयात्तादृक्तत्स्यादथयएतदेवंविद्वानग्निहोत्रंजुहोतितस्यस स्मृ॰ ३
र्वेषुलोकेषुसर्वेषुभूतेषुसर्वेष्वात्मसुहुतंभवतीति॥ गोभिलसूत्रे॥ पंचग्रासान्गृह्णी
यात्॥ प्राणायस्वाहेतिगार्हपत्यमेवतेनजुहोत्यपानायस्वाहेत्यन्वाहार्यपचनमेव
तेनजुहोतिव्यानायस्वाहेत्याहवनीयमेवतेनजुहोत्युदानायस्वाहेतिसभ्यमेवतेन
जुहोतिसमानायस्वाहेत्यावसथ्यमेवतेनहोजुहोतीति॥ सामोपनिषद्यपि॥ तद्यद्भक्तं
प्रथममागच्छेदित्यादिनोक्तोच्छिष्टदोषः प्रत्याहुति॥ तदाह मनुः॥ मधुपर्के च सोमे च
अप्सु प्राणाहुतीषु च॥ आस्यहोमेषु सर्वेषु नोच्छिष्टं मनुरब्रवीत्॥ तथा॥ स्मृतिसंग्र राम: ८२
हे॥ एवंपंचाहुतीर्हुत्वाब्रह्मग्रंथिंविसृज्यच॥ प्रक्षाल्यवामहस्तंतुपश्चाद्भोजनमा
चरेत्॥ तर्जन्यांतुस्थितेरौप्येब्रह्मघ्नोचमयानि॥ कनिष्ठिकायांस्थितेस्वर्णेनैवभो
जनमाचरेत्॥ अन्यथाभोजनेकुर्वन्प्राणायाममाचरेत्॥ यद्यभुक्त्वातदन्नंतुकिंचिद्दे

स्थापयेत्स्वयं ह॥ यद्यप्यस्तितंचान्नंगृहीत्वाभोजनंचरेत्॥ अनित्यायदृष्ट्वान्नंगाय
त्र्याभिमंत्रितं॥ पुनरन्नेनगृह्णीयाद्यदिभुंजीतदोषभाक्॥ पंक्तिभेदेनयोभुंक्तेपरकीये
स्वकेपिवा॥ तदन्नंमांसमित्याहुः भक्षयेद्रोगीचजायते॥ सर्वाभिरंगुलीभिः समश्नीया
दितिवसिष्ठोक्तेः॥ समुदितांगुलिभिर्भुंजीत॥ तथा॥ जलंपात्रंतुनिक्षिप्यमणिबंधेचप
क्षितो॥ विप्रोभोजनकालेतुपिबेद्वामेनपाणिना॥ अन्यत्रतु॥ धारयानोनोदकंपेयं
पीत्वादोषमवाप्नुयात्॥ जलपात्रेणतन्नपेयमितिज्ञात्वातातपोऽब्रवीत्॥ एकपंक्त्युपवि
ष्टानांविप्राणांसहभोजने॥ यद्येकोपित्यजेत्पात्रंनाश्नीयुरितरेप्यनु॥ भुंजानेषुतु
विप्रेषुयोग्रेपात्रंविमुंचति॥ समूढोनरकंयातिब्रह्महासनिगद्यते॥ मर्यादिकरणेदो
षोनेत्युक्तमेवप्राक्॥ एकपंक्त्युपविष्टानामन्योन्यंसंस्पृशेतयदि॥ तदन्नमत्यजन्भुक्त्वा
गायत्र्यष्टशतंजपेत्॥ भवेदुच्छिष्टसंस्पर्शोभोक्तुर्वाभोजनस्यवा॥ अन्नंतदेवभो
क्तव्यंनसाज्यंभाजनेस्थितं॥ अन्यदन्नंनभोक्तव्यंयदिभुंजीतकिल्बिषी॥ स्नात्वात

वि० पा० तो जपेद्देवीं शतमष्टोत्तरं द्विजः॥ वृद्धशातातपस्तु॥ यदा भोजनकाले तु अशुचिर्भवति स्मृ०
८३ द्विजः॥ भूमौ निक्षिप्य तं ग्रासं स्नात्वा शुद्धिमवाप्नुयात्॥ अशित्वा सर्वमेवापि त्रिरात्रेण ३
विशुध्यति॥ अज्ञानाद्भोजनं कुर्वन्॥ यच्चाष्टशतं जपेद्दिव्याः॥ मदनपारिजाते मा
र्कण्डेयः॥ यस्तु पाणितले भुंक्ते यः सन्नाद्धं समश्नुते॥ अंगुलिचोद्धरे यस्तु गोमांसा
शनवत्स्मृतं॥ विष्णुपुराणे॥ अश्नीयात्तन्मना भूत्वा पूर्वं तु मधुरं रसं॥ लवणाम्लौ त
था मध्ये कटुतिक्तादिकांस्ततः॥ प्राक्द्रवं पुरुषोऽश्नीयान्मध्ये तु कठिनाशने॥ अंते
पुनर्द्रवाशी च बलारोग्येन मुंचति॥ नोच्छिष्टं घृतमादद्यात्तथा गव्यं विशेषतः॥ ज राम:
ठरं पूरयेदर्द्धमन्नो भागिं आपस्तंब॥ अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनः॥ ८३
द्वात्रिंशत्तु गृहस्थस्यामितं ब्रह्मचारिणः॥ पुलस्त्यः॥ भोजनं तु न निःशेषं कुर्या
त्प्राज्ञः कथंचन॥ अन्यत्र दधिसक्त्वाज्य पललक्षीरमध्वपः॥ पललं संमो॥ अनिं
द्यं भक्षयेन्नित्यं वाग्यतोऽन्नमकुत्सयन्नित्यादिस्मृतेरनिंद्यान्नभोक्तव्यं॥ तच्चे

न निंद्यात्॥ अन्नं न निंद्यात्॥ तद्व्रतमिति तैत्तिरीयश्रुतेः॥ अत्र वर्ज्यमाह याज्ञवल्क्यः
॥ अनर्चितं वृथा मांसं केशकीटसमन्वितं॥ शुक्तं पर्युषितोच्छिष्टं श्वस्पृष्टं पतितेक्षि
तं॥ उदक्यास्पृष्टपदास्पृष्टं च कामतः॥ अनार्चितं उन्मापावज्ञादत्तं यदन्नं॥ वृथा मां
सं प्राणात्ययेतथा श्राद्धे प्रोक्षितं द्विजकाम्यया॥ देवान्पितॄन्समभ्यर्च्य खादन्मांसं
न दोषभागित्युक्तप्रकारेण संपादितं मांसं वृथा मांसं॥ केशकीटसमन्वितमन्नं॥
शुक्तं॥ यत्स्वयमनम्लं सत्कालपरिवासादिनाम्लीभवति तद्द्रव्यर्थः॥ पर्युषितं
रात्र्यंतरितं॥ उच्छिष्टं भुक्तोच्छिष्टं॥ उदक्या रजस्वला तया स्पृष्टं॥ संघुष्टं॥ को भुंक्त
इत्यादि यदा घुष्यते दीयते॥ पर्यान्नमन्यसंबंध्यन्यव्यपदेशेन यद्दीयते॥ अन्य
स्य दृष्टं॥ पर्युषितप्रतिप्रसवमाह स एव॥ अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंस्थि
तं॥ अस्नेहा अपि गोधूमयवगोरसविक्रियाः॥ गोधूमविकारो मंडकः॥ यव वि
काराः सक्तुः॥ शंखः॥ अपूपाः सक्तु धाना स्तक्रं दधि घृतं मधु॥ एतत्पर्युषितं भोक्तव्यं

वि०पा० भांडलेपो न चेद्भवेत्॥ तथा॥ स्मार्ते॥ भांडसंस्थानि पयो दधिघृतानि च॥ तावत्स स्तं०
८४ तं हितं स्मृतं यावत्तत्र तिष्ठति॥ तथा॥ कलिंगं च पटोलं च वृंताकं - धितानि च॥ उपो ३
दकी रक्तशाकमेतान्येव वर्जयेद्द्विजः॥ नारदीयेपि॥ वृंताकं च कालिंगं च दग्धयन्त्र
मसूरिका॥ उदरे यस्य तिष्ठंति तस्य दूरतरो हरिः॥ शाकमूलफलेक्षुतालादं तद्दोद
न भक्षयेत्॥ लवणं व्यंजनं चैव घृतं तैलं तथैव च॥ लेह्यपेयं च विविधं हस्तदत्तं
न भक्षयेत्॥ अतो लवणादि दर्व्या देयं॥ अपक्वं स्नेहपक्वं च नतु रव्यां कदाचनेत्यु
क्तेरपक्वे स्नेहपक्वे हस्तेनैव देयं॥ केचित्तु वृंताकनिषेधः श्वेतवृंताकपर इत्याहुः
वर्जयेच्छ्वेतवृंताकं मलाबुं वर्तुलं तथा॥ छत्राकं लशुनं चैव मूलकं चाप्रयत्नतोपि च रामः
रेत्॥ इति विशेषोक्तेरिति॥ तत्तु निबंधेष्वनुपलंभादुपेक्ष्यं॥ रागमूलत्वात्॥ अनुपलं ८५
भेवोक्तत्वविशेषतां दोषतां दोषाधिक्याय वनन्त्विंतरप्रतिप्रसवाभा॥ प्रायश्चित्ता
धिक्यकल्पनादिति ज्ञेयं॥ तथा॥ रात्रौ दधि न भोक्तव्यं दिवा च नवनीतकं॥ पयसे

कशाकं रूपं तथा कामेलकाविकमिति स्कांदे॥ तथा तिथिविशेषवर्ज्यान्याह बृहस्प
तिः॥ कूष्मांडं तरुणीं चैव मूलकं बृहती तथा॥ श्रीफलं च कलिंगं च धात्री प्रतिपदा
दिषु॥ वर्जयेत्सप्तमी यावदन्यथा केध्रूमाचरेत्॥ सप्तम्यां रविवारे च दिवा रात्रौ
तथैव च॥ धात्रीफलेन रोऽश्नीयादलक्ष्मीको भवेन्नरः॥ विप्राणां भोजने काले यदि दी
पो विनश्यति॥ पाणिभ्यां पात्रमालभ्य गायत्रीं मनसा स्मरेत्॥ पश्चाच्च दीपकं द
ष्ट्वा तद्वद्भुंजते द्विजाः॥ अन्यदन्नं न भोक्तव्यं मुक्त्वा कलधूर्त्समाचरेत्॥ मक्षिकां
संतताधारा वेदसंबंधिबिंदवः॥ सुरते स्त्रीमुखं चैव पवित्रं मनुरब्रवीत्॥ अत्रा॥
प्राणात्ययेन यथा श्राद्धे प्रोक्षितं द्विजकाम्यया॥ देवान्पितॄन्समभ्यर्च्य खादन्मां
सं न दोषभागिति यदुक्तं॥ तस्यायमर्थः॥ अन्नाभावेन यदि प्राणनाशस्तदा मांस
भक्षणे न दोषः॥ सर्वत एवात्मानं गोपायेदिति श्रुतेः॥ तथा श्राद्धे निमंत्रितो मांस
मश्नीयात्॥ यथाविधिनियुक्तस्तु यो मांसं नात्ति मानवः॥ स प्रेत्य पशुतां याति।

वि० प० संभवानेकविंशतिमितिमनूक्तेः॥ तथा प्रोक्षणाख्यश्रौतसंस्कारसंस्कृतमांसभ
८५ क्षणे न दोषः॥ विहितत्वात्॥ अभक्षितो यागमांसिद्धेश्च॥ तथाऽतिथ्यर्चनार्थं संपादि स्त०
तं यज्ञांसं द्विजप्राशनेयात्मभक्षणे न दोष इति॥ अत्र यद्यपि दोषाभाव उक्तस्तथा ३
पि यागादन्यत्र कलौ मांसवर्ज्यं॥ तथा हि॥ अक्षता गोपशुश्चैव श्राद्धे मांसं तथा म
धु॥ देवराच्च सुतोत्पत्तिः कलौ पंच विवर्जयेदिति बृहन्नारदीयोक्तेः॥ अक्षता कृतवि
वाहानुपभुक्तापुनर्गोत्रखन्नविवाह्येत्यर्थः॥ शौचं च पत्रे शुद्धिश्च श्राद्धा च परमायदि
॥ अनंततृप्तिहेत्वादिरात तत्र खलु निरामिषमिति रहस्याराशङ्कारोक्तेश्च॥ हिंसाकूपे
यथा किंचिद्दातज्ञानं प्राप्नुयदिच्छति॥ एतस्य ज्ञानतः सोऽपि मांसं न श्राद्धे तत्त्वेति राम:
निगमोक्तेः॥ न दद्यादामिषं श्राद्धे न चाद्याद्धर्मतत्त्ववित्॥ मन्यन्नैः स्यात्परा प्रीतिर्यथा ८५
न पशुहिंसयेति भागवतोक्तेः॥ सर्वान्कामानवाप्नोति हयमेधफलं तथा॥ गृहे
पि निवसन्विप्रो मुनिर्मांसविवर्जनादिति याज्ञवल्क्योक्तेश्च॥ प्रोक्षितान्युक्षितं मांसं त

तथा॥ कालशाकं महाशल्कीः खड्गलोहामिषं मधु॥

पा ज्ञात्मतोकाम्या याः॥ अल्पदोषमिदं ज्ञेयं विपरीते तु लिप्यत इति दानधर्मेषु दोष
श्रुतेश्च॥ ननु पितृणां मासिकं श्राद्धमन्वाहार्यं विदुर्बुधाः॥ तदामिषेण कर्त्तव्यं प्रश
स्तेन प्रयत्नतः॥ आनंत्यायैव कल्पेत मुन्यन्नानि च सर्वश इति मनुयाज्ञवल्क्यादिस्मृ
तौ श्राद्धे मांसविधानाद्विधिनिषेधानां देशभेदेन व्यवस्थानुतानोङ्गीक्रियत इति चे
न्मांसनिषेधकवाक्यबलाद्विधिवद्देशभेदस्यालामीमांसावात्॥ तत्कल्पनायां तु या
वतिदेशं मांसवर्जनं दृश्यते तद्देशवाचकपदाभावादनेकपदकल्पने नराकेवा
क्यभेदापत्तिः प्रसज्येत॥ देशाचाराः परिग्राह्यास्तत्तद्देशीयैर्नरैः॥ अन्यथा पति
तो ज्ञेयः सर्वधर्मबहिष्कृत इति बृहन्नारदीयवचनबलान्नापि देशाचारतो व्यव
स्था॥ इदं वचनं तत्तद्देशसदाचाराणामेव व्यवस्थापकं बहुराचारस्यायस्मिन्दे
शे य॥ आचारः पारंपर्यक्रमागतः॥ श्रुतिस्मृत्यविरुद्धश्चैतमनुष्ठातुमर्हतीति
देवलोक्तेः॥ कलौ पंच विवर्जयेदिति रत्नाकरप्रमाणविरोधाच्च सलक्ष्मपक्ता

वि०पा० तुप्रसक्तेन॥ प्रकृतमुच्यते॥ याज्ञवल्क्यः॥ परपाकरुचिर्नस्यादनिंद्यामंत्रणादृते॥ व स्त०
८६ द्विंशान्नतेपिदुराचारस्यविप्ररस्यनिषिद्धाचरणस्यच॥ अन्नंभुक्त्वाद्विजःकुर्या ३
दिनमेकमभोजनं॥ लिखितः॥ परपाकनिवृत्तस्यपरपाकरतस्यच॥ अपचस्यच
भुक्त्वान्नंद्विजश्चांद्रायणंचरेत्॥ चांद्रायणमभ्यासविषयं॥ अनभ्यासेतुत्रिरात्र
मभोजनमेव॥ तदग्रहणामपिस्मरणा हा गृहीत्वाग्निंसमाप्यपंचयज्ञान्ननिर्वपे
त्॥ परपाकनिवृत्तोसौमुनिभिःपरिकीर्तितः॥ पंचयज्ञांश्चयःकृत्वापरान्नमु
पजीवति॥ सततंप्रातरुत्थायपरपाकरतस्तुसः॥ गृहस्थधर्मनिरतोयोददाति रामः
परिवर्जितः॥ ऋषिभिर्धर्मतत्त्वज्ञैरपचःपरिकीर्तितइति॥ आदित्यपुराणेएका ८६
दशाध्याये॥ तस्मादहरहर्देयमन्नमेकैकविचक्षणैः॥ अपरीक्ष्यैवसर्वेभ्यःपर
तिस्थायंमुखासनात्॥ आममन्नंगृहस्थायपक्वंनैवकदाचनादातव्यंहिनि
षिद्धंतद्दत्तेश्राद्धंशिवोब्रवीदिति॥ ज्ञातोतपः॥ वनैस्वातिगतेसोमेपरान्नंयेतुभुं

जते॥ तेषांमासकृतंपुण्यंदातारमधिगच्छतीति॥ उपासतेयेगृहस्थाः॥ परपाक
मबुद्धयः॥ तेनतेप्रेत्यपशुतांव्रजंत्यन्नादिदायिनामितिमनुवचनेलोभेनग्रामा
न्तरंगत्वापरान्नंभुंजतेतोदोषविशेषावेदकमितियाकलनीयं॥ अभोज्यान्नान्याहयाज्ञ
वल्क्यः॥ कदर्यबद्धचौराणांक्लीबरंगावतारिणां॥ वैणाभिशस्तवार्धुष्यगणिका
गणदीक्षिणां॥ चिकित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषां॥ क्रूरोग्रपतितव्रात्यदांभि
कोच्छिष्टभोजिनां॥ अवीरास्त्रीस्वर्णकारस्त्रीजितग्रामयाजिनां॥ शस्त्रविक्रयक
र्मारतंतुवायश्ववृत्तिनां॥ नृशंसराजरजककृतघ्नवधजीविनां॥ चैलधावसुरा
जीवसहोपपतिवेश्मनां॥ पिशुनानृतिनोश्चैवतथाचाक्रिकवंदिनां॥ एषामन्नं
नभोक्तव्यंसोमविक्रयिणस्तथेति॥ अस्यार्थः॥ कदर्यउक्तलक्षणः॥ बद्धोनिगडा
दिना॥ चौराब्राह्मणहेमव्यतिरिक्तपरद्रव्यापहारी॥ क्लीबोनपुंसकः॥ रंगावता
रीनटादिः॥ वेणोवेणच्छेदजीवी॥ अभिशस्तःपतनीयेनकर्मणाभियुक्तः॥ वार्धुषि

वि॰ पा॰ ष्यो निषिद्धवृत्त्युपजीवी॥ गणिका पण्यस्त्री॥ गणदीक्षी बहुयाजकः॥ चिकित्सको भिषा
८९ ग्वृत्त्युपजीवी॥ आतुरो महारोगाभिभूतः॥ पुंश्चली व्यभिचारिणी॥ मत्तो विद्यादिना ग स्त्री॰ २
र्वितः॥ विद्विट् शत्रुः॥ क्रूरोऽभ्यंतराधिककोपः॥ उग्रो वाग्मादिनोद्वेजकः॥ पतितो ब्रह्महादिः
व्रात्यः पतितसावित्रीकः॥ दांभिको वंचकः॥ अवीरा स्त्री पतिपुत्ररहिता॥ स्वतंत्रेप
न्ये॥ ग्रामयाजी ग्रामशांत्यादिकर्त्ता॥ कर्मारो लोहकारः॥ तंतुवायः स्रौचीशिल्प्यो
पजीवी सूचीवृत्ती॥ श्वभिर्वृत्तं जीवनमस्यास्तीति॥ नीचसेवकः श्वा॥ नृशंसो निर्द रामः ८९
यः॥ रजको वस्त्ररंगकृत्॥ चैलधावः वस्त्रनिर्णेजकः॥ सहोपपति वेश्मनी॥ सहस
हितं उपपतिना जारेण वेश्म यस्याः सोऽस्त तथा पिशुनः परदोषवक्ता॥ चाक्रिकस्तै
लिकः॥ वंदीजन स्तावकः॥ सोमविक्रयी॥ यस्तु सोमलतां विक्रेता॥ कल्पत्यादिदोष
दुष्टानामेषां द्विजानामन्नं न भोक्तव्यमिति समुदायार्थः॥ तथा॥ अग्निहीने द्विजाते
श्च नान्नमद्यादनापदीति॥ अग्निहीनः सत्यप्यधिकारे श्रौतस्मार्त्ताग्निरहितः॥

शूद्रस्यान्नमभोक्तव्यमिति शूद्राभोज्यान्नत्वे प्राप्ते प्रतिप्रसवमाह॥ शूद्रेषु दासगोपाल
कुलमित्रार्द्धसीरिणः॥ भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत्॥ दीक्षागमं पि
सादयः॥ अर्द्धसरी॥ सीरोपलक्षितकृषिफलार्द्धग्राही॥ शेषं प्रसिद्धं॥ संग्रहे॥ गंत
नेचारमालं च कोद्रवान्नं मसूरिकां॥ कांस्यपात्रं च तैलं च मंत्रवीर्यहराणि षट्॥
गणान्नं गणिकान्नं च तथान्नं ग्रामयाजकान्॥ सूतकान्नं तथा भुक्त्वा द्विजश्चांद्रा
यणं चरेत्॥ शूद्रस्य द्वाचदस्ताचलदन्नं तन्निमंत्रणं॥ प्रेषितान्नं च पक्वान्नं श्रा
न्नं षड्विधं स्मृतं॥ भुंजानेषु तु विप्रेषु प्रमादात् स्रवते गुदः॥ उच्छिष्टमशुचित्वं च तत्
स्य शौचं कथं भवेत्॥ पूर्वं कृत्वा तु शौचं पश्चात् स्नानं समाचरेत्॥ अहोरात्रो
षितस्नात्वा पंचगव्येन शुद्ध्यति॥ वरुणस्य पराशरः॥ ब्राह्मणान्नं ददत् शूद्रः शूद्रा
न्नं ब्राह्मणो ददत्॥ द्वावप्येतावभोज्यान्नौ चरेतां तौ तु चांद्रायणं॥ विप्रेणामंत्रितो वि
प्रः॥ श्राद्धकृत्तस्तु योऽश्नुते॥ आमं तत्पितृभोक्ता रोऽशुध्येतामेदं वेन तु॥ वार्त्ताकं

वि० पा० जनं ज[illegible]ग्ध्वास्त्वहोरात्रोषणाच्छुचिः॥ गतोः कागणायोरन्नं यदन्नं च रूप्यान्जके॥ स्त० ३
८८ स्त्रीमेतोन्नयनेभुक्त्वा द्विजश्चान्द्रायणं चरेत्॥ भुक्त्वेशयां सनस्थो यः पिबेद्वापि द्विजोत्त
मः॥ अभक्ष्येणाञ्जितं तुल्यं चरेच्चान्द्रायणव्रतं॥ आसनारूढपादः सन्व स्त्र स्याद्दुप
टेक्षुतं॥ मुखेन धमितं भुक्त्वा द्विजश्चान्द्रायणं चरेत्॥ उद्धृत्य वामहस्तेन यत्किंचित्पि
बते नरः॥ सुरापानेन तत्तुल्यं पीत्वा चान्द्रायणं चरेत्॥ चान्द्रायणं नवश्राद्धे पाराको
मासिके तथा॥ आब्दिके पादकृच्छ्रः स्यादेकाहमपराब्दिके॥ स्नानमन्त्यं तु कुर्वीत प्रा
णायामं जपं तथा॥ उच्छिष्टोच्छिष्टसंस्पृष्टो ब्राह्मणास्तु कदाचन॥ कुर्वीत तत्क्षणात्स्ना
नमाचामेन विशुध्यति॥ इदं तु क्षत्रियादिस्पृष्टे ब्राह्मणविषयं॥ ब्राह्मणस्यन्त्तु॥ राम। ८८
उच्छिष्टो ब्राह्मणः स्पृष्ट उच्छिष्टेनाग्रजन्मना॥ आचम्यैव तु शुद्धः स्यादिति मनुनानु
कीर्तितात्॥ भुक्त्वा ऽन्नाच्चम्य कुर्याद्वि विराम चेत्कृत विनिष्ठीति॥ नत्कोपवासी स्यात्
तु द्वितीये द्विगुणं चरेत्॥ आद्यमत्रं॥ तत्रैव॥ यज्ञोपवीतेन विनाभोजनं कुरुते द्विजः॥

नी
अघमत्र तुरीवे — वारेतः स्येचनमे — व वा॥ त्रिरात्रोपोषितो विप्रः पादकृच्छ्रेण भूमि
पः॥ अहोरात्रोषितो वैश्यः शुद्धिरेषा प्रकीर्तिता॥ विः स्युतूक्ष्ले सदीव्यत्क्ष्ले त्वा वा ऽनले
नापत्तां॥ वचनं पतितैः कृत्वा दाक्षिणो व्रतस्य तोस्पृज्ञादीति पुराणैस्समुच्चये॥ आज्य
पात्रे स्थिते तक्रं मधुमिश्रं तु यत्कृतं॥ ताम्रपात्रे स्थितं गव्यं त्रिबुसर्पिः सुरासमं॥ पा
रिजातेम्लगुः॥ गव्यं ताम्रेण संयुक्तं कांस्ये चैवेक्षुगोरसः॥ स्वं कांस्यं नारिकेलांबु मा
घ तुल्यं घृतं विना॥ आर्द्रकं सगुडं मेद्यं दधि सं मिश्रितो गुडः॥ नारिकेलांबु सं मिश्र
मैक्षवं बदरं तथा॥ मनुः॥ ताम्रे गव्यं भुजौ मध्यं समं च परिवेषणे॥ दोहे पाके तथा
होमे ताम्रे गव्यं न दुष्यति॥ गर्गः॥ म्लत्रुपक्षलेह्यादिदंलद्वेदं नमहस्त्यते॥ स्नास
शेषं न चाश्नीयात् सीत शेषं पिबेन्न च॥ अन्यथा कुरुते यस्तु जपेदे वीज्ञातं ततः॥
यस्तन्नपति पात्रस्थं यतिना प्रेरितं च यत्॥ दंपसोमुक्त्वे शेषं च भुक्त्वा चान्द्रायणं
चरेत्॥ अर्कद्विपर्वरात्रौ च चतुर्दश्यष्टमी दिवा॥ एकादश्यामहोरात्रं भुक्त्वा चां

वि० पा० द्रायणं चरेत्॥ अत्र सर्वत्र चान्द्रायणप्रायश्चित्तकथनमभ्यासविषयं॥ अनभ्या
८२० से तु अहोरात्रमभोजनं॥ राहुसर्वेषु अहोरात्रमभोजनमिति विज्ञानेश्वरोक्तेः॥ कृग्विधाने तु॥ स्त०
पर्वणोरर्कवारे च रात्रौ भुंक्ते द्विजो यदि॥ स सुमंत्रजपं कृत्वा दत्वा चारं विशुध्यति॥ अष्ट २
म्यां च चतुर्दश्यां यदि भुंक्ते द्विजो द्विजः॥ दत्वा चारं जपन्मंत्रममितस्वरूपमेव च॥ ए
कादश्यां सदा भुंक्ते स्वेच्छया व्याधिवर्जितः॥ त्वं सोमासीति वै सूक्तं जपेत्पापात्
मुच्यते॥ इदं प्रायश्चित्तमवैद्यविषयं॥ वैद्ये त्वेकादशीभोजने प्रायश्चित्तवि
शेषश्रवणादिति दिक्॥ यच्चाप्यत्र कूष्माण्डं तरुणीं चैव मूलकं॥ बृहतीं तथा बृह
स्पतिः॥ नाति तिथिविशेषे मूलकभक्षणनिषेध उक्तस्तथापि ब्राह्मणस्य सर्वदा मूलके रामः
निषेध उक्तो दक्षस्मृतौ अंतिमाध्याये॥ पितृणां देवतानां च मूलकं नैव दापयेत्॥ ८२०
ददन्नरकमाप्नोति भोक्ता च ब्राह्मणस्तथा॥ ब्राह्मणो मूलकं भक्षंश्चरेच्चांद्रायण
व्रतं॥ अन्यथा याति नरकं पाति सं चैव विंदति॥ वरं भुक्तममेध्यं च पिबेद्वा गर्हितं

कचित्॥ वर्जनीयं सदा विप्रैर्मूलकं मदिरासमं॥ पितृणां वक्ष्यमाणे ये च अन्ये ते वनमू
लकाः स्वयं जाताः पवित्राश्रमसंस्थितिवनवासिनः॥ लोहितं वासितं वापि मूलकं म
दिरासमं॥ देवानां वक्ष्यमाणे ये स्युरन्ये ते वनमूलकाः॥ मूलकं तु नरो भुंक्ते दुष्टाकारं
दिने दिने॥ न तस्य नरकोत्तारो यावदाभूतसंप्लवमिति॥ उशना॥ सूतके मरणे वाते
च स्नानमात्रेण शुध्यतीति॥ चंद्रिकायां जीवत्पितृकादेर्विशेष उक्तः॥ कनीयान्स्वपिता
चैव मुक्त्वा श्राद्धिकभोजनं॥ प्राणाग्निहोत्रवदन्यत्र न समो न समाचरेदिति॥ भोजनं तु
न निःशेषं कुर्यात्प्राज्ञः कथंचन॥ अन्यत्र दध्नः क्षीराद्वा घृतात्सक्तुभ्य एव वा॥ भु
क्त्वा पीत्वा तु यः कश्चिच्छून्यं पात्रं विमुंचति॥ क्षुधार्तः स पिपासार्तो भवेज्जन्मनि ज
न्मनि॥ देवलः॥ भुक्त्वोच्छिष्टं समादाय सर्वस्मान्नाद्विकिंचिदेव तु॥ उच्छिष्टभागधेयेभ्यः
सोदकं निर्वपेद्भुवि॥ मंत्रस्तु॥ यत्र कच्चन संस्थानां क्षुत्तृष्णोपहतात्मनां॥ दुर्गती
नां मया दत्तमक्षय्यमुपतिष्ठतु॥ रौरवपुण्यनिलये पद्मार्बुदनिवासिनां॥ अर्थिनां

वि० पा० मुदकं दत्तमक्षय्यमुपतिष्ठतु॥ व्यासः॥ अर्द्धं पीत्वा तु उषमर्द्धं त्याज्यं महीतले॥ रसा स्त०
२० तलगतानां नागास्तेन प्रीणंति नित्यशः॥ यद्युत्तिष्ठेदनाचांतो भुक्तवानास्नानो द्विजः॥ सद्य ३
स्नानं प्रकुर्वीत नान्यथा प्रयतो भवेत्॥ उच्छिष्टोच्छिष्टसंस्पृष्टः शुना शूद्रेण वा द्विजः॥
उपोष्य रजनीमेकां पंचगव्येन शुध्यति॥ गंडूषकरणाद्वै हस्तप्रक्षालनेपि द्विजः॥
हलं देवपि त्र्यं च स्वात्मा चोवोपपातकैः॥ योवै गंडूषसमये तर्जन्या वक्त्रशोधनं॥
कुर्वीत यदि मूढात्मा रौरवं नरकं व्रजेत्॥ आचम्योच ततः कुर्याद्दंतकाष्ठस्य भ
क्षणं॥ भोजने दंतलग्नानि निर्हृत्याचमनं चरेत्॥ अर्धपंच तथास्ये सत्रीणि त्रि रामः
णि तथैव च॥ आचमेच्चुलुकान् प्राज्ञो मुखशुद्धिं यदीच्छतीति॥ गोतमः॥ आचां २०
तोप्यशुचिस्तावद्यावत्त्रनचोद्धरेत्॥ उद्धृतेप्यशुचिस्तावद्यावन्नं न प्रमार्जिति
ति॥ ब्रह्मपुराणे॥ भोजनांते द्विराचम्य तल्लेनेत्रमार्जनं॥ कार्यं चेच्छुर्विवृद्ध्यर्थं
भार्गवादीश्च संस्मरेत्॥ तदुक्तं भारते आरण्यकेपर्वणि॥ शर्यातिं च सुकन्यां च

भार्गवं चाश्विनौ स्मरः॥ भोजनांते स्मरेद्यस्तु तस्य चक्षुर्न नश्यति॥ आहारपरिणा
मार्थमन्यान् स्मरेत्॥ अगस्त्यं कुंभकर्णं च शनिं च वडवानलं॥ अन्नस्य परिणामा
र्थं स्मरेद्भीमं च पंचममिति माघे उक्त्यः॥ भक्षोप्यथ कर्तव्यं तांबूलस्य च भक्षणं॥
श्रवणां चातिहासस्य तथा रामायणस्य चेति॥ तांबूलभक्षणे विशेषमाह गर्गः॥ प्रा
तः काले फलाधिक्यं चूर्णाधिक्यं तु मध्यतः॥ निशि पर्णाधिकं खादेत्तस्य लक्ष्मीर्विव
र्द्धते॥ फलं पर्णं फलं॥ पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसंभवः॥ चूर्णपर्णं हरे
दायुः शिरा बुद्धिं विनाशयेत्॥ तस्मादेतान्परित्यज्य तांबूलं भक्षयेत्सदा॥ अप्रनि
धाय मुखे पर्णं पूगं खादति यो नरः॥ सप्तजन्मदरिद्री स्यादंते नैव स्मरेद्धरिं॥ प
चेस्य स्नाष्टपत्राणि दश द्वादश वापि वा॥ दद्यात्स्वयं च गृह्णीयान्न्यूनं स्तोकाटक
स्य तु॥ तर्जन्या चूर्णमादाय तांबूलं तु न भक्षयेत्॥ यदि वा भक्षयेन्मूढो न
रकं प्रतिपद्यते॥ मध्यमांगुलिनादाय चूर्णं पर्णे विलेपयेत्॥ अंगुष्ठाग्रेण

वि०पा० वा तद्ददन्यथा दोषमाप्नुयात्॥ मृताशौचे तथा श्राद्धे मापित्रोर्मृतेऽहनि॥ उप
९१ वासे च तांबूलं दिवारात्रौ विवर्जयेत्॥ यतिश्च ब्रह्मचारी च विधवा च रजस्व स्तं० ३
ला॥ तांबूलं च वर्ज्यं तेषां तुल्यं गोमांसभक्षणैरिति॥ आयुर्वेदे॥ भुक्त्वा वह्निमुपस्प
र्श्य शनैः स्पर्शयन्दी व्रजेत्॥ शय्यां तवा मभागेन यतो रोगैर्न पीड्यते॥ भुक्त्वोपविश
तः स्थौल्यं बलमुत्तानशायिनः॥ आरोग्यं वामकुक्षौ तु मृत्युर्धावति धावतश्चेति॥ द
याक्लिके भोजनविधौ समाप्तमल्लं॥ ॥ अथ भोजनानंतरकृत्य होमादश्नः॥
इतिहासपुराणाद्यैः षष्ठसप्तमकौ नयेत्॥ अष्टमे लोकयात्रां तु बहिः संध्या
ततः पुनः॥ याज्ञवल्क्योपि॥ अहः शेषं समासीत शिष्टैश्च बंधुभिरितीति॥ इत्यन् रामः
ताक्लिके विधौ षष्ठसप्तमभागकृत्यं॥ ॥ अथ सायंसंध्या निरूप्यते॥ भविष्योत्तरे। ९१
शौचे कृत्वा यथान्यायमर्धास्तमिते भास्करे बहिः संध्यामुपासीत आसीनस्तु च
पश्चिमे॥ शातातपः॥ अनृतं मद्यगंधं च दिवा मैथुनमेव च॥ पुनाति वृषलस्यान्नं

परमात्मानं० स्वरस्वतीतं०। वेदमातरं तं० सांहृतीतं० वृद्धांतं०

बहिः संध्यामुपासिता॥ यमः॥ रवेरस्तमयात्पूर्वं घटिकैकाय वा भवेत्॥ सायंसंध्या
मुपास्याथ कुर्याद्धोमं च पूर्ववत्॥ अयमेव दीपदानसमयः॥ रवेरस्तं समारभ्य
यावत्सूर्योदयो भवेत्॥ यस्य तिष्ठेद्गृहे दीपस्तस्य नास्ति दरिद्रता॥ आयुर्वेदे॥ प्राङ्मुखो
दीपो धनदः स्यादुदङ्मुखः॥ प्रत्यङ्मुखो दुःखदो सो हानिदो दक्षिणामुख इति सं
ग्रहे॥ संध्याध्यावंदनादि पूर्वमिवोक्तं॥ अथ सायंसंध्यातर्पणमुच्यते॥ सरस्व
त्या वसिष्ठऋषिर्विष्णुर्देवता जगती छंदः सायंसंध्यातर्पणे विनियोगः॥ ॐ स्वः
पुरुषं तर्पयामि॥ सामवेदः॥ मंडलं तं० विष्णुरूपिणीं तं० वैष्णवीं तं० उपसं
तं०॥ निर्मलीतं० सर्वार्थसिद्धिकरीतं० स्वर्मग्राधिपतिं तर्पयामि० ॐ भूर्भुवः स्वः
पुरुषं तं० ततः सूर्योपस्थानादि कार्यं॥ अत्र विशेषमाह व्यासः॥ जपेद्वारुण
मंत्रस्तु इमं मे वरुणादिकान्॥ चतुर्मंत्रान्विशेषतः संध्याफलमवाप्नुयात्॥
गोतमः॥ दर्भहीना तु या संध्या संध्याहीनश्च यो जपः॥ जलहीनं तु यद्दानं तत्स

वि० पा० वं निष्फलं भवेत्॥ जपमध्ये गुरुर्याति वा ब्राह्मणोत्तमः॥ तस्यदज्ञांसमादाय च जपशे
९२ षं समापयेत्॥ यथाकाले संध्याकरतो वारिजाते विशेषमाह गौतमः॥ संध्याका स्त०
ले त्वतिक्रांते स्नात्वाचम्य यथाविधि॥ जपेदष्टशतं देवीं तत्संध्यासमाचरेत् ३
यमस्तु॥ प्राणायामत्रयं प्रातःसंगवे द्विगुणं चरेत्॥ मध्याह्ने त्रिगुणं प्रोक्तमपरा
ह्णे चतुर्गुणं॥ सायाह्ने पंचगुणं कं संध्यातिक्रमे भवेत्॥ वसिष्ठस्तु॥ कालाति
क्रमणे चैव त्रिसंध्यमपि सर्वदा॥ चतुर्थ्यार्घ्यं प्रकुर्वीत भानोर्व्याहृतिसंपु
टं॥ सर्वथातिक्रमे जमदग्निः॥ राकांद्वा चाप्यतिक्रम्य संध्यावंदनकर्म च॥ अ
होरात्रोषितो भूत्वा गायत्र्या वायुतं जपेत्॥ द्विरात्रे द्विगुणं प्रोक्तं त्रिरात्रे त्रिगु रामः
णं स्मृतं॥ त्रिरात्रात्परश्चेत्तु स्याच्छूद्रो वन संशयः॥ यः संध्याकालतः प्राप्तामा २२
लस्यादतिवर्त्तते॥ स सूर्यहत्यामवाप्नोति मंदेहेषु स जायते॥ मंदेहा राक्षसा॥
राष्ट्रक्षोभ भवेन्नृपक्षोभ रोगार्त्तौ भय आगते॥ देवाग्निद्विजवेदानां कार्ये महति
संस्थिते॥

संध्याहानो न दोषोस्ति यतः स्वसुरायसाधनमित्यादि॥ तथा॥ दिवोदितानि कर्माणि प्रानु
वं सुत्तरात्रि च॥ दिवोदितानि कृत्यं च विदध्यादुत्तरात्रि तु॥ अन्योपि विशेषः॥ प्रातःसं
ध्याप्रकरणे द्रष्टव्य इति दिक्॥ अग्निविधाने तु यदादीर्घ्यति मंत्रेण॥ सप्तवारं जपेच्च
दि॥ अकाले कुर्वतः कर्म काले कालेहूतानि तु॥ भवंतीति शेषः॥ श्राद्धभोजिनां तु
॥ गर्गः॥ दशाहं त्वा पिबेदापो गायत्र्या श्राद्धभुग्द्विजः॥ ततः संध्यामुपासीत शुद्ध्य
ते तदनंतरं ततः संध्यादि कुर्यादिति कश्चित्पीठः॥ अंतरेतु॥ जलाभावे महामार्गे
बंधने त्वशुचावपि॥ उभयोः संध्ययोः काले रजसा चार्घ्यं मुंडिसपेत्॥ तेन त्रयेव महारा
जं दर्शितारलमूर्द्धनि॥ संध्यागतं स्वरूपस्वस्रुमादित्यमुपस्थिर इति॥ अथ सायंहो
विधानं॥ तस्य कालादिकं पूर्वमेवोक्तं॥ उपस्थाने विशेष उच्यते॥ जपेदाग्नेयमं
त्रांस्तु सायंहोमादनंतरं॥ स्वयं होमः प्रकर्त्तव्यः पत्न्या पुत्रादिकैरपि॥ स्वयं
होमस्य नियमो यजनीयेह्निकीर्तितः॥ इदं पपि यजमानसंनिधाने॥ देशांतरग

वि॰पा॰ तस्यनेतित्तेत्तियं॥ स्यदासमस्य होमं तु कुर्यात्सायंविचक्षणः॥ द्रष्टव्यं कर्त्तुमशक्तोे
९३ हुताहस्यविवर्जनादित्यादि॥ गालवः॥ भस्माभिधारणं कार्यं हि हस्तामलं चा द्विजैः॥ स्म॰ ३
ललाटे हृदये बाह्वोर्यद्भस्म वा गिलेपनं॥ अत्रावसरे रात्रिभोजनं कार्यं न द्विधिस्तु
दर्वमेवोक्तः॥ श्राद्धादिदिने निषिद्धं द्वितीयभोजनं॥ श्राद्धाहे पर्वकाले च रविवारे त
थैव च॥ रात्रिभुक्ते न कर्त्तव्या सर्वदा द्विजसत्तमैरिति स्मृतेः॥ इत्यनंतान्हिके अष्टम
भागकृत्यं॥ ॥अथ शयनविधानं॥ तत्र याज्ञवल्क्यः॥ उपास्य पश्चिमां संध्यां हुत्वा
ग्नींस्तानुपास्य च॥ भृत्यैः परिवृतो भुक्त्वा नातितृप्त्याथ संविशेत्॥ संविशेत् स्वपे
त्॥ चकारेण वैश्वदेवादिकं समुच्चिनोति॥ अत्र पाकांतरमुक्तं विष्णुपुराणे पुनः रामः
पाकमुत्पाद्य सायमप्यवनीपते॥ वैश्वदेवनिमित्तं वै पत्न्या सार्धं बलिं हरेत्॥ प ९३
त्न्या च स्त्रीभिर्मंत्रवर्जं कार्यमेष धर्मः परस्त्रियां इति स्मृते राज्ञा कारितापोढ दुष्या
भवितव्यं॥ यदि भर्तुराज्ञां न संपादयति तदाधिवेत्तव्या॥ तदुक्तं याज्ञवल्क्येन॥ सु

रापी व्याधिता धूर्त्ता वंध्यार्थघ्न्यप्रियंवदा॥ स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथे
ति॥ अत्र बाधिमनुः॥ वंध्याष्टमेऽधिवेद्याब्दे नवमे तु मृतप्रजा॥ एकादशे स्त्रीजननी सद्य
स्त्वप्रियवादिनीति॥ व्यासः॥ शुचौ देशे विविक्ते तु गोमयेनोपलेपिते॥ प्रागुदक्प्र
वणे चैव संविशेत्तु सदा बुधः॥ संग्रहे॥ जलं देवगृहे चैव शयनं द्विजालये॥ नितीक्ष्णा
छप्रविशेन्नतिलोकिपादः प्रविशेन्नातिलौकिकं कं पंचन॥ भविष्ये॥ उपानहौ वेणुदंड
मंबुपात्रं तथैव च॥ तांबूलादीनि सर्वाणि समीपस्थापयेच्छुची॥ यानि कानि च पुष्पा
णि यत्किंचिदनुलेपनं॥ अलक्ष्मीपरिहारार्थं नित्यं कुरु युधिष्ठिर॥ मांगल्यं पूर्णकुंभं तु
शिरःस्थाने निधापयेत्॥ वैदिकैर्गारुडैर्मंत्रै रक्षां कृत्वा स्वपेत्ततः॥ गारुडमंत्राहारी
तेन प्रदर्शिताः॥ नर्मदायै नमः॥ प्रातर्नर्मदायै नमो निशि॥ नमोस्तु नर्मदे तु
भ्यं त्राहि मां विषसर्पतः॥ सर्पापसर्प भद्रं ते दूरं गच्छ महाविष॥ जनमेजययज्ञांते आ
स्तीकवचनं स्मर॥ आस्तीकवचनं स्मृत्वा यः सर्पो न निवर्त्तते॥ शतधा भिद्यते मूर्द्धा

वि॰ पा॰ — शा वदन्नं फलं वदेदिति॥ मार्कंडेयः॥ अन्यालये श्मशाने च राकर्क्षे च चतुष्पथे॥ महा
९४ देवगृहे चापि मत्तवेश्मनि न स्वपेत्॥ पराशरः॥ प्राच्यां दिशि शिरः शस्तं याम्यायामथ स्तं॰
वा नृप॥ सदैव स्वपतः पुंसो विपरीतं तु रोगदं॥ संग्रहे तु॥ स्वगृहे प्राक्शिरः कुर्याच्छ्वा ३
शुरे दक्षिणामुखः॥ प्रत्यङ्मुखः प्रवासे च न कदाचिदुदङ्मुखः॥ माता वा भगिनी चा
पि तथा चान्यस्त्रियो पि वा॥ ताताः संसनियोच्चैव न स्वपेत्तु कदाचन॥ इंद्रियाणि प्र
माथीनि हरंति प्रसभं मन॥ स्मृत्यंतरे॥ निद्रासमयमासाद्य तांबूलं वदनात्त्यजेत्॥
शिरसः पुष्पमालां च भार्यां चिह्नं शयनात्त्यजेत्॥ प्रज्ञां हरति तांबूलमायुर्हरति पुंड्र
कं॥ स्वप्नान्द्यं च पुष्पेभ्यः प्रमदा बलनाशिनीति॥ रतिरहस्ये॥ पर्यंके सुविशाले च राम।
समग्रे पुष्पमंडिते॥ आस्तृते शयने कुर्यान्निरवद्यां कदाचनं॥ दीपे जाज्वल्य ९४
माने तु स्त्रियाः संगं समाचरेत्॥ दीपं न हंतु मः संगं करोति मनुजो यदि॥ स सप्तज
न्मदरिद्रत्वं लभते नात्र संशयः॥ दीर्घशय्यासनच्छाया कार्पासादंतधावनं॥ अ

जारजः संस्पर्शी॥ शक्रस्यापि श्रियं हरेत्॥ संग्रहेपि॥ अजारजः खररजस्तथा संमा
र्जनीरजः॥ दीपमंचकयोश्छाया शक्रस्यापि श्रियं हरेत्॥ अन्यस्य पर्यंके न स्वपेत्॥
आसनं शय्यासनं वस्त्रं जायापापसंक्रमं उलुः॥ आमनः॥ शुचिरेतानि परेषामशुचिर्भवे
तु॥ पादौ प्रक्षालयेत् पूर्वं पश्चात्स्वापं समाचरेत्॥ अनार्द्रहस्तचरणो दीर्घमायुर
वाप्नुयात्॥ मात्स्ये त्वविशेषेणोक्तं॥ रात्रिसूक्तं जपेत्स्मृत्वा देवांश्च सुखशायिनः॥ नम
स्कृत्वाव्ययं विष्णुं समाधिस्थः स्वपेन्निशि॥ रात्रिसूक्तं शालपथब्राह्मणेऽभिहितं॥ चि
त्रावसो स्वस्ति ते पारमशीयेति त्रिरेतज्जपति रात्रिर्वै चित्रावसुरित्यादि॥ ऋग्वे
दे परिशिष्टे ख्यातं॥ इत्यादि॥ सुखशायिनस्तु॥ अगस्तिर्माधवश्चैव मुचुकुंदो म
हामुनिः॥ कपिलो मुनिरास्तीकः पंचैते सुखशायिनः इति गोभिलोक्तः॥ दक्षः॥ प्रदो
षपश्चिमौ यामौ वेदाभ्यासेन तौ नयेत्॥ यामद्वयं शयानस्तु ब्रह्मभूयाय कल्प
ते इति॥ अत्र प्रदोषशब्दो रात्रेः प्रथमयामवाचकः स्मृत्यादौ तु षष्ठोक्तेः॥ अथ स्वप्नमिग

वि॰ प्रा॰ गमनविधिः॥ तत्रायमास्तस्मात्स्त्रियः सेव्या इति याज्ञवल्क्यस्मरणात्पुत्रोत्पत्त्यर्थं स्त्रि
२५ यः सेव्याः॥ तद्विशेषमाह स एवाषोडशर्तुनिशाः स्त्रीणां ता— युग्मासु संविशेत्॥ ब्रह्मचा स्त॰
र्येव पर्वाण्याद्याश्चतस्रस्तु वर्जयेत्॥ रजोदर्शनदिनमारभ्य षोडशरात्रयो ऋतुर्ग ३
र्भाधानयोग्यः कालः॥ तत्र स्त्रियं गच्छन् ब्रह्मचार्य[illegible]व तत्राप्याद्याश्चतस्रो रात्रीः
पर्वाणि च वर्जयित्वेत्यस्यार्थः॥ पर्वकालमाह गर्गः॥ चतुर्दश्यष्टमी चैव अमावा
स्या च पूर्णिमा॥ चत्वार्येतानि पर्वाणि मनुः स्वायंभुवोऽब्रवीत्॥ मनुस्तु॥ तासामा
द्याश्चतस्रस्तु निंदितैकादशी तथा॥ त्रयोदशी च शेषाः स्युः प्रशस्ता दश रात्रय इति॥
याज्ञवल्क्यः॥ एवं गच्छन् स्त्रियं क्षामां मघां मूलं च वर्जयेत्॥ सुस्थ इंदौ सकृत्पुत्रं राम:
लक्षण्यं जनयेत्पुमान्॥ सकृदित्युक्तेरेकस्यां रात्रावेकवारमेव गमनमिति निय २५
म्यते॥ क्षामामिति विशेषणात्। पुमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रिया इति
वचनाच्छोणिताधिक्ये पुरुषाकारासंभवमतीति हेतोरल्पभोजनादिना स्त्रियः क्षा

मता संपाद्या इत्येतदर्थं। पुंसः शुक्राधिक्ये पुमान्॥ शुक्रशोणितयोः समत्वे नपुंसकं द्विधा
बीजे स्त्रीगर्भे युगलं इत्येतदर्थं चेति ज्ञेयं॥ अत्र तु संविशेदित्यस्य नियमविधित्वेऽपि ऋतुस्ना
तां तु यो भार्यां संनिधौ नोपगच्छति॥ घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः॥ तथा॥
ऋतुस्नातां तु यो भार्यां स्वस्थः सन्नोपगच्छति॥ घोरायामित्यादि पूर्ववत्॥ अत्र संनि
धौ स्वस्थ इत्यादि विशेषणात् समर्थः संनिहितः स्वस्थादि ऋतौ नोपगच्छति तदा— न
त्वसंनिधानादाविति ज्ञेयं॥ अजातपुत्रस्यैवायमनुगमननियम इति मदनपारिजात
हेतु॥ ऋतौ स्त्रीविषये यमोऽपि॥ ऋतुस्नातां तु या नारी भर्तारं नोपगच्छति॥ तां ग्रामम
ध्ये विख्याप्य भ्रूणघ्नीं— च विवासयेदिति॥ अन्यत्रापि स्त्रीकामनायां प्रतिषिद्धवर्जमु
पेयादेव॥ सर्वत्र वा प्रतिषिद्धवर्जमिति गौतमोक्तेः॥ यथाकामी भवेद्वापि स्त्रीणां
वरमनुस्मरन्निति याज्ञवल्क्योक्तेः॥ यथाकामी वा काममाविजनितोः संभवामे
ति वचनादिति कात्यायनोक्तेश्च॥ ऋतौ गच्छेदिति नियमस्यैव नियमांतरमिदमि

चि॰ पा॰ तिवाशब्दार्थः॥ अत्र ऋतुस्नातां स्त्रियं गच्छेन्नातुरां न रजस्वलां। नातिबालां न कुपि
२६ तां नाप्रशस्तां न गर्भिणीमिति मिश्रादिविशेषो द्रष्टव्यः॥ गर्भिण्याश्च॥ विशेषमाहाश्वला स्त्र॰
यनः॥ वपनं मैथुनं तीर्थं वर्जयेद्गर्भिणीपतिः॥ श्राद्धं च सप्तमान्मासादूर्ध्वं चान्यत्र वेद ३
विदिति॥ अत्रान्यो विशेषः॥ प्रथमस्तवके॥ गर्भाधानप्रकारो द्रष्टव्यः॥ अत्र गर्भाधान
प्रसंगदष्टाचत्वारिंशत्संस्कारा लिख्यंते॥ गर्भाधानमथो हि पुंसवनकं सीमंततात
क्रियानामान्नादनचौलकोपनयनं वेदव्रतान्यच्युत॥ चत्वारि स्नानिरिस्नपनं विवा
हकरणं पंचापि यज्ञा अथो संस्थाः सप्त च सप्तसप्तगदितान्हिंशादृशाप्यत्र तुरन्
तेवंचान शानेन वेदपठनं॥ कर्णजपस्त्वेमिति प्राणे॥ कीर्तिरपी दुदिक्रमतः सं रामा
व्यूहनं मस्तनः॥ अस्थां संचयनं ततः परमपि श्राद्धानि सापिंडकं चत्वारिंश २६
दितिस्मृतो निगदिताः संस्कारकाश्चष्टचेति ति मामको संग्रहश्लोके गोणकविं
शातिसंस्थास्तु॥ अष्टकापार्वणाश्राद्धं श्रावण्याग्रहायणी प्रोष्ठपदी चैत्र्याश्वयुः

जीति सप्त पाकयज्ञसंस्थाः॥ अग्न्याधेयाग्निहोत्रदर्शपूर्णमासाग्रयणचातुर्मास्य
निरूढपशुबंधसौत्रामणीतिसप्त हविर्यज्ञसंस्थाः॥ अग्निष्टोमात्यग्निष्टोम उक्थ्य षो
डशी वाजपेयातिरात्राप्तोर्यामितिसप्त सोमसंस्थाः॥ यमः अष्टाचत्वारिंशादेते सं
स्कारा विहिता द्विजाः॥ यएतैः संस्कृतो विप्रो ब्रह्मलोकं स गच्छतीति॥ मनुः॥ वैदिकैः
कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनां॥ कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह चेति॥
एतेषु कतिपयसंस्कारा मंत्रवर्जं शूद्रस्यापि यथायोग्यं भवंति॥ श्रौतं द्विजातयः
कुर्युः स्मार्त्तं शूद्रः समाचरेदिति पाद्मोक्तेः॥ प्रकृतमनुसरामः॥ द्वावेतावशुची स्या
तां दंपती शायनं गतौ॥ शयनादुत्थिता नारी शुचिः स्यादशुचिः पुमानिति आपस्तंबो
क्तास्वशुचित्वनिरासार्थमिकालिंगं करेस्य व्येति स्त्रोदहुस्तयौ हृद्यो॥ तच्च शौचं समा
ख्याते श्रुके तु द्विगुणं भवेदिति शातातपोक्तं शौचं कर्त्तव्यं॥ इदमनृतुकालविष
यं॥ दुःस्वप्नमैथुने चांते विरक्ते क्षुरकर्मणि॥ चितिपप्पन्न शानार स्वर्ग्यास्य शनि स्नान

वि० पा० माचरेदितिपराशरोक्तं स्नानकार्यमन्तु कालगमने॥ क्वचिदन्तावपि स्नानमाह स्म
९७ तिः॥ अष्टम्यां च चतुर्दश्यां दिवा पर्वणि मैथुनं॥ कृत्वा सचैलं स्नात्वा तु वारुणीभिश्च मार्ज स्त०
येदिति॥ शयनसमये दुष्टस्वप्नप्रदर्शने जपमाह गर्गः॥ रामं स्कंदं हनूमंतं वैनतेयं ३
वृकोदरं॥ शयने यः स्मरेन्नित्यं दुःस्वप्नं तस्य नश्यति॥ इत्यनेन तांत्रिके शयनविधानं॥
॥अथ यमनियमादिकमुच्यते॥ कूर्मे॥ निश्रीत्यपाकृत्य मनो मोक्षे निवेशयेत्॥
अनयाकृत्यतान्येव मोक्षमिच्छन्द्विजस्त्यजेदितिमन्त्रे मुक्तिप्राप्तये आत्मोपास
नां कुर्यात्॥ स्कांदे॥ यमैश्च नियमैश्चैव आसनैः प्राणसंयमैः॥ प्रत्याहारेण
ध्यानेन धारणाभिः समाधिना॥ अष्टांगेन प्रयोगेण उपास्यात्मा विमुच्यते॥ ज्ञाने राम:
नैव स्वहितानि नित्यकर्माणि कुर्वतः॥ निवृत्तफलसंगस्य मुक्तिस्तस्य करे स्थिता॥ ९७
अहिंसा सत्यमस्तेयं ब्रह्मचर्यं क्षमा धृतिः॥ दयार्जवं मिताहारः शौचं चेति यमा
दश॥ शौचमिज्या तपास्तयं स्वाध्यायोपस्थनिग्रहः॥ व्रतोपवासमौनं च स्नानं च नि

यमा दशेति॥ व्यासोक्ता यमादयः॥ जानूर्वोरंतरे सम्यक्कृत्वा पादतले उभे॥ ऋजुकायः
सुखासीनः स्वस्तिकं तत्प्रचक्षते इत्यासनं॥ प्राणायामः प्रागुक्तः॥ इंद्रियाणां वि
चरतां विषयेषु स्वभावतः॥ बलादाहरणं तेषां प्रत्याहारः स उच्यत इति प्रत्याहार उक्तः
ध्यानं तु॥ ध्यानमात्मस्वरूपस्य वेदनं मनसा भवेत्॥ तदेव द्विगुणं प्रोक्तं सगुणं नि
र्गुणं तथा॥ भ्रुवोरुपरि मनः कृत्वा हृन्मध्ये चिंतयेच्छिवं॥ पंचवक्त्रं दशभुजं त्रिने
त्रं स्मितसुंदरं॥ कर्पूरगौरं च प्रांशुं शेखरं सुविभूषितं॥ नीलग्रीवं नागहारं व्या
घ्रचर्मांबरं विभुं॥ कमंडल्वक्षसूत्रादि पाशांकुशधरं हरं॥ इत्यादि सगुणं॥ निर्गु
णं तु॥ अहमेव परं ब्रह्म परमात्मा ह्यव्ययः॥ एवं तद्वेदना तज्ज्ञा निर्गुणं ध्यानमुच्यत
इति॥ निर्गुणोपासना तु ज्ञानिन एव॥ कामक्रोधादियुक्तस्य विषयासक्तचेतसः॥
अहं ब्रह्मेति यज्ज्ञानमात्मनो नाशस्य कारणमिति ब्रह्मवैवर्तोक्तेः॥ धारणा तु॥ यमा
दिगुणयुक्तस्य मनसा स्थितिरात्मनि॥ धारणा प्रोच्यते स[illegible]द्भिर्योगिशास्त्रार्थवि

वि० पा० दिभिरिति। समाधिस्तु॥ समाधिः समतावस्थाजीवात्मपरमात्मनोः॥ परात्मनिस्थिर
९८ प्रोक्तः स समाधिः प्रत्यगात्मन इति रत्नं तान्त्रिके यमादिलक्षणोविधानं॥ ॥अथ रुद्रज स्तो०
पविधानं॥ सर्वेष्वेव लिंगेषु रुद्राध्यायजपः परः॥ रुद्राध्यायी विमुच्येत जन्मसंसार ३
सागरात्॥ लिंगार्चनं रुद्रजपस्तथा शिवतिथिव्रतं॥ वाराणस्यां च मरणं मुक्तिरेषा
चतुर्विधा॥ रुद्रजापी शिवः साक्षाद्रुद्र एव न संशयः॥ तस्मात्सर्वं परित्यज्य रुद्रजापी भ
वेत्सदा॥ ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा॥ रुद्रजापेन परमां गतिं गच्छं
ति नान्यतः॥ रोगाद्युपशमार्थाय परमाभ्युदयाय च॥ मनोरथफलप्राप्त्यै रुद्रजा
पी भवेन्नर इति स्कांदे॥ जाबालोपनिषद्यपि। यः शतरुद्रियमधीते सोऽग्निपूतो भव रामः
ति॥ ब्रह्महत्यायाः पूतो भवतीति॥ तत्रैव॥ किं जप्येनामृतत्वं नो ब्रूहीति शतरुद्रिय ९८
केणेति॥ शतरुद्रियं च रुद्राध्याय एव॥ चरमायामिष्टकायां शतरुद्रियं जुहोती
त्यादि ब्राह्मणवाक्ये तस्यैव विनियोगात्॥ शतपथब्राह्मणेऽपि॥ अथातः शतरु

द्रियं जुहोतीति चयने तस्यैव विनियोगाच्च॥ रुद्राध्यायस्तु साक्षाद्भगवद्वाचकः॥ अस्म
तस्यैव नामधेयान्येतानीति जाबालोपनिषदुक्तेः॥ यावज्जीवं प्रवरावमप्यावर्त्तयेद्रु
द्रियं वा याजुर्वैदमिति यावज्जीवं तज्जपविधानादवश्यं जप्ते पादि कार्यं॥ मदनमहो
देपि॥ का पौरकादशभिः रुद्रानुवाकैर्होमो विहितस्तथापि रुद्राध्यायी मुच्यते
सर्वपापैरिति॥ तथा॥ रुद्राणां जपहोमार्चनविधिं व्याख्यास्याम इति बोधायनादि
वाक्ये जपहोमार्चना॥ शिवगीतायां च॥ यस्तु रुद्रं जपेन्नित्यं ध्यायमानो ममाकृतिं॥
षडक्षरं वा प्रणवं निष्कामो विजितेन्द्रियः॥ स च तेनैव देहेन शिवः संजायते ध्रुवमिति॥
याज्ञवल्क्योपि॥ सुरापः स्वर्णहारी च रुद्रजापी जले स्थितः॥ सहस्रशीर्षाजापी च
मुच्यते सर्वकिल्बिषैरिति॥ अंगिराः॥ नैकं च मनकं चैव पुरुषसूक्तं तथैव च॥ नित्य
च यं प्रयुंजानो ब्रह्मलोके महीयते॥ रुद्राध्यायी वसेद्यत्र ग्रामे वा नगरेपि वा॥ न ते
च क्षुत्पिपासा सा बाधा दुर्भिक्षं व्याधयोपि च॥ ब्रह्माद्यास्तु सुराः सर्वे साध्याश्चैव निरो

वि० पा० फलः॥ स्वतंत्रोऽपि समायांति वीक्षितुं रुद्रजापिनं॥ वायुपुराणे॥ अनपत्यादि दोषेषु ग्रा रुद्र०

९९ किन्यादि ग्रहेषु च॥ सर्वज्वरविनाशाय रुद्रजाप्यो न संशयः॥ स्पृष्टास्पृष्टं जपेद्य- ३

स्तु रुद्रैकादशिनीं शुचिः। तथा संतानगोपालविद्यां चैव जपेन्नरः॥ अनपत्यस्य

नाशार्थं स्वस्वलाभार्थसिद्धये॥ सर्वं वरोऽभिकर्तव्यो रुद्रजापः प्रयत्नतः इति

॥ बृहत्सारांशे॥ रुद्राः पंचविधाः प्रोक्ता देशिकैरुत्तरोत्तरं॥ सांगस्त्वाद्यो रूपका-

ख्यः प्रथमो रुद्र उच्यते॥ एकादशगुणैस्तद्वद्रुद्री संज्ञो द्वितीयकः॥ एकादशा-

भिरेताभिस्तृतीयो लघुरुद्रकः॥ लघ्वेकादशभिः प्रोक्तो महारुद्रश्चतुर्थकः॥ पं-

चमः स्यान्महारुद्रैरेकादशभिरंतिमः॥ अतिरुद्रः समाख्यातैः सर्वेभ्यो ह्युत्तमो- रामः

त्तम इति॥ अंगोद्युक्तानि ज्ञाबालेनी। शिवसंकल्पकं हृदयं सूक्तं स्यात्पौरुषं शिरः॥ ९९

प्राकुनारीयरां चैव शिखां तस्योत्तराभिधां॥ आशुः शिशानः कवचं नेत्रं विभ्राड्बृ-

हत्स्मृतं॥ शातरुद्रियमस्त्रं स्यात् षडंगक्रमईरितः॥ पूर्वमंगानि संजप्य रुद्रा-

ध्यायं ततो जपेत्॥ तदंते सप्त मंत्राश्च वयं सोमं महाद्भिरः॥ उपश्रेतिपञ्चमंत्रजटामा-

हुर्जपेदिति॥ अत्र शतरुद्रियं नाम त्वमग्ने रुद्रो असुर इत्यादि विंशस्याम पतयोरयी-

णामित्यंतं मंत्रजातमिति महार्णवकारः॥ वाजसनेयिनां तु षोडशर्चः प्रथमानुवाकः

शतरुद्रियं शिवसत्यमित्याद्यनुवाकपाठसामानाधिकरण्यात्॥ शतरुद्रियस्य

धर्मस्य वेदत्वादिवन्नाप्यवन्तिचादिष्टसमम्चाराच्च॥ अत्र नेत्रनेत्रजपादि वाज-

सनेयिविषय॥ आपस्तंबादीनामनुक्तत्वात्॥ चमकपाठप्रकारमाह बोधायनः

नमस्ते रुद्र मन्यव इत्याद्यैकादशानुवाको नामं ते एकमेकं चमकानुवाकं पठेद्या-

वदेकादशावृत्तीति॥ अयं प्रकारस्तैत्तिरीयाणामेव॥ वाजसनेयिनां तु चमका-

ध्याये॥ नवानुवाक इति हेत्वायथ्यासंख्याभावात्॥ अतस्तैः एकादशवारं रुद्रा-

ध्यायं जपित्वा तेचमकाध्यायः पठनीय इति गम्यते॥ यद्वा शाखांतराधिकरण-

न्यायेन तेषामपि यथासंख्या संभवः संपादनीयः॥ तद्यथा॥ आद्यावसानुवाकाः॥

वि०प्रा० नवमेनुवाके अध्यनाम्यांहं जुहोतिवा जायस्वाहेत्युपक्रम्यप्रजानां चाधिपत्यायेति रु०
१०० ज्ञातप्रथममंत्रद्वयस्यैकहोमांगत्वमुक्तं॥ तथा अष्टकेष्यांजुहोत्यायुर्यज्ञेनेत्यस्यमंत्र ३
स्यद्वितीयहोमांगत्वमुक्तं तथा। अथाहरत्तोमश्चेयजुर्जुहोतीतिमंत्रस्य तृतीयहो
मांगत्वमुक्तं॥ तेनैवं ज्ञायतेअंत्यानुवाकेत्रयोविभागाइत्येवं यथासंप्रदायं रति॥ य
द्वा॥ अंत्यानुवाकद्विरावर्त्तनीयः॥ अत्रन्यासादिकमथातःपंचांगरुद्राणांन्यास
पूर्वकमित्याद्याथस्तिबाद्युक्तमनुसंधेयं॥ पंचांगरुद्रस्यांन्यासपूर्वकं ग्रंथगौरव
भीत्यानलिख्यते॥ एवमुक्तप्रकारेणयथामिलि षितंरुद्रजपं कृत्वाहोमःकार्यस्त्य
कोंशोताजपेन॥ एवं रुद्रजपं कृत्वा पश्चाद्धोमंसमाचरेत्॥ तिलैःस्वच्छित्तं च पत्रिक्षाद रा०म०
शांशोहोमद्रव्यते॥ तत्रमंत्रविभागो बहुधादृश्यते॥ तत्रतैत्तिरायेत्रेधाविभक्तेजु १००
होतित्रेयरमेत्रेकारइतित्रेधाविभागउक्तः॥ तथा॥ तिस्रउत्तराआहुतीर्जुहोतिप्र
ष्ट्संपद्यंतइतिषोढाविभागोपि॥ वाजसनेयकेपि॥ स्वैजानुद... षोढाप्रथमष्ट०

स्वाहाकरोत्यथनाभिदघ्नेऽथमुखदघ्नइति॥ अस्मिन्पक्षेमंत्रविभागप्रकारस्तु॥ नमस्ते
रुद्रमन्यवइत्यारभ्य सभाभ्यःसभापतिभ्यश्चवोनमइत्यंतएकोमंत्रः॥ स्वबाओशीयां
चस्वाहाकरोतिप्रथमेचानुवाकइतिश्रुतेः॥ तथा॥ नमोश्वेभ्यइत्यारभ्याचार्यायचेत्यं
तोद्वितीयोमंत्रः॥ तथा॥ नमःप्रतरणायचेत्यारभ्यजंभेदधाम्यहस्यंतस्तृतीयमंत्रः॥ अ
त्राविच्छिन्नानामनुवाकानांमंत्रत्वंज्ञेयं॥ गवीश्रातंदक्षिणेतिवत्॥ यद्वाप्रत्यनुवाक
त्रयमेकेकोमंत्रः॥ तथाषोढापक्षेपिचिक्त्याः प्रत्यवरोहतीसुक्तेत्रिरित उदारोहि
ततत्वइतस्योक्तोबंधुरितिज्ञातपथउक्तः॥ अत्रपक्षेपदवैकादशयोमंत्राः॥ नमोस्तुरु
द्रेभ्योयेदिवीत्यादिप्रत्यवरोहसंज्ञकास्त्रयोमंत्राइत्येवंषण्मवंति॥ तैत्तिरायाः
तांप्रकारस्तुमहार्णवादौज्ञेयः॥ तथा॥ षोडशधावक्षोपिबोधायनोक्तः॥ नम
स्तेरुद्रमन्यवइत्येतानुवाकास्त्रेधाविभज्यापिवाप्रथमादुपक्रम्यानुवाकत्रय
मेकोमंत्रः॥ चतुर्थमारभ्याषष्ठांतोद्वितीयः॥ सप्तममारभ्यावधिस्तृतीयः॥ ततोद

वि॰पा॰ शावतानां दश मंत्राः॥ प्रत्यवरोहणानि त्रीणीत्येवं षोडश भवंतीति॥ तथा सप्तदश
१०१ वायव्योपि तत्र प्रथमानुवाक एको मंत्रः॥ तदुत्तरमनुवाकद्वयं द्वितीयः॥ शेषं पूर्ववत् स्त॰
॥ अथाष्टाचत्वारिंशत्पक्षो बोधायनोक्तः॥ यथा॥ प्रथमानुवाके षोडश मंत्राः॥ द्वि ३
तीयतृतीयचतुर्थपंचमानुवाकाश्चत्वारो मंत्राः॥ ततः षष्ठानुवाके नमः स्रुत्याये
त्यारभ्य नमो वृक्षेभ्यो हरिकेशेभ्य इत्यंत एको मंत्रः॥ ततो नमस्ताराय चेत्येतावांते
को मंत्रः॥ ततो नमः शंभवाय चेत्यादि शिवतराय चेत्यंत एको मंत्रः॥ ततो नमः कि
रिकेभ्यो देवानां हृदयेभ्य इत्यादयो दिक्चत्वारो मंत्राः॥ अत्र देवानां हृदयेभ्य इ
त्यस्य विशेषणस्योत्तरेषु यजुःष्वप्यनुषंगः कर्तव्यः॥ ततो द्रापे अंधसस्पत इत्यारभ्य रामः
ये एतावंतश्च भूयांसः सप्तदश मंत्राः॥ ततः॥ प्रत्यवरोहणानि त्रीणि यजूंषीत्येव १०१
मष्टाचत्वारिंशन्मंत्रविभागो ज्ञेयः॥ अथ षट्पंचाशत्संख्याको विभागः प्रदर्श्यते॥ त
त्र प्रथमानुवाके षोडश॥ १६॥ ततो नमो हिरण्यबाहव इत्यारभ्य नमः श्वभ्यः श्वप

तिभ्यश्च वो नम इत्यंता उभयतो नमस्काराः पंचचत्वारिंशत्॥ ४५॥ ततो नमो भवाय च रुद्राय
चेत्यारभ्य आनिर्हतेभ्य इत्यंता अन्यतो नमस्कारा नवसप्ततिः॥ ७९॥ ततो द्राप इत्यादिः
पूर्ववद्विंशतिः॥ २०॥ इत्ययं प्रतिमंत्रविभागः॥ एवं षट्त्रिंशच्च द्वे त्रीणि च शतान्यथ त्रिंश
द्वयपंच त्रिष्टुभित्यादि शतपथश्रुतिप्रमाताः कोः सपादचतुःशतात्रीण्यधिकशतद्व
यादिविवक्षा अवगंतव्या॥ ते चास्माभिः शतरुद्रियाध्यायभाष्ये प्रपंचिताः॥ अथ गौरवादि
हनोक्ताः॥ एते त्रेधा विभागादिपक्षाः॥ शक्तिकलतारतम्येन योज्याः॥ महाराष्ट्रलाघवतः॥
तैत्तिरीयाणां प्रतिमंत्रविभागे एकोनसप्तत्युत्तरशतविभागः प्रसिद्ध एवेत्युपरम्यते॥
एभिः प्रकारैर्यदि होममेव चिकीर्षति तदा होम एव प्रधानभूतः कर्तव्यः॥ जपप्रयो
गत्वेन होमचिकीर्षा चेत्तदा दशांशशतांशादिभेदेन होमः कार्यः॥ तत्र त्रेधा विभा
गपक्षमाश्रित्य एकादशावृत्त्यात्मकजपरुद्रहोमेति स्वरूपं कृत्स्नं भवतीति॥ च
मकाध्यायेनां तेवसोर्धारा कार्या॥ संपूर्णहोमपक्षे तु प्रतिस्वपकं तिस्रस्तिस्र आ

तयरतिमिलितास्त्रयस्त्रिंशत्॥ प्रतिरूपकं चमकानुवाकानामेकादशाहुति॥ अयं
चमकहोमो मद्रव्येषेव॥ वसोर्द्धारात्वाज्येनैवं ते सर्वत्र चमकाध्यायेन कार्यो॥ वसो
र्द्धारायाज्येनो दुंबर्या — चेत्यादिस्मृतेः॥ एवं षोढा विभागादि पक्षेष्वाहुतिसंख्या ज्ञेया॥
ग्रंथगौरवभयान्नोच्यते॥ शतांशपक्षस्तु लघुरुद्रादावेव तत्रैव संभवात्॥ तथा
घु हि लघुरुद्रे एकविंशत्युत्तरं शतं रूपकाणि भवंति। तेन शतांशहोमपक्षः संभवति तत्र श
तरूपाणामेकरूपं होमः॥ तत्रापि त्रेधादिपक्षाः संयोज्याः। अवशिष्टैकविंशतिरूपा
णामर्थेन मस्ते रुद्रत्येनेन मंत्रेणैकाहुति॥ एवं महारुद्रादौ योज्यं॥ अन्ये तु यथामिलवि
तरुद्रजपनंतरं नमः शंभवाय चेति मूलमंत्रेणैव होममिच्छंति। तदाह बौधायनः॥ मूल
मंत्रेण वा होमं कुर्यादिति॥ तत्प्रकारस्तु हेमाद्रौ मूलागमोभिहितः॥ ततो होमं प्र
कुर्वीत नमः शंभ्वेति मंत्रतः॥ रुद्रैकादशिनीजाप्ये त्रयस्त्रिंशत्तथाहुति॥ रुद्रे शत
मेत्रयं॥ प्रोक्तं षष्ट्याप्यधिकयाधिकं॥ रुद्रे लघुरुद्रे रस्यार्थः॥ चत्वारश्च महारुद्रे स

हस्राः स्वसचर्जिताः॥ चत्वारिंशत्सहस्राश्च कक्ष्यास्तु रुत्तराः॥ ऊनाश्च सप्तसप्तत्याद्य
तिरुद्र इति॥ स्थितिरिति मूलमंत्रन्यासादिकं प्रथमस्तबके रुद्रस्नानविधाने द्रष्टव्यं॥
अथापरश्चतुःषष्टिविभागः॥ स च हेमाद्रौ शांतिकांडे रुद्रस्नाने मेऽभिहितः॥ अविरुद्ध
त्वाद्धोमेपि भवति॥ तथाहि॥ सुखासनोपविष्टं तमाचार्यो रुद्रजापकाः॥ अभिषिंचेत्ततः
श्वेतामर्कपत्रपुटाम्बुना॥ अद्भिः प्रारायप्यनेनानि स्नानार्थं तान्युपाहरेत्॥ चतुःषष्टि
केनैव रुद्रैकादशेन तु॥ शतानि सप्तवर्णानां चतुर्भिरधिकानि तु॥ वेदानामंत्रणा
मित्यर्थः॥ तेषां चतुःषष्टिसंख्यानामेकादशाहुत्वः पठितानामियं संख्या॥ निष्पद्यते॥
यद्यपि कैश्चिद्योरुद्राध्यायस्य यजुष्ठ्वादृक्कं नास्ति तथापि कारावशाखायां चतुःषष्टि
कंडिकापाठोपलब्धेस्तदभिप्रायमृग्ववचनमिति द्रष्टव्यं॥ तत्प्रकारस्त्वनुवाकाध्या
येसमाम्नातः॥ यथा॥ नमस्तेस्त्रोऽउज्ञान नमो हिरण्यबाहवे॥ उष्णीषिणे॥ तक्षभ्यः॥
ज्येष्ठाय॥ सुस्याय॥ पार्याचेति पंचपंचा॥ ३०॥ प्रागेवंत्र्यसो एकादश १८ अष्टादशानुवाके

वि० पा० शुचतुःषष्टिरिति॥ अथ संपूर्णरुद्राध्यायेनैकाहुतिपक्षोप्यभिहितः परशुरामपद्धतौ॥ रु०
१०३ रुद्रयामले॥ प्रस्तुतिं हविषां दूर्यरुद्राध्यायमधीत्य च॥ जुहुयादाहुतिं चैकां सर्वकामसं २
मृद्धये॥ इति॥ एवं चात्र तिलादिकैरेकाहुत्या प्रस्तुतिपूरणव्यपदेशात्॥ एतेषु सर्वेषु मंत्र
विभागपक्षेषु शक्तितारतम्येन योजितेष्वपि षष्ट्युत्तरशतविभागपक्ष एवातिश्रेष्ठ इति ग
म्यते॥ श्रुत्युक्तत्वात्॥ तथाहि॥ प्रथमानुवाके षोडश मंत्राणां होमांगत्वं प्रथमे चानु
वाक इति श्रुत्युक्तेः॥ ततो नमो हिरण्यबाहव इत्यारभ्य नम आनिर्हतेभ्य इत्यंतेषु प्रति
कंडिकं चत्वारश्चत्वारो मंत्रा नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नम इत्येवं
रूपा उभयतो नमस्काराः पंचचत्वारिंशत्॥ ततो नमो भवाय चेत्याद्यन्यतरतो रामः
नमस्कारा नव सप्ततिः॥ अथ द्वंद्विन्यो जुहोति नमो मुष्कोचामुष्मैचेत्युपक्रम्य नमो १०३
हिरण्यबाहवे सेनान्ये दिशां च पतये नम इति श्रुत्यैवं मंत्रविभागस्य दर्शितत्वात्
न तु वाचकाभिप्रायेण॥ तेषां बहुत्वदर्शनात्॥ तथा च हिरण्यबाहवे सेनान्य इत्ये

कं नाम। दिशां च पतय इति द्वितीयं॥ एवमुत्तरत्र द्रष्टव्यं॥ तथा नमो वृक्षेभ्यो हरिकेशे
भ्य इत्येकं नाम॥ नमस्ताराय इति द्वितीयं॥ ततोन्यानुवाके विंशतिमंत्राः॥ अथोत्तराणि
जपति द्रापे अंधसस्पत इत्युपक्रम्य सदोनियजुःषु भवतीत्युक्त्वा दशैतानि वृत्तानां जुहो
तीत्युक्त्वा त्रीणि यजूंषि भवंतीति श्रुत्यैवं मंत्रविभागकथनादियलं प्रपंचेन॥ अथ
रुद्राध्यायस्य प्रतिमंत्रप्रयोगः कथ्यते॥ स च महार्णवे॥ नमकाश्रितमंत्राणां प्रयो
गः कल्पगोचरः। नमस्ते रुद्र इत्यस्याः पुरश्चरणसिद्धये॥ प्राजापत्यं चरित्वैकं जपेन्मं
त्रमनुत्तमः॥ एकादशसहस्राणि शुद्धकल्पे निरंतरं॥ प्रदक्षिणो नमस्कारौ कु
दीशस्य मंत्रतः॥ मंत्रेनानेन नैव मंत्रेण॥ प्रदक्षिणानमस्कारौ यथाशक्तिकी
र्त्यौ॥ हविष्यमन्नं भुंजीत ब्रह्मचारी स्वधः स्वपेत्॥ पुरश्चरणसिद्धस्य दक्षिणाम
र्तिसंनिधौ॥ एकादशसहस्राणां जपात्सर्वाधिनाशनं॥ अथ लक्षजपात्सप्त
जन्मपापं प्रणश्यति॥ ततः स्वगृह्यविधिना स्थापयित्वा हुताशनं॥ पायसं स्रुव

वि० पा० पित्वाज्ययुक्तं तज्जुहुयाद्द्विज॥ दशांशसंख्यया पश्चात्साक्षाद्देवं स पश्यति॥ अथ प्रया- स्त०
१०४ तरस्यास्य॥ दिनानि द्वादश द्वौ वा मुंचरु भोजी जपेन्मनुं॥ विनियोक्तुं भवेद्योग्यः सर्वकामार्थ ३
सिद्धये॥ जपसंख्या पूर्ववत्॥ अनेन सिद्धमंत्रेण यद्यत्कामयते द्विजः॥ तं तं काममवा-
प्नोति जपदयुतसंख्यकादिति॥ अथ प्रयातेरुद्ररस्यास्य॥ वासरत्रितयं यावन्निरं-
तरं जपान्नरः नित्यकर्माविरोधेन पुरश्चरणवान्भवेत्॥ ततः प्रयोगयोग्यः स्यात्स-
दा गोत्रांतिकामना॥ जपहोमादि पूर्ववत्॥ अथ प्रयामि भुमिस्यस्य शिवेन वरेण्यस्य च॥
संगृह्य मे कामं त्र॥ निरंतरं जपेन्मंत्रं द्विनानाब्वे कविंशति॥ पुरश्चरणमेवं स्यात्प्रयो- रामः
गार्हस्ततो भवेत्॥ अकालमरणप्राप्तं नाशयायाति वै यदा॥ महीपतिः शांतिकर्म १०४
कारयेद्गतजन्मनो॥ ऋग्यामा मर्ष्या तिलव्रीहि गोधूम यव कल्पितां हविः प्रजुहुया-
द्दशलक्षं वासरे चैकविंशतौ॥ अकालमरणं जित्वा सोऽश्वसंनाशमृच्छतीति॥ अ-
थ ध्वचाद्यस्य॥ अथ दृष्टिं चरित्वा पवासस — संचसंयतः॥ शाकल्यवान्नाशी

द्विमातिर्हि निरंतरं॥ जपन्पुरश्चरणवान्स्यात्प्रयोगार्हस्ततो भवेत्॥ रक्षापुरः स्वरंराजा
काम यन्नचिरजीवितं॥ कारयेद्विधिना कर्म वक्ष्यमाणं द्विजन्मनो॥ ध्येतस्वपट्टवाग्रिय
वेस्तं तुलमितिनिश्रितेः॥ होमं चाष्टसहस्रं स्यात्संचारुः सुनिरंतरं॥ ॥अथ प्रान्योगभेरोग-
स्यनाशाय प्रोच्यते विधिः॥ स्वहस्तकृतं चोम तुनारोतहतो रथ वा पुनः॥ अभिमंत्र्यकले
सं मध्ये त्वारंगं पयसिद्धि पेत्॥ कोषपित्वा ततस्याग्नो होमः कार्यो विधानतः॥ तत्रसंख्या
भवेदष्टौ सहस्राणि शतानि वा॥ शेषं पिबेत्स योगभैरोगराश प्रशाम्यतीति॥ अथ अस्सो-
यस्याप्तशति॥ मंत्रद्वयस्य प्रयोगः॥ कृद्धुसेकं चरेत्पूर्वं ततः बौ उष्णावासरानून्निरंतरंज-
पेन्मंत्रं नित्यं कर्माविरोधतः॥ अनावृष्टिभये घोरे समुत्पन्ने समंततः॥ पंचविप्रास्तथा-
हूय कारयेद्वृष्टिसाधनं॥ हाविषि पायसं तत्र तंडुलाष्टतिलायवाः॥ वेतस्यः समिध-
श्चापि जुहुयाद्दशलक्षसंख्यया॥ त्राकादशादिनैः स्याद्ध्यं अरविलं कर्मचिद्विदं॥ पंचानांतु
जपेदेकश्चत्वारो जुहुयुर्द्विजाः॥ अथ नमो अस्तु नीलग्रीवायेति मंत्रयोगः॥ आलये प-
श्रिमे द्वारे महेशस्य समीपतः॥ जपित्वादिवरात्रिस्तत संततं संयत स्ततः॥ सहस्रं जु

वि० पा० यादर्कपुष्पैर्दशादिनावधि। पुरश्चरणमेवंस्यात्प्रयुंजीत नतो मनुं॥ पुत्रकामः पुरीहंतुरा
१०५ लये वाथ गोष्ठके॥ शामीसमिद्भिरक्ताभिर्दध्नाज्यमधुनान्वहं॥ एकादशसहस्राणि श्री रु० ३
एपहान्यथपंचवा॥ अष्टौसहस्राण्यर्द्धं वा शतान्यष्टापि वैशितुः॥ पंकेरुहाणि शिरसि वि
न्यसेत्तद्भावतः॥ शमिपत्राणि तावंति पुत्रकामः शिवेर्पयेत्॥ शतं द्विजान्भोजयित्वा पुत्रं
वाप्नोत्यसंशयः॥ अथ प्रमुंच धन्वन इत्यादि तिसृणां प्रयोगः॥ लक्षमेकं चरित्वादौ ज
पेच्चनववासरान्॥ एवं कृते भवेत्सिद्धिः पुरश्चरणकर्मणः॥ महीपतेरायुधानि मंत्रयि
त्वा त्वचेनतु॥ कुशाकंटकहोमस्तु लक्षसंख्योथ शक्तितः॥ विद्विष्टो विलयं याति शिव
स्यैव प्रसादतः॥ अथ या ते हेतिरिति त्वच प्रयोगः॥ पुरश्चरणमासांस्यस्त्रवेक्ताना रामः
म्रचाभिवा॥ एकादशसहस्राणि दीपानां दानमीश्वरे॥ हुत्वा उस्वनोरियोगदेवस्ते १०५
नानीउपार्थिवं विना॥ दष्ट्वाज्वालांप्रदीपानांशत्रुस्वना विनश्यति॥ यद्वाशंकुसहस्रा
णि अभिमंत्र्य रिपोः पुरे दिक्पालये यथा देवारामे वापि चतुष्पथे॥ खातेन्गालासुवार

न्येषु नगरांगेषु निक्षिपेत्॥ नश्येत्तु वर्षत्रयात्साद्व्याधियादिभिरुपद्रवैः॥ इति प्रथमानुर
वाका प्रयोगः॥ अथ द्वितीयानुवाकस्य॥ अथ श्रीकामनायस्य सस्येन कमलैः शुभैः॥ आ
युतं जुहुयाद्यज्ञो श्रीमान्भवति मानवः॥ अथ तृतीयस्य॥ अथानेनानुवाकेन वक्ष्ये
कर्माभिचारिकं॥ परराष्ट्रे रोगभिक्षुन्नजावैकारयेत्क्रियां॥ वराहमेषमांसानि जु
हुयात्तत्र लक्षसंख्यया॥ अथ चतुर्थस्य॥ चतुर्थेनानुवाकेन मेरुशांतिर्मंत्रनमस्कार
रं मंत्रविच्छेदद्वारितः॥ संख्यानेवसहस्राणि होमान्मेहो विनश्यति॥ मेहः प्रमेहरो
गः॥ अन्येषामपि कुष्ठादिरोगाः देः शांतये पिचेति॥ अथ पंचमषष्ठयोः॥ अनुवाक
द्वयस्यास्य पुरश्चरणसिद्धये॥ त्रिरात्रं चरुभोजी स्याज्जपेद्यनिरंतरं॥ एकाद
शादिनान्येवं पुरश्चरणमुग्भवेत्॥ अथ राज्यरमावृद्धिकामो राजानुकारयेत्॥
मंत्रसिद्धैर्द्विजैः कर्म वक्ष्यमाणाव्रदन्वितं॥ यावदेकादशावृत्तिरनयोरनुवा
कयोः॥ तावदेव सपर्यास्यात्प्रवेक्ति तु दिने दिने॥ एकादश प्रतिदिनं भोजयेच्च

वि० पा० द्विजानपि॥ प्रोक्तकामलादिना लिंगदर्जेत्स्वयं॥ एवं कृते राज्यलक्ष्मीर्निःप्रत्यूहं विवर्द्ध
१०६ ते॥ अथ सप्तमस्य॥ एकोपवासं कुर्वीत तच्छताष्टशतं जपेत्॥ पुरश्चरणमेवं स्यात्प्रयो स्त०
गार्हस्ततो भवेत्॥ चातुर्वर्ण्यस्य वश्यं यः कामयेतात्मनो द्विजः॥ उदुंबरं च लक्षं न्यग्रो ३
धं प्लक्षमरुहं॥ चेलसंत्रोऽश्वत्थः॥ समिधो दधिमध्वाज्यसं— क्ता जुहुयाद्दसौ॥ अयुतं
होमसंख्यादूर्ध्वमेवं समश्नुते॥ समेधाकामस्तु जुहुयात्सहस्राणां तु पंचकं॥ कपि
लेज्यं हविः प्रोक्तमेवं धां समश्नुते॥ अथ द्वापेऽष्टस्य॥ कृत्वोपवासमेकाहं जपेन्मं
त्रमथायुतं॥ पुरश्चरणमेवं स्यादपस्येद्धनकामनः॥ आयो जुहुयादाज्यं कापिलं प्र
यतो युतं॥ जुहुयात्पंच साहस्री दूर्वाणां ज्वरशांतये॥ दूर्वाहोमे दूर्वा च यं होतव्यमि रामः
ति पारिभाषया मुक्तं॥ अभिचारस्य शांत्यर्थं वैकंकतलदूर्वाः समिधो जुहुयाद्धो १०६
मसंख्या त्वयायुतं भवेत्॥ महाजनकृतद्रोहशांत्यर्थं होममाचरेत्॥ तुषमाज्येन
संमिश्र्य हविः संख्यापि चायुतं॥ अथातिरुद्रशिवातनन्त्रि वेदस्य॥ अष्टोत्तरशतानि

कुर्वीत प्राणायामांस्ततः परं॥ सहस्राणि जपेत्पंच पुरश्चरणसिद्धये॥ कन्यार्थी लभते
कन्यां हुत्वा लाजान्घृताप्लुतान्॥ अपामार्गसमिद्धोमे रलक्ष्मीनाशये बुधः॥ स्ववर्के कल्म
षनाशाय जुहुयाच्च तिलाहुतिः॥ अहोरात्रमुपोष्यैव पुत्रकामः शुचिव्रतः॥ पायसं जुहु
यादग्नौ अष्टोत्तरशताहुतीः॥ ऋतुस्नातां ततो भार्यां शुचिवस्त्रामलंकृतां॥ भोजयेद्धु
तशेषं तु जपन्नष्टशतं बुधः॥ ब्राह्मणान्भोजयित्वा तु पुत्रं प्राप्नोति मानवः॥ अथ मानो
महांतमित्यस्य॥ उपवासत्रयं कृत्वा जपेल्लक्षं च सहस्रकं॥ पुरश्चरणसिद्धः स्यात्प्रयुंजीता
थकर्माणि॥ स्त्रीयस्त्रीबालवृद्धानां शांतिमिच्छन्निदं चरेत्॥ प्रतिसंवत्सरं त्वाघ्नि
हस्रे स्यादुपक्रमः॥ यवानां तिलमिश्राणां जुहुयादयुताहुतीः॥ अथ मानस्तोकर
इत्यस्य॥ कृच्छ्रमेकं चरित्वादौ पात्रे औदुंबरे घृतं॥ निधाय कापिलं तस्य कुर्याच्चैवाभि
मंत्रणं॥ सहस्रसंख्यया तेन स्यादग्नौ वामप्यथ पिवा॥ जुहुयादष्टसहस्री तथा व्याहृ
तिभिः शतं॥ एवं कृते सर्वकाममाप्नोत्येवं न संशयः॥ अथारात्तरस्य॥ लक्ष्म्यायु

वि० पा० कामनायस्य जुहुयात्स्तोऽयुताहुतीः॥ मधुक्तैस्तंदुलैः शुक्लैर्वर्द्धिते तस्य मारयुधी॥ दिनत्र
१०७ मुपाव्य प्राक्सिद्धमंत्रस्य चोच्यत इति॥ अथ मीरूपमेत्यस्य॥ एकरात्रे जपेत्यंच सहस्रा स० ३
णि सुसंयतः॥ पुरश्चरणसिद्धः स्यात्प्रयोगार्हस्तु तो भवेत्॥ अर्थनाशभये प्राप्ते तथैव च
प्राणसंशये॥ तस्करादिभये चैव जुहुयात्सर्पिषाहुती॥ पंचैव तु सहस्राणि भयेभ्यो मुच्य
ते ध्रुवं॥ अथ सहस्राणीत्यस्य॥ छंदूमेकं चरित्वा दौ जपेल्लं च सहस्रकं॥ सच्चिवादिप्र
धानानां पुरषाणामुपद्रवे॥ तच्छांतये महीपालः कारयेदयुताहुतीः॥ समिधस्तत्र शाल्म
ल्यो विकंकतभवा अपि॥ व्रीहयश्च यवाश्चापि होमद्रव्यं तिला अपि॥ यदि मारणा
कामस्त्रं जपेदात सहस्रकं॥ ततो वल्मीकसंभूतमृदा लिंगं प्रकल्प्य च॥ मंत्रेणाने राम: १०७
नाभिषिंचेद्यावद्धीर्णं भवेद्धि न तत्॥ एवं कृते भवेन्मृत्युर्विद्विषो नात्र संशयः॥ अ
का यं प्रयोगो वाजसनेयनामपि साधारणो यजुर्मंत्र्यां युक्तः। गोरखभीतेन लिखितः॥
अत्र सर्वत्र दक्षिणा यत्ता निरूप्यते॥ सापि महा तावि॥ दक्षिणा स्युत्तमा मध्याधमा चे

ति धा मता॥ तत्र स्यो वर्णनिष्काणां दशसाहस्त्रिकोत्तमा॥ तदर्धं मध्यमा प्रोक्ता तृतीया त्रि
सहस्रिका॥ उत्तमा चिंशती सास्याद्विंशती मध्यमा मता॥ शतमात्राऽधमा ज्ञेया प्रको
रोऽन्यश्च कथ्यते॥ उत्तमा चतुःषष्टिस्तदर्द्धं मध्यमा स्मृता॥ चतुर्विंशतिरंत्या स्यादथा
न्यो॥ विधिरुच्यते॥ सहस्रं दक्षिणां दद्याद्दशपूरुषकर्तृके। शतानि पंच दद्यान्निकाति
क्यं च ककर्तृके॥ अथैककर्तृके देयं शतत्रयमिति स्थितिः॥ सर्वत्र द्विगुणां दद्या
दाचार्याय तु दक्षिणां। बहुपूरुषनिष्पाद्य उत्तमा प्रतिपूरुषं॥ अथैककेर्तृकेक तु
रेकस्यैवोत्तमा मता॥ राज्ञां तत्सदृशानां च दक्षिणा कथितोत्तमा॥ अन्येषां मध्य
मा स्याद्वा दक्षिणादाननिर्णयः। अनुक्तदक्षिणाकेषु प्रयोगे श्रियमीरिता॥ विभवे
सति यो मोहान्न कुर्याद्विधिविस्तरं। नैव तत् — लमाप्नोति प्रलोभाक्रांतमानसः॥
इति दक्षिणो यत्ता॥ ॥अथ पक्षिवस्तुतिः। तत्रैव॥ अत्र च द्वातिरिक्तोक्ति प्रत्यवाय जि
हाषया॥ स्तोमिस्तंबेरमाधीशं चर्मनिर्मितवाससं॥ जय जय महाभैरव॥ महाभीम

वि० पा० मृताभूतिंभवितामलकुंडलीलंकृताऽप्रतिघनविलसिततडिदुपमितचलदुकूलतरकरवा रा०
१०८ लनिखिलनिगमोपगीयमानसुरवरकररचितविरचितचतुरचरणशृंगारकमलक ३
त लितैतकपालखट्वांगज्ञासनविस्तारितसंमस्तव्यस्तजगद्विस्तारसंहारसंभारसन्नद्ध
गुणानिरवधिकपरिमाणनीहारपरीवारमरीचिविरिंचिव्यापारयाशीजलललितजटा
जूटाभिरामहरदुरिततरभयपरदिगंगनासंभोगसरागपतंगमंगपालिंगितोत्तमां——
मध्यनयनमदनदमनदमनमत्तमधुकरझंकारसंकाश——गसंगवकिंकिणीकलि
तललितपदाहतिक्षिन्नमहीमंडलाधारांडजपत्तिघस्यमानतांडवैकाडंबरकू
ष्कारोल्बध्वस्तदैत्यदानवसंघातांतरांतरितशांतांता करण अनवरतधाराधरे रामः
ध्यानगंभारवबर्बरगर्वपर्वफूत्कारविस्तगह्वरगुहाराजीविराजमानधाराधीशाकल्प १०८
ककांतिक्रांतनिजकंपवेकदेश अखिलजगदधीशाय नमस्ते नमस्ते नमस्ते॥एव
मन्यदपिस्तोत्रं स्तोतव्यं॥अथ चरुद्रहोमादि येन्ये विशेषा आगमोक्तागे यांतरतोवसे

या:॥इत्युपपरम्यते॥इति विधानपारिजाते रुद्राध्याय विधानं समाप्तं॥उपक्रांतमुप
संहृतं॥आचारः प्रथमो धर्मः श्रुत्युक्तः स्मार्त एव च॥तस्मादस्मिन् समायुक्तो नित्यस्या
दात्मवान् द्विजः॥विहिताकरणाच्च निषिद्धाचरणं तथा॥नानानरकदं पुंसां हीनयो
नौ च जन्मदं॥आचाराद्विच्युतो विप्रो न वेदफलमश्नुते॥आचारेण तु संयुक्तः संपूर्ण
फलभाग्भवेत्॥सर्वलक्षणहीनोपि समुदाचारवान्नरः॥श्रद्दधानोऽनसूयश्च शतं
वर्षाणि जीवति॥अक्रोधनः सत्यवादी भूतानामप्यहिंसकः॥अनिस्त्रश्च वदान्यश्च
शतं वर्षाणि जीवति॥अहन्यहनि विप्राणां कर्मनित्यमिहोदितं॥अह्नि निर्वर्त्यते यस्मा
त् आह्निकं तद्धि तु बुधाः॥अनंताह्निकनामेदमनंतापप्रकाशकं॥अनंतेन कृतं यस्मा
त् आह्निकं तद्धि तु बुधाः॥नागदेवेन तज्ज्योयं भट्टोनंतो महामतिः॥आह्निकामृतसेकेन
द्विजवृक्षान् वर्द्धयेत्॥संति ग्रंथा सहस्राणि आह्निकस्य विधौ बुधाः॥कोप्यस्य म
हिमा वेद्यो भिज्ञो जपति सर्वतः॥नपौंडुस्याभिमानेन न वित्तस्य लिप्सया॥रचितं

वि॰पा॰ त्वाह्निकं किं तविदुषांपरितुष्टये॥ अनेनग्रंथदीपेनस्वस्वउद्दामकंतमः अपास्यकर्म स्त॰

१०९ कुर्वंतुनिर्भयाज्ञानिसंसदि॥ वचनप्रसूनमालाबालेनेवसमर्पिता॥ मज्ञानंतेनवि २

दुषानानानिर्णयचिंचिंता॥ इतिश्रीमद्वेदिकोत्तमश्रीमल्लागदेवभट्टसूनुनाप्रथम

ज्ञाखिनाश्रीमदनंतभट्टेनविरचितेविधानपारिजातसमाकृयेनिबंधेतृतीयस्तब

के आह्निकंसमाप्तं॥ प्रथमभागः॥ श्री॥ ॥०॥ श्रीममः ॥० श्रीरस्तु॥०

रामः

१०९